*आगमोद्धारक ग्रन्थमालाया अष्टादशं रत्नम् ।*

ॐ नमो जिनाय ।

आगमोद्धारक-आचार्यप्रवर श्री-आनन्दसागरसूरीश्वरेभ्यो नमः ।

**महोपाध्याय-श्रीमद्धर्मसागरगणिवरविरचित-**
**श्रीमहावीरविज्ञप्तिद्वात्रिंशिका-षोडशश्लोकी-महावीरजिन**
**स्तोत्ररूपः**

# धर्मसागरग्रन्थसंग्रहः ।

संशोधकः

**प० पू० गच्छाधिपति-आचार्य-श्रीमन्माणिक्यसागरसूरीश्वर-**
**शिष्यः मुनिलाभसागरः ।**

*द्रव्यसहायक—कलकत्ता (गुजराती) श्वेताम्बरमूर्तिपूजक*
*तपगच्छ जैन संघ ।*

आगमोद्धारक ग्रन्थमालाया अष्टादशं रत्नम् ।

ॐ नमो जिनाय ।

आगमोद्धारक-आचार्यप्रवर श्री-आनन्दसागरसूरीश्वरेभ्यो नमः ।

महोपाध्याय-श्रीमद्धर्मसागरगणिवरविरचित-

'श्रीमहावीरविज्ञप्तिद्वात्रिंशिका-षोडशश्लोकी-महावीरजिन

स्तोत्ररूपः

# धर्मसागरग्रन्थसंग्रहः ।

संशोधकः

प० पू० गच्छाधिपति-आचार्य-श्रीमन्माणिक्यसागरसूरीश्वर-

शिष्यः मुनिलाभसागरः ।

द्रव्यसहायक—कलकत्ता (गुजराती) श्वेताम्बरमूर्तिपूजक

तपगच्छ जैन संघ ।

प्रकाशिका :—

मीठाभाई कल्याणचन्द पेढी

कपडवंज ( जि० खेडा )

प्रतयः ५०० मूल्यम् २-५०

वीर संवत् २४८८ वि० सं० २०१८

मुद्रक :

रेफिल आर्ट प्रेस

३१, बड़तल्ला स्ट्रीट

कलकत्ता-७

# किञ्चिद् वक्तव्य।

आ 'धर्मसागर ग्रंथ संग्रह' नामनुं पुस्तक सत्य जिनमार्गना अन्वेषी एवा विद्वानोना करकमलमां अर्पण करवामां आवेछे।

आ पुस्तकमां तपागच्छ प्रासादना स्तंभसमान पू० महोपाध्याय श्रीमद् धर्मसागर गणिवर विरचित स्वोपज्ञ वृत्तिसहित त्रण कृतिओ छे।

१. श्री महावीर - विज्ञप्ति-द्वात्रिंशिका—आनी रचना पू० उपाध्यायजीए वि० सं० १६१६ मां स्तंभतीर्थ नगर (खंभात) मां करी छे, अने एनुं संशोधन एमना बंधु पू० श्रीविमलसागरजीए कर्युं छे। आमां दिगंबरादि १० कुपाक्षिकोना मंतव्योनुं आगम-युक्ति थी निराकरण कर्युं छे।
विशेष विषयानुक्रमथी जाणवो।

२. षोडशश्लोकी—आनुं बीजुं नाम 'गुरु तत्त्वप्रदीपदीपिका' छे। आमां जघन्य-मध्यम अने उत्कृष्ट उत्सूत्रिओनुं निरूपण छे, तेमज दिगंबर आदि १० उत्सूत्रिओना एकेक उत्सूत्रनुं आगम-युक्ति पूर्वक खंडन करवामां आव्युं छे।

३. महावीर जिनस्तोत्र—आनी रचना पू० उपाध्यायजीए 'शिवपुरी' मां करी छे। आ कृति मूल प्राकृतमां छे, एना उपर संस्कृतमां एक अवचूरि छे। आमां एकंदर २६ पद्यो छे, २८ पद्यो अनुप्रासादि शब्दालंकारालंकृत त्रोटक छंदमां अने छेल्लुं पद्य वसन्ततिलकामां छे। आमां वर्त्तमान तीर्थाधिपति श्रीमन्महावीर भगवंतनी स्तुति करवामां आवी छे।

संशोधनमां महावीर विज्ञप्ति द्वात्रिंशिकानी हस्तलिखित प्रति छाणी ज्ञानमंदिरनी चंदुलाल भाई द्वारा प्राप्त थइ छे।

षोडशश्लोकीनी हस्तलिखित एक प्रति सुरत जैनानंद पुस्तकालयनी पानाचंदभाई मद्रासी द्वारा अने बीजी एक प्रति वडोदरा आत्मानंदज्ञानमंदिरनी सौभाग्यचंदभाई द्वारा प्राप्त थइ छे।

महावीर स्तोत्रनी प्रति कपडवंज अभयदेवसूरि ज्ञानमंदिरनी मास्तर हरगोविंददास द्वारा प्राप्त थइ छे। एना आधारे सावधानी थी संशोधन कर्युं छे, छतां कोइ भूल रही जणाय तो ते विद्वानोए सुधारी वांचवं ए अभ्यर्थना।

कारतक सुद ५<br>कलकत्ता

लि०<br>संशोधक

# प्रकाशकीय निवेदन ।

प० पू० गच्छाधिपति आ० श्री माणिक्यसागरसूरीश्वरजी महाराज आदि ठाणां वि० सं० २०१० ना वर्षे कपडवंज शहेरमां मीठाभाइ गुलालचंदना उपाश्रये चातुर्मास बीराज्या हता, आ अवसरे तेओश्रीना पवित्र आशीर्वादे आगमोद्धारक-ग्रंथमालानी स्थापना थएली हती, आ ग्रंथमालाए त्यारबाद प्रकाशनोनी प्रगति ठीक ठीक करी छे ।

तेओश्रीनी पुण्यकृपाए आ 'धर्मसागर ग्रंथ संग्रह' नामनं पुस्तक आगमोद्धारक ग्रंथमालाना १८ मा रत्नतरीके प्रगट करतां अमोने बहु आनन्द थाय छे ।

आमां त्रण कृतिओ छे, तेमां षोडशश्लोकीनी प्रेसकोपी स्वर्गस्थ गणिवर्य श्री चंदनसागरजी महाराजजीए करेली छे अने महावीरविज्ञप्ति द्वात्रिंशिका अने महावीर जिनस्तोत्रनी प्रेसकोपी मुनिवर्य श्री लाभसागरमहाराजजीए करेली छे, अने आ पुस्तकनुं संशोधन पू० गच्छाधिपति आ० श्री माणिक्यसागरसूरिजीनी पवित्रदृष्टि नीचे तेओश्रीए कर्युं छे । ते बदल तेओश्रीने वंदन करुं छुं । अने जेओए द्रव्य तथा प्रतिओ आपवा विगेरे द्वारा सहाय करी छे, तेओनो उपकार मानुं छुं ।

लि०

रमनलाल जयचन्द

# श्री महावीर-विज्ञप्ति-द्वात्रिंशिकायाः विषयानुक्रमः।


| पृष्ठम् | विषय |
|---|---|
| २ | केवलज्ञानदर्शनयोः विषयः। |
| १० | दिगम्बरादिदशमतानां उत्पत्तिकालः तथा तन्मताकर्षकनामानि। |
| १७ | दिगम्बरमतखण्डनम्। |
| २९ | स्त्रीमुक्तिनिषेधनिराकरणम्। |
| २६ | केवलिभुक्तिनिषेधनिराकरणम्। |
| २८ | पूर्णिमीयकमतखण्डनम्। |
| २८ | पूर्णिमायाः पाक्षिकत्वनिरसनम्। |
| २८ | योगोपधानवहननिषेधस्य निरसनम्। |
| ३३ | खरतरमतखण्डनम्। |
| ३३ | स्त्रीजिनपूजा-पौषधिकभोजननिषेधस्य निराकरणम्। |
| ३६ | श्रावण-प्रथमभाद्रपदपर्युषणाकरणस्य निराकरणम्। |
| ३७ | अपर्वपौषधनिषेधस्य निराकरणम्। |
| ३९ | सामायिके पश्चादीर्यापथा रात्रिपौषधिकस्य रात्रिपाश्चात्यप्रहरे सामायिककरणस्य च निराकरणम्। |
| ४४ | अञ्चलमतखण्डनम्। श्रावकमुखवस्त्रिकानिषेधस्य निरासः। |
| ४४ | श्रावक प्रतिक्रमण-द्वयधिकसामायिक-निषेधस्य निराशः। |
| ५० | त्रिस्तुतिकमतखण्डनम्। |
| ५० | श्रुतदेवतास्तुतिनिषेधस्य निरासः। |
| ५१ | लुम्पाकमतखण्डनम्। |
| ५१ | जिनपूजानिषेधस्य निरासः। |
| ५८ | कटुकमतखण्डनम्। |
| ५८ | सम्प्रति साधुदर्शननिषेधस्य निरासः। |
| ५९ | साधुप्रतिष्ठानिषेधस्य निरासः। |
| ६१ | द्रव्यस्तवस्वरूपम्। |
| ६४ | देवकृतप्रतिमायाः प्रतिष्ठां विनापि पूज्यत्वम्। |
| ६८ | निह्नवकृतेः अस्वीकार्यत्वम्। |
| ७२ | बन्ध्यमतखण्डनम्। |
| ७३ | पाशचन्द्रमतखण्डनम्। |
| ७३ | साधूपदिष्टजिनपूजानिषेधः। |

# षोडशश्लोक्याः विषयानुक्रमः ।


| पृष्ठम् | विषयः |
|---|---|
| ८३ | भस्मग्रहस्य फलम् । |
| ८५ | अशुभग्रहस्य शुभीकरणोपायः । |
| ८६ | उत्सूत्रस्य भेदाः । |
| ८७ | जघन्योत्सूत्रिणः स्वरूपम् । |
| ८८ | 'किं ममे'ति उपेक्षावचनस्यानुचितत्वम् । |
| ८८ | मध्यस्थस्य भेदौ । |
| ९४ | आद्यमध्यस्थस्य स्वरूपं फलं च । |
| ९५ | द्वितीयमध्यस्थस्य स्वरूपं फलं च । |
| ९७ | निर्विशेषमतेः प्रार्थनायाः तात्पर्यम् । |
| ९९ | मध्यमोत्सूत्रिणः भेदौ । |
| १०० | स्थिरोत्सूत्र्यपरपर्यायावस्थितकोत्सूत्रिणः भेदौ । |
| १०० | स्थिरोत्सूत्रिदिगम्बरादिदशमतानां उत्पादकनामानि । |
| १०१ | दिगम्बरादिदशमतानामुत्पत्तिकालः |
| १०२ | आद्यस्थिरोत्सूत्रिणः स्वरूपम् । |
| १०३ | द्वितीयः स्थिरोत्सूत्रिणः स्वरूपम् । |
| १०९ | निह्नवस्य प्रकाराः । |
| १११ | दिगम्बरमते स्त्रीणां मुक्त्यभावस्य निराकरणम् । |
| ११४ | पूर्णिमीयकमते पूर्णिमापाक्षिकस्य निराकरणम् । |
| ११९ | औष्ट्रिकमते स्त्रीजिनपूजानिषेधस्य निराकरणम् । |
| १२० | अञ्चलमते श्रावकमुखवस्त्रिकादिनिषेधस्य निराकरणम् । |
| १२१ | त्रिस्तुतिकमते श्रुतदेवतादिस्तुति निषेधस्य निराकरणम् । |
| १२५ | लुम्पाकमते जिनप्रतिमानिषेधस्य निराकरणम् । |
| १२८ | कटुकमते सम्प्रति साधुनिषेधस्य निराकरणम् । |
| १३२ | मध्यमोत्सूत्रिणो द्वितीयभेदः । |
| १३७ | उत्कृष्टोत्सूत्रि निरूपणम् । |
| १२१ | साम्प्रतं तीर्थदर्शनम् । |

# शुद्धिपत्रम् ।

| पृ० | पं० | अशु० | शु० | पृ० | पं० | अशु० | शु० |
|---|---|---|---|---|---|---|---|
| १ | ६ | सूरि | सूरिं | ४३ | १२ | त्वेव | ह्येव |
| ३ | १२ | श्रोतृ | श्रोतॄ | ,, | १७ | द्वरि | द्वैरि |
| ४ | १० | शक्रादि | शक्रादी | ४६ | १६ | दुधिया | दुर्धिया |
| ६ | १२ | श्वामि | स्वामि | ४८ | १६ | कमण | क्रमण |
| ११ | ११ | तीथी | तिथी | ५१ | २१ | विश्वास्य | विंश्वास्य |
| १६ | १६ | नाक्ता | नोक्ताः | ५७ | १४ | परो | परः- |
| २३ | ३ | नागमौ | नमागमो | ,, | १६ | प्यन्न | ष्यन्न |
| २५ | २२ | णम | णम् | ५८ | ३ | लक्ष्या | लक्ष्मा |
| ३० | ५ | ग्रही: | ग्रही | ६२ | १६ | चापः | वापः |
| ३५ | २ | ष्टिक | ष्ट्रिक | ७२ | ४ | वैवण्य | वैवर्ण्य |
| ३६ | २ | पङ्ता | पङ्क्ता | ७७ | १६ | उद्धत्य | उद्धृत्य |
| ,, | १३ | ,, | ,, | ११८ | १६ | तावन् | तावान् |
| ३७ | १६ | पौषघं | पौषधं | १२६ | १ | वद्धद् | वद्धदद् |
| ४० | ११ | निर्वृत्ति | निवृत्ति | ,, | ६ | रूषं | रूपं |
| ,, | १६ | भुजङ् | भुजङ्ग | | | | |

श्रीजिनेन्द्रो विजयतेतराम्

*महोपाध्याय-श्रीधर्मसागरगणिवरविरचिता स्वोपज्ञवृत्तिसमलङ्कृता*

# श्रीमहावीरविज्ञप्ति द्वात्रिंशिका ।

प्रणम्य परमानन्द-कन्दं शक्रार्चितक्रमं,
श्रीमद्वीरजिनाधीशं, विघ्नौघेभमृगाधिपम् ॥१॥
श्रीमद्विजयदानाह्वं, नत्वा सूरिनतक्रमं;
स्वोपज्ञां विवृणोमि श्रीवीरद्वात्रिंशिकामहम् ॥२॥ युग्मम्

अथ श्रीमहावीरविज्ञप्तिद्वात्रिंशिकां चिकिषुर्निर्विघ्नसमाप्तिकामो मंगलार्थं विज्ञाप्यस्यैवार्हतो नमस्कृतिमाह—

**श्रीमत्स्वर्गिजनार्चितक्रमयुगं संक्रान्तविश्वत्रयं,**
**विज्ञानं विलसद्वचःप्रतिवचःस्याद्वादमुद्रांकितम् ।**
**बिभ्राणं बत बाधवन्ध्यवचनं चापायवन्ध्यस्थितिं,**
**श्रीमद्वीरजिनेश्वर ! स्तुतिपथं नत्वा नये त्वामहम् ॥१॥**

व्याख्या-हे श्रीमद्वीरजिनेश्वर ! बतेति कोमलामन्त्रणे । त्वां नत्वाहं स्तुतिपथं नये इत्यन्वयः । त्वां किंलक्षणं ? श्रीमत्स्वर्गिजनार्चितक्रमयुगं । श्रीमत्स्वर्गिजनो-महर्द्धिकशक्रादिसुरवर्गस्तेनार्चितं-पूजितं, क्रमयुगं-पादयुग्मं यस्य स तं । अनेन पूजातिशयो दर्शितः । त्वां किंचक्राणं ? बिभ्राणं-दधानं, किं ? विज्ञानं-

विशिष्टं सामान्यविशेषाद्यनन्तधर्मात्मकाशेषपदार्थविषयकं ज्ञानं, केवलज्ञानमित्यर्थः। ननु विशेषावबोधकं ज्ञानं सामान्यावबोधकं च दर्शनमिति प्रवचनवचनात् कथं ज्ञानस्य सामान्यावबोधकत्वमितिचेत्। मैवं, ज्ञानदर्शनयोः क्रमेण सामान्यविशेषानवबोधकत्वे सर्वज्ञस्य सर्वज्ञत्वसर्वदर्शित्वयोर्व्याघातापत्तेस्तथा च-

"संभिन्नं पासंतो, लोगमलोगं च सव्वओ सव्वं।
तं नत्थि जं न पासइ, भूअं भव्वं भविस्सं च॥"

इति सिद्धान्तबाधा स्यात्, तस्मात् ज्ञानदर्शनयोस्तुल्यविषयत्वेऽपि ज्ञाने सामान्यमुपसर्जनीभावेन विशेषस्तु प्रधानभावेन विषयीस्यात्, दर्शने च सामान्यं प्रधानीभावेन विशेषस्तूपसर्जनीभावेन चेति विशेषो बोध्यः। उक्तञ्च—

"य एव हि उपसर्जनीकृतसमताख्यधर्मा विषमताधर्मविशिष्टा ज्ञानेन गम्यन्ते त एवोपसर्जनीकृतविषमताख्यधर्माः समताधर्मविशिष्टा दर्शनेन गम्यन्ते" इति स्याद्वादमञ्जर्याम्।

अत्र समताधर्माः सामान्या विषमताधर्माश्च विशेषास्ते च घटापेक्षया पटेऽनन्ताः, पटापेक्षया च घटेऽनन्ताः। एवं प्रतिपदार्थमन्योन्यं द्विकादिसंयोगैश्चानन्ता भाव्याः। तद्यथा-अनन्तपुद्गलनिष्पन्नत्वकालादिपञ्चकहेतुकत्वादिहेतुसूचकधर्मैर्द्रव्यत्वमूर्त्तत्वरूपादिमत्त्वादिसत्तासूचकधर्मैर्विवक्षितेप्सितार्थसाधकत्वस्वस्वसाध्यकार्येच्छुकजनमोहजनकत्वादिकार्यसूचकधर्मैश्च घटः पटसमान एवेत्यतो घटे पटसामान्यानि, पटे च घटसामान्यान्यनन्तानि। तथा मृत्पिण्डचक्रचीवरकुलालजन्यत्वादिकारणसूचक-

धर्मैः पार्थिवत्वपृथुबुध्नोदराद्याकारवत्त्वादिसत्तासूचकधर्मैर्जला-धारत्वादिकार्यसूचकधर्मैश्च घटः पटादिभ्यो विषमस्तेन पूर्वोक्ता धर्मा विशेषाऽपरपर्याया विषमताख्या आख्यायन्ते। एवं पटोऽपि तन्तुवेमाकुविन्दादिजन्यत्वादिहेतुसूचकधर्मैर्वनस्पतिकत्वतन्तुमयत्वादिसत्तासूचकधर्मैः शीतत्रायकत्वादिकार्यसूचकधर्मैश्च घटादिभ्यो विषम इति तात्पर्यम्। किंभूतं विज्ञानं? सङ्क्रान्तविश्वत्रयं, संक्रान्तं-प्रतिबिम्बितं विषयीभूतं, विश्वत्रयं-जगत्त्रयी यत्र तत्तथा। अनेन ज्ञानातिशयो दर्शितः। च-पुनः किंबिभ्राणं? बाधवन्ध्यवचनं। बाधः—पूर्वापरविरोधस्तेन वन्ध्यं-शून्यं, परैरबाध्यं वा, तच्च तद्वचनं च बाधवन्ध्यवचनम्। किंलक्षणं? विलसद्वचःप्रतिवचःस्याद्वादमुद्राङ्कितं, विलसन्ति-विनयाद्युपचारोपेतानि, चित्रकारिप्रमेयवाचकत्वेन श्रोतॄणां चित्ताह्लादकारीणि वा वचांसि-प्रश्नरूपेण शिष्यवचनानि, तेषामनुवादो वा, प्रतिवचांसि च-प्रश्नितार्थनिर्वचनरूपाणि सिद्धान्तरूपेण गुरुवचनानि, स्याद्वादश्चानेकान्तवादः स एव मुद्रा, ततो द्वन्द्वः, ताभिरङ्कितम्-चिन्हीकृतमलङ्कृतमित्यर्थः। तत्र चापेक्षिकी हि प्रवचने स्याद्वादमुद्रेतिवचनात् स्याद्वादापेक्षयाऽवगन्तव्यः, अपेक्षा चैवं-एकस्मिन्नेव विवक्षितघटादिवस्तुनि स्वरूपापेक्षया सत्त्वं, पररूपापेक्षया चासत्त्वमित्यादि। तादृशार्थविबोधकवचनं तु स्याद्घटोऽस्त्येवेत्यादिरूपेण सकलादेशरूपमवसातव्यम्। तच्च युगपदनन्तधर्मात्मकवस्तुवाचकं। उक्तं च प्रमाणनयतत्त्वालोकालङ्कारे—

"प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद्वा यौगपद्येन प्रतिपादकं वचः सकलादेश" इति। एतद्विस्तरार्थजिज्ञासुना तु रत्नाकरावतारिकाऽवलोकनीया। अनेन वचनातिशयो दर्शितः। पुनः किंभूतं त्वां? अपायवन्ध्यस्थितिं, अपायैरुपद्रवैर्वन्ध्या-शून्या, स्थितिः-स्वप्रवृत्तिमर्यादा यस्य स तमनेनापायापगमातिशयो दर्शितः। तद्दर्शनेन च दर्शिताश्चत्वारोऽपि मूलातिशयास्तेषां सार्थकता स्याद्वादमञ्जर्यादिग्रन्थान्तरतोऽवसातव्या। विशेषणानां सार्थकतात्वेवं-श्रीमदिति स्वर्गिजनविशेषणं देवेष्वपि महर्द्धिकतासूचनार्थं। सा च शक्रादिनामेवेति। संक्रान्तविश्वत्रयमिति विज्ञानविशेषणं लोकप्रसिद्धप्रभूतत्वज्ञापनार्थं। लोके हि विश्वत्रयगोचरं ज्ञानमुत्कृष्टमुच्यते, लोकोत्तरे तु लोकालोकप्रकाशकं ज्ञानमुत्कृष्टं, तदानीं विश्वत्रयपदमलोकस्याप्युपलक्षकम्। बाधवन्ध्यमितिविशेषणं वचनस्योपादेयत्वज्ञापनार्थं, बाध्यवचनस्यानुपादेयत्वाद्। बाध्यत्वं चात्र पूर्वापरविरोधित्वमित्यादि। अबाध्यत्वं कुत इति विशेषणद्वारा हेतुमाह-किंलक्षणं वचः?, विलसदित्यादि। तच्चैवं-यद्वचनं निर्दोषपूर्वपक्षसिद्धान्तात्मकं भवति, यच्च स्याद्वादमुद्राङ्कितं भवति, तत्परैर्बाधयितुं न शक्यत इत्यर्थः। श्रीमद्वीरेतिपदं वर्त्तमानतीर्थाधिपतिनामज्ञापनार्थं। श्रीमद्वीरेत्यादि सम्बोधनपदमनुक्तसंबोधनकाव्येऽपि सम्बन्धनीयमितिकाव्यार्थः॥

अथ भगवद्गुणानामानन्त्याद्वाग्गोचरीकर्तुमसामर्थ्यं दृष्टा-

न्तद्वारात्मनो दर्शयन्नेव शक्त्यनुसारेणावश्यवक्तव्यताविषयिणीं चित्तस्थामेव प्रतिज्ञां सूचयन्नाह—

ऐश्वर्यादिगुणैकलेशमपि ते वक्तुं न योगीश्वरः,
कोटी-कोटिनिजायुषापि विभवे जिह्वासहस्रैरपि।
तन्मेऽपि स्पृहयालुता हितवती तत्राऽस्तु तद्वत्पुन,
र्विज्ञप्ताविति नोचिता तव पुरः प्रत्यर्थ्यसौ ज्ञप्तये ॥२॥

व्या०—यत्तदोर्नित्याभिसंबन्धात् यस्मात् कारणात् हे श्रीमद्वीरजिनेश्वर ? आस्तां जडमतिर्मादृशो जनो, योगीश्वरोऽपि केवल्यपि, आस्तां समग्रभावेनैकोऽपि गुणः, ऐश्वर्यादिगुणैकलेशमपि-प्रभुतादिगुणैकदेशमपि, वक्तुं-वाग्गोचरीकर्तुं न विभवे चेन्न समर्थो भवेदित्यन्वयः। कैः कृत्वा ? कोटीकोटिनिजायुषापि जिह्वासहस्रैरपि। कोटीकोटिशब्दो हि कोटीकोटिगुणितादिसंख्यानामुपलक्षकः। तृतीया चात्र करणार्थे। करणत्वं च भगवद्गुणवर्णने जिह्वायुषोर्लोकप्रतीतमेव। एतावता भगवद्गुणवर्णने सामर्थ्याभावेन योगीश्वरस्यापि स्पृहयालुता सूचिता, तत्-तस्मात्-कारणात् तद्वत्तस्येव तद्वत् योगीश्वरस्येवेत्यर्थः। तत्र त्वद्गुणवर्णने मेऽपि-ममापि, स्पृहयालुता-कदाहं त्वद्गुणान् वाग्गोचरीकरिष्ये इत्येवंरूपेणेच्छुकता, हितवती-हितकारिणी, अस्तु-भवतु। अनेन त्वद्गुणवर्णने योगीश्वरद्वारा स्वस्य सुतरामसामर्थ्यं स्पृहयालुतायाश्चौचित्यं सूचितम्। अथ न सर्वत्रापि स्पृहयालुताया एवौचित्यमित्युपदर्शयन् प्रतिज्ञां सूचयति-

'तद्वदि'त्यादि। हे श्रीमद्वीर ? पुनस्तद्वदसौ तव प्रत्यर्थीति ज्ञप्तये-ज्ञापनाय, तव पुरो विज्ञप्तौ-विज्ञापने, स्पृहयालुता नोचिता-न हितवती स्यात्। तद्वच्छब्दस्तु लालाघण्टान्यायेनेहापि योज्यः, परं भिन्नार्थभाग्। भिन्नार्थता च सर्वादेर्बुद्धिस्थवाचकत्वेन पूर्वं तद्वत् योगीश्वरवदिति व्याख्यातम्। इह तु तस्मिन्निव तद्वत्, त्वद्गुणवर्णन इवेत्यर्थः। अयं भावः-हे स्वामिन् ? यथा त्वद्गुणवर्णने स्पृहयालुता हितवती, न तथा तव पुरस्त्वद्वैरि-ज्ञापनाय-विज्ञपने सा हितवती, किन्तु 'विपत्तये वैरिविश्वास' इतिवचनात् नामग्राहमाशु स्वामिनः पुरो वैरी वाग्गोचरीकर्त्तव्य एवेति। अनेन विभुपुरस्ताद्वैरिज्ञापनविज्ञप्तिं करिष्यामीत्येवं रूपां हृदयस्थामेव प्रतिज्ञां ज्ञापितवान्। तत्र वैरिज्ञापनविज्ञप्तिः श्वामिभक्तिः स्वामिभक्तानां चानुग्रहहेतुरिति बोध्यम्। अत एवानन्तरकाव्ये त्वद्भक्तिनुन्नत्वमात्मनश्चतुर्थकाव्ये च 'नाम-ग्राहनिरूपिता हितममी तीर्थस्य ते स्यु'रित्यादि वक्ष्यतीति काव्यार्थः।

अथ यावद्यथा चिन्तितं वाग्गोचरीकर्तुमशक्यमितिन्यायात् चित्तस्थामपि प्रतिज्ञां सङ्कोच्य स्वशक्त्यनुसारेण वाग्गोचरी-करणार्हामेव प्रतिज्ञामाविष्कुर्वन्नाह—

तत्रापीश ! पुरा पुरातनमदीयाऽऽचार्यवर्यैः पुरः,
प्रज्ञप्ता यदमी द्विषः करकरग्राहं परित्यज्य यान्।
वाचाऽऽज्ञां प्रतिपद्य ये त्वदरयस्तानेव वाग्गोचरी-
कुर्वे सर्वविदस्तवापि पुरतस्त्वद्भक्तिनुन्नोन्नतः ॥३॥

व्या०—हे ईश ! सर्वविदस्तवापि पुरतः—सर्वज्ञस्य भवतोऽपि पुरस्तात्, त्वद्भक्तिनुन्नोन्नतः—तव भक्त्या प्रेरितः सन्नुन्नतिं प्राप्तः, एवंविधोऽहं । तत्रापि त्वद्वैरिष्वपि वाचाऽऽज्ञां-वचोमात्रेण त्वदाज्ञां, प्रतिपद्य-स्वीकृत्य, ये त्वदरयस्तववैरिणो वर्तन्ते, तानेव वाग्गोचरीकुर्वे-वचोगोचरान् विदधे इति प्रतिज्ञाऽन्वयः । तानेवेत्यत्रैवकारोऽन्ययोगव्यवच्छेदार्थः । तेन वचोमात्रेणापि त्वदाज्ञामनङ्गीकुर्वाणा ये साङ्ख्यादयस्तान्न वाग्गोचरीकुर्वे इत्यर्थः । तन्निदानं पूर्वार्द्धेनोक्तमवगन्तव्यं । तच्च सर्वविदोऽपि पुरस्ताद्वाग्गोचरीकरणं तत्कुत इति स्तुतिकर्तृ-विशेषणद्वारा हेतुमाह—कीदृशोऽहं त्वद्भक्तिनुन्नोन्नतः । यो हि त्वद्भक्तिनुन्नोन्नतः स त्वत्पुरस्ताद्वैरिज्ञापने विलम्बं न कुर्यात्, त्वद्भक्तेः सदृशस्वभावत्वात् । अथ पूर्वार्द्धेन सङ्कोचमाह—तानेव वाग्गोचरीकुर्वे, किं कृत्वा ?, परित्यज्य, कान् तान् ? यत्तदोर्नित्याभिसम्बन्धात् यान्, कुतस्तान् ? [कान्] यद्-यस्माद्येऽमी-प्रत्यक्षाः साङ्ख्यादयो दस्यवः, करेण करं गृहीत्वेत्यर्थवत्क्रियाविशेषणं, करकरग्राहं यथा स्यात्तथा पुरा-पूर्वं, पुरातनमदीयाऽऽचार्यवर्यैः । पुरातनाः-जीर्णा ये मदीया आराध्यत्वेन ममताबुद्धिविषयाः ये आचार्यवर्याः- आचार्यप्रधानास्तैस्तव पुरस्तात् प्रज्ञप्ताः-प्रकाशिताः । अयं भावः-श्रीसमन्तभद्रश्रीहेमाचार्यादिप्राचीनाचार्यैश्चतुर्विंशतिजिनस्तवन-श्रीमहावीरद्वात्रिंशिकादिषु करेण करं गृहीत्वा ये साङ्ख्यादयः प्रसिद्धद्वेषिणस्तव पुरस्तात्प्रज्ञप्तास्तान् परित्यज्य देवोऽर्हन् सुसाधु-

र्गुरुरित्यादिवचोमात्रेण तवाज्ञामङ्गीकृत्यापि मधुपिधान-विषकुम्भसदृशा ये तव वैरिणस्तानेव तव पुरस्ताद् वाग्गोचरी-कुर्वे इति काव्यार्थः ॥

अथ प्रतिज्ञारूढाः कतिसङ्ख्याका इति दर्शयन् सहेतुक-प्रीतिसूचागर्भितं काव्यमाह—

**स्वामिन् सम्प्रति तेऽपि बहुशस्तत्र प्रसिद्धा दश,**
**शेषाः किञ्चिदकिञ्चिदेतदितरे त्वद्बोधबोध्याश्च ते ।**
**नामग्राहनिरूपिता हितममी तीर्थस्य ते स्युस्ततः,**
**प्रीतिर्गाढतरेप्सिता च सततं स्यादावयोस्तत् शृणु ॥४॥**

व्या०—हे स्वामिन् ! तेऽपि-प्रतिज्ञारूढा अपि, सम्प्रति-प्रस्तुतस्तुतिकर्तृकाले, बहुशो-बहुप्रकाराः, तत्र-तेषु द्विषत्सु, दश-दशसङ्ख्याकाः अनन्तरवक्ष्यमाणकाव्यद्वयोदितनामानः प्रसिद्धाः, शेषाः-द्वित्राः किञ्चित्प्रसिद्धाः, एतदितरे-एतद्व्यतिरिक्ताः अकिञ्चित्प्रसिद्धाः-अप्रसिद्धनामानः । ये च किञ्चित्प्रसिद्धाः अकिञ्चित्प्रसिद्धाश्च ते-सर्वेऽपि त्वद्बोधबोध्याः-तव ज्ञानगोचराः, अकिञ्चित्करत्वान्नाहं वाग्गोचरीकुर्वे इत्यर्थः । ये च दशसङ्ख्याकाः प्रसिद्धनामानस्ते नामग्राहनिरूपितास्तीर्थस्य-साध्वादिसमुदायस्य, हितं-पथ्यं स्युः । यतस्तीर्थस्य हितं, तत आवयोः- त्वं चाहं चावां, तयोरावयोरिप्सिता-वाञ्छिता, प्रीतिः सततं-निरन्तरं गाढतरा-अतिशयेन निबिडा,

स्याद्-भवेत् तीर्थस्य तवाभीष्टत्वात्, अभीष्टस्य हितं प्रीति-हेतुरेव। सततमितिक्रियाविशेषणेन प्रीतेरव्ययत्वं, गाढतरेति विशेषणेन प्रीतेर्दृढत्वमसूचि। सम्प्रतिशब्देन प्रस्तुतस्तुतिकर्तृ-कालाध्यक्षसिद्धाऽपत्यानां द्विषतां ग्रहणं। तेनाऽतीताऽपत्यानां जमाल्यादीनामग्रहणं, भाविदत्तराज्ञः काले सर्वेषामपि सम्भावि-क्षयत्वेऽपि तदविवक्षणं च बोध्यम्। ननु नामग्राहनिरूपणं तीर्थस्य कथं हितमिति चेत्। उच्यते-स्वामिवैरिणो हि स्वामिनं प्रत्युपसर्गयितुमशक्तास्तत्सम्बन्धिजनानेवोपसर्गयन्तीत्यतः स्वामि-वैरिणस्तत्सम्बन्धिजनस्याऽवश्यं प्रतीतिविषयीकर्तव्या भवन्ति। तत्प्रतीतिं च प्रतिजनं वाग्द्वारा कर्तुमशक्तेः स्वामिपुरस्ताद् विज्ञप्तिद्वारा तन्निर्वचने सर्वेषामपि तत्सम्बन्धिनां युगपत्प्रतीति-विषयीकृता भवन्ति। तथा च 'ज्ञाता हि वैरिणो नेह प्रभवन्ती'ति लौकिकवचनात् स्वामिसम्बन्धिनस्तीर्थस्य ते वैरिणः प्रतीति-विषयीभूता उपद्रवयितुमशक्ता भवन्ति। एवं च सति तीर्थस्य हितमेव यन्नामग्राहनिरूपणं, तीर्थस्य हितं तत् शृणु-श्रवण-गोचरीकुर्विति काव्यार्थः॥

अथ स्वस्वकर्मव्युत्पन्ननामद्वारा नामग्राहं प्रसङ्गादुत्पत्ति-कालं च काव्यद्वयेनाह—

**श्रीमद्विक्रमतोऽङ्करामरजनीट्वर्षे १३९ वशाम्मुक्त्यवाक्**
**राकाङ्कोऽङ्कतिथीन्दुके ११५९ युगनभोर्के १२०४**
**स्त्रीजिनार्चाद्विषन्;**

विश्वार्केऽ१२१४म्बरपल्लवःषडनलार्के१२३६द्व्यर्द्धराकाग्रही
श्रीमच्छासनदेवतास्तुतिरिपुः खाक्षद्विचन्द्रे१२५०पुनः॥५॥
अष्टाभ्रेष्ववनौ १५०८जिनप्रतिमया स्पर्द्धी पुनः साधुभि-
र्युग्माङ्गेष्ववनौ च १५६२ सङ्करमतिर्व्योमाश्वबाणावनौ
१५७० ।
बिम्बार्चाद्विमुखो द्विवाजिशरभूवर्षे १५७२ बभूवाधमः,
सर्वेऽप्येवमिमे दशापि विदिशःस्वीयाऽऽग्रहाद् दुर्ग्रहात्॥६॥
युग्मम् ॥

श्रीमद्विक्रमतः-श्रीविक्रमनरेन्द्रकालाद् अङ्करामरजनीट्-वर्षेऽङ्कमितेऽब्दे वशामुक्त्यवाक्-स्त्रीमुक्तिनिषेधको, बभूवेति क्रियापदं सर्वत्रापि सम्बन्धनीयमित्यन्वयः। एवमग्रेप्यन्वययोजना कार्या। तत्राङ्करामरजनीशशब्दाः क्रमेण नवत्र्येकसङ्ख्या-वाचकाः। तथा च 'अङ्कानां वामतो गतिरिति' वचनात् क्रमेणाङ्कस्थापना १३९ एवंविधाङ्कमिते वर्षे, वशानां-स्त्रीणां, मुक्तौ-मुक्तिनिरूपणे न विद्यते वाग्-वाणी यस्य स वशामुक्त्य-वाक्। इदं नाम स्त्रीणां मुक्तिनिषेधकत्वेन बोटिकस्य स्वकर्मप्रभवं बोध्यम्। नग्न-नग्नाट-दिगम्बरादिप्रसिद्धनाम्नैव बोटिकः कथं नोद्दिष्टः?, इति चेत्। उच्यते-सर्वकालाध्ययनीय-स्मरणीयमङ्-गलैकभूतायामर्हत्स्तुतौ प्रातरनभिधेयेन प्रसिद्धाभिधानेन मङ्-खलिपुत्रप्रसिद्धनाम्नेव तदुच्चारो न युक्तः। श्रीहेमाचार्यकृत-

श्रीमहावीरद्वात्रिंशिकायामपि तथैव प्रयोगदर्शनात्। एवमग्रेपि बोध्यम् । अयं भावः-श्रीमहावीरनिर्वाणान्नवोत्तरषट्शतेष्वतीतेषु बोटिकदृष्टिः । उक्तं च—

'छव्वाससयेहिं नवुत्तरेहिं तइआ सिद्धिं गयस्स वीरस्स ।

तो बोडिआण दिट्ठी, रहवीरपुरे समुप्पन्ना॥१॥'त्ति । श्रीवीर-निर्वाणविक्रमसंवत्सरयोरन्तरकालः सप्तत्यधिकचतुःशतमानः । तस्य च प्रागुक्तसङ्ख्याया विश्लेषे शेषमेकं शतमेकोनचत्वारिं-शदधिकं स्थितं, तस्माद्विक्रमतस्तावता कालेन बोटिकोत्पत्तिः । स च बोटिकः प्रवचनलिङ्गाभ्यां सर्वथा निह्नवः । तन्मताकर्ष-कस्तु शिवभूतिः सहस्रमल्लाख्यापरपर्यायः प्रतीत एव ॥ १ ॥ तथाङ्कतीथीन्दुके-नवपञ्चदशैकमितवर्षे, राकाङ्कः-पूर्णिमी-यकः समुत्पन्नः । अथ तिथीन्दुके इत्यत्र कप्रत्ययो बहुव्रीहिसमास-वशाद् बोध्यः । समासगतिस्त्वेवं-अङ्काश्च तिथयश्चाङ्कति-थयस्ताभिर्युगिन्दुश्चन्द्रः सङ्ख्यावाचको यत्र संवत्सरे सोऽङ्-कतिथीन्दुकस्तस्मिन्निति । एवमग्रेपि समासरचना बोध्या । परं कप्रत्ययस्य क्वचिद्वचनात् क्वाऽप्यभावो बोध्यः । तथा चाङ्कर-चना ११५९ एवंविधाङ्कमिते वर्षे, राका-पूर्णिमा सा पाक्षिक-त्वेनाङ्कश्चिह्नं यस्य स राकाङ्कः प्रादुर्भूतः । अयं भावः-श्रीविक्रमादेकोनषष्ट्यधिकैकादशशतेष्वतीतेषु पूर्णिमीयकमतो-त्पत्तिः । तन्मताकर्षकस्तु चन्द्रप्रभाचार्यः । तन्मतोत्पत्तिनिदानं त्वेवं-जनपदप्रसिद्ध-चारित्रैकपात्र-श्रीमुनिचन्द्रसूरिक्रियमाणजिन-बिम्बप्रतिष्ठामहोत्सवध्वंसायाऽमर्षोत्कर्षाकृष्टेन सतीर्थ्य-

-चन्द्रप्रभाचार्येण श्राद्धप्रतिष्ठा प्ररूपिता । कालान्तरे च मतभेद-करणाय पूर्णिमा प्रकाशिता । ततः श्रीमुनिचन्द्रसूरिप्रभृतिसमस्तसङ्घेनाऽनेकयुक्तिभिर्बोधितोऽपि स्वाभिनिवेशमत्यजन् सङ्घबाह्यः कृतस्ततः पूर्णिमीयकमतप्रवृत्तिः । एवमौष्ट्रिकादीनामप्युत्पत्तिर्वाच्या । सर्वेषामपि निमित्तान्तरसद्भावेऽपि रागद्वेषहेतुकस्याऽभिनिवेशस्यावश्यकत्वात् शिवभूतेरिव अभिनिवेशमन्तरेण परम्परायाततीर्थत्यागस्याशक्यत्वात्, परं दिगम्बर-पूर्णिमीयकौष्ट्रिक-पाशचन्द्रा अनन्तरसङ्घनिर्गतत्वेन सङ्घबाह्याः। स्तनिक-सार्द्धपूर्णिमीयकौ तु पूर्णिमीयकमूलकत्वेन सङ्घबाह्यबाह्यौ । आगमिकस्तु पूर्णिमीयकाञ्चलिकमतद्वयमूलकत्वेन बाह्यबाह्य एव । कटुकस्तु त्रिस्तुतिकमतगृहस्थत्वेन सङ्घबाह्यातिबाह्यः । लुम्पाकस्तु लेखकमूलकत्वेनाव्यक्तनामा बोध्यः । वन्ध्यस्तु लुम्पाकनिर्गतत्वेनाव्यक्तबाह्यः इत्यादि स्वयं बोध्यम् । ननु पूर्णिमीयकमते कासाञ्चिन्पूर्णिमानां पाक्षिकत्वेन स्वीकारः, कासाञ्चिच्च चतुर्मासीत्वेनेत्यतस्तस्य राकाङ्क इति नाम न स्वकर्मप्रभवं, किन्तु सर्वासामप्यमावासीनां पाक्षिकत्वेन स्वीकारात् आमावासिक इति नाम स्वकर्मप्रभवं युक्तमिति चेत् । सत्यम्, यद्यप्येवमस्ति, तथापि लोकप्रवृत्त्यनुसारेण प्रवृत्तेर्न दोषः ॥ २ ॥ तथा युगनभोर्के-चतुःशून्यद्वादशमिते वर्षे, स्त्रीजिनाऽर्चाद्विषन्-स्त्रीजिनपूजानिषेधकृत् चामुण्डिकौष्ट्रिकापर पर्यायः खरतरः समुत्पन्नः । अयंभावः-श्रीविक्रमतश्चतुरुत्तरद्वादशशतेषु खरतरमतोत्पत्तिः, तन्मताकर्षकस्तु जिनदत्ताचार्यः । ये

केचित् खरतराणामुत्पत्तिं श्रीजिनेश्वरसूरितो वदन्ति, ते खरतराणामपत्यान्येव, न पुनः कश्चित् शास्त्रज्ञः, तथाविचारस्यानुपपत्तेः। तदनुपपत्तिजिज्ञासुना तु मत्कृतौष्ट्रिकमतोत्सूत्रप्रदीपिकाऽवलोकनीया ॥ ३ ॥ तथा विश्वार्के-चतुर्दशद्वादशमिते वर्षेऽम्बरपल्लवोऽञ्चलः समुत्पन्नः। अयं भावः-श्रीविक्रमतश्चतुर्दशाधिकद्वादशशतेषु अञ्चलमतोत्पत्तिस्तन्मताकर्षकस्तु एकाक्षो नरसिंहोपाध्यायः ॥ ४ ॥ तथा षडनलार्के-षटत्रिद्वादशमिते वर्षे द्व्यर्द्धराकाग्रही-सार्द्धपूर्णिमीयकः समुत्पन्नः। अयं भावः-श्रीविक्रमतः षट्त्रिंशदधिकद्वादशशतेषु सार्द्धपूर्णिमीयकमतोत्पत्तिः। तन्मताकर्षकस्तु सुमतिसिंहाचार्यः ॥ ५ ॥ तथा पुनः खाक्षद्विचन्द्रे-शून्यपञ्चद्व्येकमिते वर्षे, श्रीमत्शासनदेवतास्तुतिरिपुः-आगमिकः समुत्पन्नः। अयं भावः-श्रीविक्रमतः पञ्चाशदधिकद्वादशशतेषु त्रिस्तुतिकोत्पत्तिः। तन्मताकर्षकौ तु शीलगणदेवभद्राविति ॥ ६ ॥ तथाऽष्टाभ्रेष्ववनौ-अष्टशून्यपञ्चैकमिते वर्षे, पुनः जिनप्रतिमया स्पर्द्धी-जिनप्रतिमावैरी लुम्पाकः समुत्पन्नः। अयं भावः- श्रीविक्रमतोऽष्टोत्तरपञ्चदशशते 'लूंका' इति लोकोक्त्या लुम्पाकमतोत्पत्तिः। तन्मताकर्षकस्तु मतसदृशनामा लूंकाख्यो लेखको बोध्यः। वेषधारित्वं चास्य विक्रमतः सं० १५३३ वर्षे बोध्यम् ॥७॥ तथा युग्माङ्गेष्ववनौ-द्विषट्पञ्चैकमिते वर्षे, लालाघण्टान्यायेन पुनः शब्दाद्वा स्पर्द्धिशब्दस्योभयत्र सम्बन्धात् साधुभिः स्पर्द्धी-साधुवैरी यथार्थनामा कटुकः समुत्पन्नः। साधुवैरित्वं चास्य सम्प्रति साधवो

न दृष्टिपथमायान्तीति कटुकभाषया बोध्यम् । तेन वस्तुतः सर्वेषामपि साधुद्वेषित्वेऽपि तथाविधकटुकभाषाया अभावात्तेभ्यः पार्थक्यान्न नाम्ना साङ्कर्यमिति । अयं भावः-श्रीविक्रमतो द्वाषष्ट्यधिकपञ्चदशशतेषु कटुकमतोत्पत्तिः । तन्मताकर्षकस्तु कटुकनामा गृहस्थः ॥८॥ तथा व्योमाश्वबाणावनौ-शून्यसप्तपञ्चैकमिते वर्षे, सङ्करमतिर्वीजामती इति लोकरूढ्या वन्ध्यमतिः समुत्पन्नः । अयं भावः-सप्तत्यधिकपञ्चदशशतेषु वीजामतोत्पत्तिः । तन्मताकर्षकस्तु लुम्पाकमतान्निर्गतो वीजुनामा वेषधरः ॥९॥ तथा द्विवाजिशरभूमिते वर्षे-द्विसप्तपञ्चैकमिते वर्षे, बिम्बार्चाद् विमुखः-बिम्बार्चादुर्जनः । दुर्जनत्वं चास्य जिनप्रतिमापूजाङ्गीकारेऽपि सावद्यत्वधिया साधूपदेशानङ्गीकारात् । अयं भावः-श्रीविक्रमतो द्विसप्तत्यधिकपञ्चदशशतेषु पाशमतोत्पत्तिः । तन्मताकर्षकस्तु नागपुरीयतपागणान्निर्गतः पाशचन्द्रनामोपाध्यायो बोध्यः ॥१०॥ अथ प्रागुक्ता दशाप्यमी अन्योन्यं कीदृग् स्वभावा इति दर्शयति-सर्वेऽपीमे प्रागुक्ता दिगम्बरादिपाशचन्द्रान्ता दशापि-दशसङ्ख्याका अपि, कीदृशा ? विदिशः-प्रवृत्तिप्ररूपणाभ्यामन्योन्यं विरुद्धा दिशो-गमनमार्गा येषां ते विदिशः, परस्परं भिन्नमार्गप्रवर्तका अन्योन्यं विवादाऽऽपन्नमार्गप्रकाशका अन्योन्यं स्पर्द्धिन इतियावत् । अत एवान्योन्यं विवादे सति न्यायप्राप्त्यभिलाषेण सङ्घं प्रत्यागताः सङ्घेन सर्वेऽप्यन्यायिन एव कर्तव्याः । उक्तं च—

वादिनोऽपि मिथो यूयं, कुपक्षाः सङ्घमागताः ।

सर्वेऽप्यन्यायिनः यूयं, तस्करा इव भूपति" मिति। स्पर्द्धिनः कस्मात्?, स्वीयाऽऽग्रहात्, स्वकीयो य आग्रहः-कदाग्रहोऽसत्यमपि स्वोपात्तं न त्यक्ष्यामीत्येवंरूपेणाभिनिवेशमिथ्यात्वरूपस्तस्मात्। किम्भूतात्? दुर्ग्रहात् दुर्ग्रह इव दुर्ग्रहस्तस्मात्। अन्येऽपि ये दुर्ग्रहग्रस्तास्ते यत्तत्प्रलापिनो भवन्ति; तथाऽमी अपीतिभावः। नन्वमीषां स्वकर्मप्रभवनामकत्वं तावत्तदपत्यानां विद्यमानत्वेन प्रतीतमेव, परं मताऽऽकर्षककालादि कुतो ज्ञातमिति चेत्। उच्यते-दिगम्बरमताकर्षकः शिवभूतिस्तु श्रीआवश्यकनिर्युक्त्यादेरवगतः। उत्पत्तिकालोऽपि तत एव। पूर्णिमीयकादिपञ्चकस्य तु चन्द्रप्रभ-जिनदत्त-नरसिंह-सुमतिसिंह-शीलगणनामानः क्रमेण मताऽऽकर्षका उत्सूत्रकन्दकुद्दालादिभ्योऽवगताः। कालोऽप्युक्तलक्षणस्तत एव। लुम्पाकादिचतुष्कस्य तु मतसदृशनामानो मताकर्षकाः स्वस्वमतेभ्य एवावगताः। कालस्तु आधुनिकत्वेन सर्वजनप्रतीत एव। अल्पकालान्तरितत्वेनैकस्मादपि वृद्धात् श्रूयमाणत्वात्। आदिशब्दान्निह्नवत्वं। तच्चागमविरुद्धप्ररूपणादर्शनेनाऽऽगमादेवाऽवगतं। आगमविरुद्धप्ररूपणा तु अस्यामेव स्तुतौ भगवत्पुरो विज्ञप्तिद्वारा प्रादुष्करिष्यते। बहुसम्मताऽऽगमदर्शनप्रतीतिकर्तॄणां तु श्रीमलयगिरिविरचितश्रीआवश्यकनिर्युक्तिवृत्तिरेव शरणम्। यतस्तत्रोपधानादि-तपोनिषेधकाः सर्वेऽपि निह्नवा एवोक्ताः। उक्तं च तत्रैव—

"बहुरय-पएस-अव्वत्त-समुच्छ-दुग-तिग अबद्धिआ चेव।

सत्तेए निह्नगा खलु, तित्थंमि उ वद्धमाणस्स”त्ति। आवश्यकनिर्युक्तिगाथावृत्त्येकदेशो, यथा-सप्तैतेऽनन्तरोदिताः। उपलक्षणमेतत्। तेनोपधानाद्यपलापिनोऽपि ‘निह्नगा खलु’त्ति तीर्थकरभाषितमर्थमभिनिवेशवशात् निह्नुवतेऽपलपन्तीति निह्नवाः। एते च मिथ्यादृष्टयः सूत्रोक्तार्थापलपनात्। उक्तं च—सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः।

मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितम् ॥ १ ॥ खल्विति विशेषणे। किं विशिनष्टि? एते साक्षादुपात्ता उपलक्षणसूचिताश्च देशविसंवादिनो द्रव्यलिङ्गेनाभेदिनो निह्नवाः। बोटिकास्तु वक्ष्यमाणाः सर्वविसंवादिनो भिन्नाः निह्नवा इति, तीर्थे वर्धमानस्ये’ति श्रीमलयगिरिवृत्तिः पत्र २१२ द्वितीयखण्डे। उक्तनामानश्चामी अप्युपधानादितपोनिषेधका एव। तस्मान्निह्नवा इति। यद्यपि खरतरस्योपधाननिषेधककत्वं नाममात्रेण नास्ति, तथाप्यादिशब्दसूचितत्रिचतुरादिद्रव्योपेताऽऽचाम्लादितपोनिषेधकत्वेन सोप्युपात्तो द्रष्टव्यः। एतेन प्रवचनोक्ता सप्तैव निह्नवा भवन्ति, नाधिका इति प्रलपन्तोऽपि परास्ताः, अधिकानामप्यागमे श्रवणात्। तस्माज्जमाल्यादिनिह्नवसप्तकनिदर्शनं भाविनिह्नवानां दृष्टान्तायैव बोध्यम्। उक्तं च—

“आयरिअपरंपरएण आगयं जो उ आणुपुव्वीए।

कोवेइ छेअवाई, जमालिनासं स नासिहि ॥ १ ॥ त्ति सूर्यप्रज्ञप्तिनिर्युक्तौ। तथा नामग्राहेणाप्यधिकनिर्वचनं यथा

दिगम्बरस्यावश्यकनिर्युक्तौ, पूर्णिमीयकादिपञ्चकस्य तूत्सूत्रकन्द-कुद्दालादौ, शेषाणां तु ततोऽप्यधमत्वात् स्फुटमेव। उक्तार्थ-सङ्ग्राहककाव्यद्वयं त्वेवं—

"श्रीमद्विक्रमतोऽङ्करामरजनीशाब्दे १३९ भवद् बोटिको भूतिर्नामशिवान्नवेषुगिरिशे ११५९ चन्द्रप्रभः पौर्णिमः। वेदाभ्रारुण १२०४ औष्ट्रिको जिनपदाद् दत्ताह्वयाद्योऽभवत्, विश्वार्के १२१४ नरसिंहतोऽञ्चलमतं राकाङ्किताम्निर्गतम् ॥ सिंहात्प्राक् सुमतेः षडग्निकिरणे १२३६ ऽब्दे सार्धराकाङ्कितं, जातं त्रिस्तुतिकं च शीलगणतो व्योमेन्द्रियार्के १२५० कलौ। लुम्पाको वसुखेन्द्रियेन्दुषु १५०७ कटुर्द्वाषष्टितिथ्यब्दके, १५६२ वन्ध्यः खाद्रितिथौ १५७० तथा च दशमः पाशोऽक्षिसप्ताक्षकौ" १५७२ ॥ २ ॥

शिवाद् भूतिः शिवभूतिः, जिनपदाद् दत्ताह्वयाद् जिनदत्त-नाम्नः, प्राग्-पूर्वं सुमतिर्यस्यैवंविधात् सिंहात् सुमतिसिंहा-दित्यर्थः ॥

अथ दशानामप्यमीषां कुविकल्पनाविष्करणपुरस्सरं तन्निराचिकीर्षुर्यथोद्देशं निर्देशमिति न्यायात् प्रथमं काव्यद्वयेन प्रथममुद्दिष्टस्य दिगम्बरस्याभिप्रायमाविष्कृत्य तन्निराकुर्वन्नाह—

स्त्रीनिर्वाणनिराकृतौ च सिचयावृत्यङ्गतालिङ्गता,
द्वारं तत्कलकेवलानुदयता चेति प्रतिज्ञावतः।
तस्मादेव मतिश्रुते कथमिति स्यातां सवस्त्रस्य मे,
प्रज्ञाशून्यहृदस्ततस्तदरुचेर्मानान्न ते मान्यता ॥७॥

व्या०—हे स्वामिन् ! स्त्रीनिर्वाणनिराकृतौ-स्त्रीमुक्त्यभावे, सिचयाऽऽवृत्यङ्गतालिङ्गता-वस्त्रावृताङ्गत्वस्य लिङ्गत्वमिति प्रतिज्ञावतो दिगम्बरस्य तस्मादेव-उक्तहेतोरेव सवस्त्रस्य मे मतिश्रुते कथं स्यातामिति प्रज्ञाशून्यहृदस्ततः स्त्रीदृष्टान्ततः तदरुचेः-केवलज्ञानाश्रद्धानस्य मानाद्-अनुमानात्ते-तव, मान्यता नास्तीत्यन्वयः। तत्र मान्यतास्वीकारस्तव नास्ति। कोऽर्थः ? सर्वज्ञत्वेन त्वं तस्याभिमतो नासि, स्वाऽऽज्ञावर्तित्वेन नभ्राटो वा तवाभिमतो नास्तीत्यर्थः। अयं भावः-यथाऽऽत्मप्रदेशाऽसम्बद्धपुद्गलात्मकवस्त्रेणाऽऽवृतस्त्रीषु केवलज्ञानाभावः, तथा पृथिव्यादिसम्पर्कवत्सु पुंस्वपि तदभाव एव, उभयत्राप्यात्मप्रदेशाऽसम्बद्धत्वेनाऽऽवरणे विशेषाभावात्। प्रकरणात् प्राप्तस्य दिगम्बरस्य। किम्भूतस्य ? प्रज्ञाशून्यहृदः, बुद्धिरहितहृदयत्वं चास्य तस्मादेव-वस्त्रावृताङ्गत्वादेव ज्ञानत्वेन केवलज्ञानसाम्यात् सवस्त्रस्य मे-मम, मतिश्रुते-मतिश्रुतज्ञाने कथं स्यातामित्यादिविचारशून्यचित्तत्वात्। पुनः किंलक्षणस्य ? प्रतिज्ञावतः, प्रतिज्ञा च स्त्रीनिर्वाणनिराकृतौ सिचयाऽऽवृत्यङ्गतालिङ्गता, सिचयेन-वस्त्रेणावृतिरावरणं यस्यैवंविधमङ्गं यस्य तस्य-भावस्तत्ता तस्या लिङ्गता-हेतुत्वं सिचयावृत्यङ्गत्वलिङ्गमित्यर्थः। च-पुनस्तत्र द्वारमवान्तरव्यापारः, किं ?, तत्कलकेवलानुदयता, तेन-वस्त्रेण, कलो-युक्तो वस्त्रेण वा कला शोभा यस्य स तत्कलः, परिहितवस्त्र इत्यर्थः। तस्मिन् मनुष्ये केवलस्य-केवलज्ञानस्यानुदयताऽसद्भावता। अयं भावः-वस्त्राऽऽवृतानां केवलज्ञाना-

नुत्पत्तिस्तदनुत्पत्तौ च कुतो मोक्षावाप्तिरिति तात्पर्यम्। प्रथमचकारस्तथाविधचित्तासामर्थ्यादिहेत्वन्तरसूचक इत्यक्षरार्थः।

भावार्थस्त्वयं-दिगम्बरमते स्त्रीणां मुक्तिनिषेधस्तत्र सवस्त्रत्वादयो हि हेतवोऽवान्तरव्यापारस्तु केवलज्ञानाभाव एवेत्यतः स्त्रीनिर्वाणनिराकृतौ चेत्यादि पूर्वार्धम्। प्रयोगस्तु-स्त्रियो न मुक्तिभाजो, वस्त्रावृतत्वात् देशविरतिवदिति। तथा द्वारीभूतकेवलज्ञानाभावोऽप्यनेनैव साध्यः। प्रयोगो यथा-स्त्रीणां केवलज्ञानं न भवति, वस्त्रावृतत्वादित्यादि। यद्वा वस्त्रावृतत्वेन हेतुना केवलज्ञानाभावं प्रसाध्य सिद्धेनैव केवलज्ञानाभावरूपहेतुना मुक्त्यभावः साध्यः। प्रयोगो यथा-तत्र केवलज्ञानाभावसाधकमनुमानं प्राग्वत्। स्त्रियो न मुक्तिभाजः, केवलज्ञानाभावात् सुरवदिति। अथोत्तरार्द्धेन दिगम्बरस्यातिप्रसङ्गाऽज्ञानमाह-'तस्मादेवे'त्यादि। अत्र मतिश्रुतयोरुपलक्षणत्वादवध्यादिपरिग्रहः। प्रयोगो यथा-दिगम्बरमते सवस्त्रस्य मत्यादिज्ञानान्यपि न भवेयुः, सवस्त्रत्वात् सवस्त्रमिथ्यात्विमनुष्यवदिति। यद्वा मत्यादि ज्ञानचतुष्टयं सवस्त्रस्य न सम्भवेत्, ज्ञानत्वात् केवलज्ञानवदिति। किमुक्तं भवति-आत्मप्रदेशाऽसम्बद्धपुद्गलात्मकमपि वस्त्रं यद्यात्मगुणकेवलज्ञानावरणं भवितुमर्हति, तर्हि मत्यादिज्ञानानामप्यावरणं भवतु। उभयत्रापि विशेषाभावात्। लोकेऽपि यद्यस्यावरणं तत्तज्जातीयं वा तज्जातीयानामप्यावरणमेव दृष्टं। यथा भित्त्यादिकं सूर्यालोकस्यावरणं तथाऽऽलोकत्वेन साम्यान्निशारत्न-रत्नप्रदीपाद्यालोकस्याप्यावरणमेव। अत

एवात्मप्रदेशाऽसम्बद्धवस्त्रसम्पर्कवत्पृथिव्यादिसम्पर्कोऽपि केवलज्ञानावरणं भवत्वित्यभिप्रायेणानन्तरमस्मिन्नेव काव्ये पुंस्यपि केवलज्ञानाभावः साधयिष्यते। किञ्च-यदि शरीरे वस्त्रसम्पर्कः समुत्पद्यमानकेवलज्ञानस्य प्रतिबन्धकस्तर्हि उत्पन्नस्यापि केवलस्य विनाशकोऽपि भवन् केन निवार्यः ?। यथा मतिश्रुताद्यावरणोदय उत्पद्यमानस्य मत्यादिज्ञानस्य प्रतिबन्धकस्तथोत्पन्नस्यापि मत्यादेर्विनाशकोऽपि दृष्टः। यच्च सवस्त्रत्वेन हेतुना केवलज्ञानाभावे साध्ये हेतोरसिद्धत्वादिदोषाऽऽकुलत्वेऽपि प्रतिबन्द्याऽतिप्रसङ्गोद्भावनं तत्प्रायोऽल्पधियोऽपि प्रतीतिविषयीभवनार्थमितिबोध्यम्।

ननु हेतोरसिद्धत्वोद्भावना कथमिति चेत्। उच्यते-तत्र दिगम्बरं प्रत्येवं वाच्यं-भो नग्नाट ! पक्षत्वेनाभिमताः स्त्रियः किमसंयतिन्यः संयतिन्यो वा ?। आद्ये, सिद्धसाधनं। अस्माकमपि तथैवाभिमतत्वात्। नहि वयमप्यसंयतस्त्रीणां मुक्तिसद्भावं वदामः। द्वितीयेऽपि संयतस्त्रीणां वस्त्रं किं केवलज्ञानावरणत्वात् उत परिग्रहरूपत्वेनासंयमहेतुत्वाद्वा मुक्तिप्रतिबन्धकं ? न तावदाद्योऽनवद्यः, वस्त्रस्यात्मप्रदेशाऽसम्बद्धपुद्गलात्मकत्वेनाऽऽत्मगुणकेवलज्ञानावरणत्वाऽसम्भवादित्यादियुक्त्युद्भावनेनानन्तरमेव निराकृतत्वात्। किञ्च-सवस्त्रत्वं तावत् स्त्रीषु कादाचित्कं सार्वदिकं वा ?। प्रथमे तावत्पुंस्यपि कादाचित्कसवस्त्रत्वेन हेतुना केवलज्ञानाभावः साध्यः, अन्यथा पुंस्येव व्यभिचारात्। यद्वा कादाचित्कसवस्त्रत्वेन हेतुना पुंदृष्टान्तेन स्त्रीष्वपि केवलज्ञान-

सद्भावः साध्यः। तथा च बाध एव, सत्प्रतिपक्षता वा। द्वितीये पुनः स्वरूपासिद्ध एव हेतुः, पक्षे तस्याऽवर्तनात्। नहि स्त्रीषु सवस्त्रत्वं सार्वदिकं, बाल्यावस्थादौ स्नानाद्यवसरविशेषे च स्त्रीषु वस्त्रराहित्यं सर्वजनप्रतीतमेव। तस्माच्च वस्त्राभाववति मनुष्ये केवलज्ञानोत्पत्तिस्वीकारेऽवस्थाविशेषादौ स्त्रीष्वपि वस्त्रराहित्यात्केवलोत्पत्तिः केन वारयितुं शक्या ?। अथ परिग्रहरूपत्वेनाऽसंयमहेतुत्वादिति द्वितीयविकल्पे तु संयतस्त्रियो न सिद्धिमधिरोहन्ति, वस्त्रादिपरिग्रहोपेतत्वाद्देशविरतवदिति प्रयोगः सम्पन्नः। तथा च हेतुः स्वरूपासिद्ध एव। नहि संयतस्त्रीणां वस्त्रादिः परिग्रहे भवितुमर्हति, तासां वस्त्रादेः संयममात्ररक्षार्थमेव धारणात्। उक्तं चागमे—

"जंपि वत्थं च पायं वा, कंबलं पायपुछणं।
तंपि संजमलज्जट्ठा, धारिंति परिहरंति अ ॥ १ ॥
न सो परिग्गहो वुत्तो, नायपुत्तेण ताइणा।
मुच्छा परिग्गहो वुत्तो, इअ वुत्तं महेसिणा" ॥ २ ॥

इति। न च स्वनिश्रितत्वेन वस्त्रादौ मूर्च्छा भवत्येवेति शङ्कनीयं। स्वशरीरशिष्यादावपि तथात्वेन मूर्च्छाप्रसङ्गात् कस्यापि मोक्षावाप्तिर्न स्यात्।

किञ्च-भो क्षपणक! अबलानामम्बरपरिभोगः किं तीर्थकरोपदिष्टः ? तव मताऽऽकर्षकशिवभूतिप्ररूपितो वा ? अशक्यपरित्यागकृतो वा ?। आद्ये तावदवश्यं वस्त्राऽऽवृतानामेव मुक्तिः सिद्धा। यतः 'प्रेक्षावतां हि प्रवृत्तिः स्वार्थकारुण्याभ्यां व्याप्ते'ति

वचनात् परमप्रेक्षावत्त्वेन परमकारुण्यभाजो हि भगवन्तो नाऽबलानां मुक्त्युपघातकमुपदिशन्ति। तथात्वे ह्यास्तां तावदन्यल्लोकनिन्द्या अपि भगवन्तो भवेयुः। उक्तं च लौकिके - "बालस्त्रीव्रतिघातकाः स्युरधमाधीशाः श्वपाका इवे"त्यादि। द्वितीये तु ताभिः शिवभूतेः किमपराद्धं?, येन पापात्मनाऽबलानां वस्त्रदानेन मुक्त्युपघातो विहितः। न ह्यान्तरवैरमन्तरेण कश्चित्तथाविधोत्कृष्टार्थसम्पदागमनिवारको भवति।

ननु भोः! शिवभूतिना वस्त्रदानं स्त्रीणां ब्रह्मचर्यादिरक्षार्थमेव विहितमिति चेत्। चिरं जीव, येनाऽऽयातोऽसि स्वयमेव मदुक्तमार्गेण। यतो यद् ब्रह्मचर्यादिपालनहेतुस्तत्संयमं प्रति हेतुरेवेत्यतः सिद्धं प्रत्युत निष्परिग्रहताहेतुर्वस्त्रपात्रादि, तत्कुतोऽसंयमहेतुः, कुतो वा मोक्षोपघातकमिति त्वयापि सवस्त्रस्य मुक्तिर्व्यवस्थापिता। एवं तृतीयेप्यशक्यपरित्यागः किं शरीरावयवसहोत्पन्नत्वात् कर्णवेधवच्छरीरसम्बद्धकृतविकारत्वाद्वा?। उभयथापि प्रत्यक्षबाधः, बाल्यावस्थायामिवान्यावस्थास्वपि स्नानाद्यवसरविशेषे वस्त्राराहित्यस्य सर्वजनप्रतीतत्वात्। अथ चकारसूचितहेतुप्रयोगो यथा-स्त्रियो न मुक्तिभाजः, तथाविधचित्ताऽसामर्थ्यात् नपुंसकवदिति। तत्र तादृशसामर्थ्याभावस्तासां किं गतिस्वाभाव्यात् जातिस्वाभाव्यात् उत संहननादिसामग्र्यभावात्पुरुषेभ्यो हीनत्वाद्वा?। न तावदाद्यो, मनुष्यमात्रस्यापि मोक्षानाप्तिप्रसक्तेः। तच्च तवाप्यनिष्टमेव। द्वितीये, का जातिः? पञ्चेन्द्रियत्वं स्त्रीत्वं वा। आद्येऽनन्तरोक्तवत्तवा-

ष्यनिष्टं। द्वितीये, स्त्रीजातेस्तथाविधचित्तासामर्थ्ये किं प्रमाणं ? प्रत्यक्षं परोक्षं वा। न तावत्प्रत्यक्षं, तदर्थावबोधरूपस्य प्रत्यक्षस्य तवासम्भवात्। द्वितीये त्वनुमानागमौ वा ?। न तावदनुमानं, तथाविधसाध्यसाधकहेतोरदर्शनात्। न च सप्तमनरकपृथिवीगमनासामर्थ्यमेव तत्र हेतुरिति वाच्यं, तस्य तीर्थकरबलदेवादौ व्यभिचारात्। तेषां तत्र गमनसामर्थ्याभावेऽपि मुक्तिगमनसामर्थ्यसद्भावात्। किञ्च—नहि मुक्तिगमनं प्रत्यधोगतिगमनसामर्थ्यं हेतुः, मत्स्यादीनामपि मुक्तिगमनसामर्थ्यप्रसक्तेः। तेषामधोगतिगमनसामर्थ्यसद्भावात्। नाप्यागमः, प्रत्युत मुक्तेः प्रतिपादनान्निषेधवचनस्याऽऽगमबाधितत्वात्। आगमो यथा— "समणस्स भगवओ महावीरस्स सत्त अंतेवासीसयाइं सिद्धाइं जाव सव्वदुक्खप्पहीणाइं चउदस अज्जिआसयाइं सिद्धाइं ति एवं संहननादिसामग्र्यभावलक्षणोऽपि हेतुरागमबाधितत्वेन स्वसाध्यं साधयितुमसमर्थ एव। आगमबाधितत्वं च सिद्धिसिद्धौ सिद्धमेव। न हि संहननादिसामग्र्यभावे मुक्तिप्राप्तिः। एवं पुरुषेभ्यो हीनत्वादितिहेतुर्न समीचीनः, यतः पुरुषेभ्य इत्यत्र सर्वपुरुषेभ्यः कतिचित्पुरुषेभ्यो वा ?। नाद्यः, स्वरूपासिद्धेः नहि त्वदीयमतवासितव्रतिन्योऽपि चाण्डालादिपुरुषेभ्यो हीनतया त्वया व्यपदिश्यन्ते। द्वितीये, गणधरादीनामपि मुक्त्यवाप्तिर्न स्यात्। तेषां तीर्थकरपुरुषेभ्यो हीनत्वादित्यादि। अथाऽऽशाम्बरस्यातिप्रसङ्गाऽज्ञानमुद्भाव्य स्त्रीदृष्टान्तत एव पुंस्वपि केवलज्ञानाऽश्रद्धानानुमानादित्यत्रानुमानप्रयोगो यथा—

पुमांसो न केवलज्ञानभाजो, बाह्यपुद्गलसम्पर्कात् वस्त्रावृतस्त्रीवदित्यनुमानेन पुंस्वपि केवलज्ञानाऽश्रद्धानसिद्धौ सिद्धा सर्वज्ञत्वेन स्वभक्तत्वेन वा भगवदमान्यता दिगम्बरस्य। अयं भावः-सर्वज्ञत्वेन भगवान् दिगम्बरस्य नाभिमतो, दिगम्बरो वा स्वभक्तत्वेन भगवतो नाभिमत इति।

ननु सर्वज्ञो भगवानित्येवंरूपवचसा केवलज्ञानाङ्गीकारे सत्यपि कथं तदश्रद्धानानुमानमिति चेत्। उच्यते-आस्तां तावत्केवलज्ञानं, प्रवचनापलापिनां प्रवचनमात्रस्यापि वचोमात्रेणैवाङ्गीकारो, न श्रद्धानेन, तेषां स्वकल्पितमतानुसारेणैव प्रवचनप्रवर्तकत्वात्। तस्माद्वचोमात्रेण तदङ्गीकारो न सत्यतयाऽङ्गीकर्तव्यः। अन्यथा "चत्तारि कुंभा पं० तं० महुकुंभे नाममेगे महुपिहाणे, महुकुं० विसपिहाणे"इत्यादि। एवमेव 'चत्तारि पुरिसजाया पं० तं० महु०'इत्यादिस्थानाङ्गोक्तचतुर्भङ्गीरचनाया वैयर्थ्यमापद्येत। अत एवात्रैव प्रतिज्ञायां 'वाचाज्ञां प्रतिपद्य ये त्वदरयस्तानेव वाग्गोचरीकुर्वे' इत्युक्तमिति काव्यार्थः॥

अथ दिगम्बरस्य विरोधाद्यज्ञानमुद्भावयन्नेव तच्चेष्टितमुपहसन्नाह—

मन्वानोऽपि जिनेशि तैजसतनुं नाहारहेतुस्थितिं,
धर्माराधनसाधनान्यपि मुधा बुद्ध्या परित्याजयन्।
देहं प्रत्युत पालयन्निति विसंवादाद्यवित्सर्ववित्!
निर्वाच्यं च निदर्शयन् कुलवधूस्तेऽरिर्वरं चेष्टते॥८॥

व्याख्या०—हे सर्ववित् स्वामिन्! विसंवादाद्यवित् ते-तवारिर्दिगम्बरः, कुलवधूः-कुलस्त्रीः प्रति निर्वाच्यं-जनप्रसिद्ध-नाम्ना वाग्गोचरीकर्तुमशक्यं लिङ्गोपस्थादिकं निदर्शयन् वरं चेष्टते-सुन्दरचेष्टां करोतीत्युपहास्यसूचकक्रियापदमित्यन्वयः। विसंवादाद्यवित्त्वं-पूर्वापरविरोधाद्यज्ञानित्वं, तत्कथमित्यमुना-प्रकारेणेतीति किं? जिनेशि-केवलिनि, तैजसतनुं-तैजसशरीरं, मन्वानोऽपि-स्वीकुर्वाणोऽपि, अपिशब्दो विरोधोद्भावनेऽग्रे लौकिकविरोधोद्भावनेऽपि योज्यः। अन्तराऽपिशब्दस्तु आदि-शब्दसूचितप्रतिबन्ध्या उद्भावको। नाहारहेतुस्थितिं। आहाररूपो यो हेतुस्तैजसशरीरं प्रति कारणं तस्य स्थितिं-विधिं न मन्वानः। तथा मुधा-यथार्थवस्त्रविषयकत्वेनेप्सितफलासाधकत्वाद्विफला या बुद्धिस्तया धर्माराधनसाधनानि धर्मसाधनानि-रजोहरण-मुखवस्त्रिकादीनि चतुर्दशोपकरणानि, तानि परित्याजयन्नपि-परिहारयन्नपि देहं प्रत्युत पालयन्-अलं तत्त्यागोपदेशेन देहं-शरीरं धर्मसाधनबुद्ध्या पालयन्नित्यक्षरार्थः।

भावार्थस्त्वयं-कार्यं हि परिणामिकारणमभिगृह्य वाऽवतिष्ठते। तच्च परिणामिकारणं त्रिधा-अचिरस्थायि, चिरस्थायि, सदा-स्थायि चेति। तत्राऽचिरस्थायि परिणामिकारणं तावत्तरु-तन्वादौ नीरान्नादिकं, चिरस्थायि पुनर्घटपटादौ मृत्पिण्ड-तन्त्वादिकं, सदास्थायि तु ज्ञानाऽवकाशादौ आत्माऽऽका-शादिकम्

उक्तंच—"कार्यं तिष्ठेदभिगृह्य, त्रिधोपादानकारणम।

तरौ नीरमिवाङ्गेऽन्न-मचिरस्थायि कारणम् ॥१॥
मृत्पिण्डाद्यं घटादौ यत्तच्चिरस्थायि कारणम् ।
आत्मादिकं यद् ज्ञानादौ, तत्सदास्थायि कारणम् ॥२॥

गुरुतत्त्वप्रदीपे । तथा च बाह्याग्नेरिवाऽऽहाराविनाभावितैजसशरीरस्याङ्गीकारे परिणामिकारणताऽऽपन्नमन्नमवश्यमङ्गीकर्तव्यमेव । तच्च नग्नाटेन नाङ्गीकृतम् । अतो विरोधाऽज्ञानमेव तस्य । न च केवलज्ञानमाहात्म्यान्निराहारित्वं केवलिन इति कल्पनीयं । एवमपि कल्पेत, यदि मतिश्रुतादिज्ञानवतामज्ञानिभ्यः क्षुधाया हीनत्वं दृश्येत । तच्च न दृश्यते, प्रत्युत कतिचिदज्ञानिभ्योऽपि क्षुधायाः प्राबल्यदर्शनात् । किञ्च-केवलिनो निराहारित्वे कुमारावस्थोत्पन्नकेवलस्यानगारस्याऽऽहाराभावे शरीरवृद्ध्यभावेन बाल्यावस्थमेव शरीरं भवेत्, न चैतत्सम्भवति । यतः पञ्चपञ्चाशत्सहस्रवर्षायुष्कस्य श्रीमल्लिनाथस्य वर्षशतेऽतिक्रान्ते केवलोत्पत्तावपि शरीरमानं तु तत्कालसम्भवि धनुषां पञ्चविंशतिरेवोक्तम् । किञ्च-केवलिनो वेदनीयोदयसद्भावादसातोदयहेतुका हि क्षुधा कथं न सम्भवतीत्यप्यालोच्यं । न चैतद्युक्तिमात्रेणैव केवलिन आहारसिद्धिः । आगमेऽपि प्रतिपादनात् । उक्तं च—

"आहारगाणं भंते ! जीवा जहा सकसाई नवरं केवलणाणाणंपि" भग०श०८,उ०२ [ ३२१ ] तथा "एगविहबंधगस्स णं भंते ! सजोगिभवत्थकेवलिस्स कतिपरीसहा पं० ? गोअमा ! एकारस परीसहा पं०, णव पुण वेदेति । भग०श०८, उ०८ [ ३४३ ] ते

चैकादश इमे-क्षुत्पिपासा-शीतोष्ण-दंश-चर्या-शय्या-वध-रोग-तृणस्पर्श-मला इति। उक्तं च—

"पंचेव आणुपुव्वी चरिआ सिज्जा वहे य रोगे अ। तणफास जल्लमेव य इक्कारस वेअणिज्जंमि"॥त्ति। तथा सम्भावित-ममताबुद्धिकल्पनया धर्मसाधनीभूतान्यपि रजोहरणमुखवस्त्रि-कादीनि चतुर्दशोपकरणानि त्याजितवान्। तथा तदन्तर्गतं शरीरमपि न त्याजितवानित्येतावदेव न, किन्तु प्रत्युत धर्म-साधनमिदं शरीरमिति बुद्ध्याऽन्नपानीयकमण्डलुसद्दरिकाद्यने-कोपचारैः पालयन् नग्नाटः परित्यक्तवस्त्रपात्रादिस्थाने वह्न्य-म्बुकुण्डिकादिस्वीकारेण प्रतिज्ञापर्वतप्रच्युतोऽपि वराको द्विधा-राप्रतिबन्दीतरवारिहतो हतस्यापि हननमिति न्यायमापन्नो बोध्यः। प्रतिबन्दी यथा-यदि शरीरस्वीकारः, कथं न वस्त्रपा-त्रादेरपि, धर्मसाधनत्वेनोभयत्राविशेषात्।

किञ्च-केवलं शरीरं न धर्मसाधनं भवितुमर्हति, सहकारि-विकलस्य कारणस्य फलं प्रति वन्ध्यत्वेनाकारणत्वात्। एवमपि यदि वस्त्रपात्रादित्यागः, कथं न शरीरस्यापि ?। शरीरोपष्टम्भ-कधिया वह्न्यम्बुकुण्डिकादिस्वीकारेऽपि सुतरां प्रतिबन्दी, सा तु सुबोधैव।

किञ्च-सकलजगज्जन्तुहितहेतुत्वेन जिनोपदिष्टेभ्यो रजोह-रणमुखवस्त्रिकाद्युपकरणेभ्यस्त्रस्तस्य नग्नाटस्य त्रसाद्यनेकजन्तू-पघातकत्वे जिनपतिप्रतिषिद्धानां वह्न्यम्बुकुण्डिकाछात्रतृणपटा-दीनामासेवने निर्भाग्यस्य जिजीविषोः पीयूषपानपरित्यागाद्वि-

षपानमितिन्यायः सम्पन्नः। न चैवं वस्त्रादिवत् सुवर्णाद्यपि धारणीयमितिवाच्यं, तस्य सर्वविरतेः सिद्धिसाधनत्वेन जिनानुपदिष्टत्वात्। न च तथा वस्त्रपात्रादिकं, तस्य सिद्धिसाधनसाधुशरीरोपष्टम्भकमात्रस्याऽन्नपानीयादिवज्जिनोपदिष्टत्वात्। उक्तं चागमे-"जंपि वत्थं च पायं चे"त्यादि। तथा यदवाच्यं लिङ्गोपस्थादि, तन्न निदर्शनार्हं। यच्च निदर्शनार्हं हस्तपादादि, तन्नावाच्यमिति सकललोकप्रसिद्धोऽपि विरोधस्तस्याप्यज्ञता। 'निर्वाच्यं च निदर्शयन्नि'ति विशेषणेन निर्दिष्टः। किञ्च-म्लेच्छादिकुलविशेषमासाद्याऽवाच्यमपि लिङ्गादिकं वाच्यं दृष्टं, परं निदर्शनीयाऽर्हतया सम्मतं तु दिगम्बरस्यैव दृष्टम्। अतो म्लेच्छादिभ्योप्यस्याविवेकित्वमपि सूचितं बोध्यमिति काव्यार्थः। इति गतो दिगम्बरः।

अथ क्रमागतस्य पूर्णिमीयकस्य काव्यद्वयेनाभिप्रायोद्घाटनपूर्वकं निराचिकीर्षुराद्यकाव्यमाह—

**पक्षः पञ्चदशीमवाप्य सकलीस्यात्तत्र तत्पाक्षिकं,**
**युक्तं चेति विकल्प्य कल्पनपरः कुह्वादिकक्षाश्रितः।**
**ही सांवत्सरिकादिवज्जिनपते! सङ्केतमुन्मूलयन्,**
**भूतेष्टादिन एव पाक्षिकरवस्याऽरातिरेषः स्फुटम्॥६॥**

व्या०—हे जिनपते! सांवत्सरिकादिवत्-युगप्रधानश्रीकालिकाचार्यात्परतोऽर्वाक् क्रमेण भाद्रपदसितपञ्चम्यां चतुर्थ्यां च तद्वाचकसांवत्सरिकशब्दवत्, आदिशब्दात् क्रियाविशेषवाचका

आवश्यकादयः शब्दा ग्राह्याः। तद्वच्च भूतेष्टादिन एव-चतुर्दशी-दिन एव पाक्षिकशब्दसङ्केतं-चतुर्दशीदिनपाक्षिकशब्दयोर्वाच्य-वाचकभावलक्षणमनादिसिद्धं त्वदुपदिष्टं चोन्मूलयन्-पाक्षिक-शब्देन चतुर्दशी न वाच्येति दुर्वचसा निर्मूलीकुर्वन्नपलपन्निति-यावत्। ही खेदे। एषोऽध्यक्षसिद्धः पूर्णिमीयकोऽरातिर्विज्ञप्ति-स्तुत्यधिकारात्तव वैरी स्फुटं यथा स्यात्तथा वर्तत इत्यन्वयः। तत्र-चतुर्दश्यां पाक्षिकशब्दस्य सङ्केतमुन्मूलयन् कीदृग् जात इति विशेषणद्वारा उपहास्यमिश्रितफलमाह—तत एष किंलक्षणः? कुह्वादिकक्षाश्रितः। कुहूः-अमावास्या, आदिशब्दात्पूर्णिमा तयोः कक्षा-पाक्षिकत्वेन स्वीकारस्तां श्रितः-शरणीकृतवान्। अत्रोप-हास्यसूचकपदं कुहूरितिबोध्यं। यतस्त्वदाज्ञाद्विषताममावास्या-श्रयणमेव श्रेयः। तथा च पाक्षिकत्वेन पूर्णिमाऽमावास्ययोः श्रयणात्, तस्य पूर्णिमीयक आमावासिकश्चेति सान्वर्था नाम-द्वयी सम्पन्ना। अन्य [त्वप्र]था पूर्णिमीयकनाम्न एव सान्वर्थता-करणे पूर्णिमैव पाक्षिकत्वेन स्वीकर्तव्या स्यात्। तथा च मास-मध्ये पूर्णिमाया एकत्वेन पूर्णिमा मासिकमेव पर्व स्यान्न पाक्षिक-मित्यप्यस्य वराकस्य दूषणं सूचितं बोध्यम्। यद्वा यच्चतुर्दश्यां पाक्षिकशब्दस्य सङ्केतोन्मूलनं तत्कुतः? इति विशेषणद्वारा-हेतुमाह—यतः स किंलक्षणः?, कुह्वादिकक्षाश्रितस्ततश्चतु-र्दश्यां पाक्षिकशब्दस्य सङ्केतोन्मूलकः, ततश्च कीदृग् जातः 'पक्षः पञ्चदशीमवाप्य सकलीस्यात्तत्र तत्पाक्षिकं युक्तं चेति विकल्प्य कल्पनपर'इति। पक्षः—पञ्चदशदिनात्मकः, पञ्च-

दर्शी-यज्ञकालं, अवाप्य-प्राप्य, सकलीस्यात्-पूर्णीभवेत्तत्तस्मात् पक्षेण निर्वृत्तं पाक्षिकं, तत्र-पञ्चदश्यां युक्तं, चकार एवार्थे, युक्तमेवेति विकल्प्याऽसदाशङ्क्य कल्पनपरः-कुविकल्पनाऽऽसक्तः इत्यक्षरार्थः ।

भावार्थस्त्वयं—यस्तु स्वाग्रही: स्वोक्तं परित्यक्तुमशक्तः स युक्तिदुर्बलेऽपि स्वमतिकल्पिते मार्गे युक्तिं नेतुमिच्छन्ननेकशः कुविकल्पनकल्पनाजालाकुलितो भवत्येव । उक्तं च द्वितीयाङ्गटीकायां—

"आग्रही बत निनीषति युक्तिं, तत्र यत्र मतिरस्य निविष्टा । पक्षपातरहितस्य तु युक्ति-र्यत्र तत्र मतिरेति निवेश" ।। मिति । कदाग्रही चायं सर्वजनप्रतीत एव । तन्निदानं तु प्रागुद्देशाधिकारे किञ्चिद्दर्शितं । विशेषतस्तु गुरुतत्त्वप्रदीपादिग्रन्थेभ्योऽवसातव्यम् ।

ननु पूर्णिमीयकस्य पञ्चदश्यामेव पाक्षिकस्वीकारात् पञ्चदश्यामेव पाक्षिकं युक्तमिति प्रयोगो युक्तो, न तु पञ्चदश्यां पाक्षिकं युक्तमेवेतिरूपेण प्रयोग इति चेत् । मैवं आचरणरूपतया तस्य चतुर्दश्यामपि पाक्षिकस्वीकारात् । स च स्वीकारो विशेषणसंयुक्तैवकारेण सूचितः, परं वैपरीत्यश्रद्धानात्तदपि मिथ्यात्वमेव । वैपरीत्यश्रद्धानं तु आगमोक्तं यच्चतुर्दश्यां पाक्षिकं तदाचरितमितिमननात् । यच्चाऽनागमिकं पूर्णिमापाक्षिकं तदागमोक्तमिति श्रद्धानाच्च बोध्यम् । अथ तत्कल्पनानिराकरणं तु उत्तरार्धेन द्रष्टव्यम् ।

अयं भावः-यथा सांवत्सरिकादिशब्दाः पर्युषणापर्वादिषु सङ्केतितास्तथा पाक्षिकशब्दोऽपि चतुर्दश्यामेव। यच्च 'पञ्चदश्यौ यज्ञकालौ पक्षान्तौ पर्वणी अपी'ति नाममालायां पञ्चदश्याः पर्वत्वमुक्तं, तद्धि वंशाङ्गुलीप्रभृतीनां ग्रन्थिष्विव कालसन्धिविशेषादौ सङ्केतवशाद् बोध्यम्। अन्यथा 'वत्सरादिर्मार्गशीर्ष'इति नाममालावचनात् कार्तिकसितपञ्चदश्यामेव पर्युषणापर्व कर्तव्यं स्यात्। लोकरूढ्या तु दीपालिकाऽऽषाढादौ टिप्पनानुसारतस्तु चैत्रेऽपि। तच्च तवापि नाभीष्टमित्याद्यनेकयुक्त्या तन्निराकरणं सुधीसाध्यमिति। अरिता चानादिसिद्धसिद्धान्तोक्तसङ्केतोन्मूलनात् स्फुटैवेति काव्यार्थः॥

अथ द्वितीयकाव्यमाह—

ज्ञानादीन्युपचारसाध्यशुचितानीष्टप्रदाऽनिष्टहृद्-
भावानीति तव प्रणीतसमये दृष्ट्वापि वाऽपेतदृग्।
ज्ञानाऽऽचाररहितोपचारमुपधानादीप्सिताऽसाधनं,
विद्वानेतदिति प्रभो! प्रभुपुरः किं नो व्रजेन्निग्रहम्॥१०॥

व्या०—हे प्रभो! तव प्रणीतसमये-त्वदुक्तसिद्धान्ते, उपचारसाध्यशुचितानि। उपचारेण-कालविनयबहुमानोपधानादिना, साध्या-साधनार्हा, शुचिता-पावित्र्यं येषां तानि उपचारसाध्यशुचितानि। ज्ञानादीनि-ज्ञानदर्शनचारित्राणि, कथम्भूतानि ?, इष्टप्रदाऽनिष्टहृद्भावानि, इष्टानि-सुखानि सुखसाधनानि च तानि प्रददतीतीष्टप्रदाः। अनिष्टानि-दुःखानि दुःखसाध-

नानि च तानि हरन्तीति अनिष्टहृतः। एवंविधा भावाः-स्वभावा येषां तानीष्टप्रदाऽनिष्टहृद्भावानि। इत्यमुना प्रकारेण दृष्ट्वापि-बाह्यलोचनेन पुस्तकन्यस्ताऽक्षरेष्ववलोक्यापि, वा शब्दात्तथानुष्ठीयमानान्यप्यपेतदृग्। अपेता-गता, दृग्-भावलोचनं यस्य सोऽपेतदृग् पूर्णिमीयकः, ज्ञानाचारहितोपचारं। ज्ञानाचारे हितश्चासावुपचारश्च तमेवंविधमेतत्प्रत्यक्षसिद्धं शुद्धपरम्परागततीर्थे श्राद्धश्राद्धीभिः क्रियारूपेणाऽनुष्ठीयमानमुपधानतपः, आदिशब्दात्साधूनां योगानुष्ठानपरिग्रहः। तदीप्सिताऽसाधनं-सुखाद्यसाधनं, विद्वान्-जानानः प्रभुपुरस्तवपुरस्तान्निग्रहं-यथापराधदण्डं किं नो व्रजेत्-प्राप्नुयात्? । अपि तु प्राप्नुयादेवेत्यन्वयमुखेनैवाक्षरार्थः।

भावार्थस्त्वयं-जैनप्रवचने ज्ञानाऽऽराधनं तावत्कालाद्युपचारैरेव भवति। उक्तं च—

"काले विणए बहुमाणे उवहाणे तह य अनिह्नवणे।
वंजणअत्थतदुभये अट्ठविहो नाणमायारो" ॥१॥ त्ति।

तत्रोपधानं-ज्ञानमुद्दिश्य तपोविशेषस्तत्करणं च ज्ञानाऽऽराधनहेतुर्ज्ञानमूलकत्वाच्च दर्शनचारित्रयोरपीति। तच्च साधूनामावश्यकयोगोद्वहनं, श्राद्धानां तूपधानोद्वहनं। तच्च पूर्णिमीयस्य नाभीष्टं। उपलक्षणात्तत्प्रतिपादकश्रीमहानिशीथादिशास्त्रमपि। तस्मात् हे प्रभो! तव पुरो निग्रहास्पदं भवेदेव।

ननु भो! अस्यामवसर्पिण्यां प्रथमतया चन्द्रप्रभस्यैव-श्रावकप्रतिष्ठाव्यवस्थापकत्वेन-प्रथमतस्तदुद्भावनेनैव विज्ञप्ति-

रुचितेतिचेत्। सत्यं, यद्यप्येवमस्ति, तथापि सम्प्रति यन्मते यदुत्सूत्रस्य बाहुल्येन प्रसिद्धिस्तन्मते तदुद्भावनपुरस्कारेणैव विज्ञप्तिकरणाभिप्रायात् श्रावकप्रतिष्ठायाः कटुकमते एव प्रसिद्धत्वेन तत्रैव किञ्चिदाविष्करिष्यते। अन्यथा पाशचन्द्रः प्रतिष्ठाया एवापलापी, लुम्पाकस्तु प्रतिष्ठाप्यप्रतिमाया अप्यपलापी। नग्नाटौष्ट्रिकव्यतिरिक्ताः शेषास्तु श्राद्धप्रतिष्ठाव्यवस्थापका इत्यादिव्यक्त्या वक्तव्ये विज्ञप्तेर्गरीयस्त्वं स्यात्, तस्मात्साङ्कर्यविवेकौ प्रत्युत्सूत्रसम्भवेऽप्युपलक्षणसूचितावेव बोध्यावितिकाव्यार्थः॥ इति गतः पूर्णिमीयकः॥

अथ काव्यषट्केनौष्ट्रिकापरनाम्नः खरतरस्य स्वरूपं विवक्षुराद्यकाव्येनातिप्रसङ्गमाह—

**पावित्र्येण विवर्जितेति रमणी नाऽर्हत्सपर्योचिता,**
**मत्वा तां प्रतिषिद्धवान्किमु न च ज्ञानादिसम्पद्ग्रहम्।**
**कादाचित्कमशौचमन्यसदृशं न ज्ञातवानज्ञराट्,**
**दुर्ज्ञेयस्त्वरयाऽरिरेष भगवन्! सम्प्रत्यमीषां नृणाम्॥११॥**

व्या०—हे भगवन्—हे स्वामिन्! एषः-प्रत्यासन्नोऽध्यक्षः खरतरनामाऽज्ञराट्-मूर्खचक्रवर्ती सम्प्रतीदानीममीषां-'अदसस्तु विप्रकृष्ट' इति वचनात् त्वत्तो दूरवर्तिनां नृणां-मनुष्याणां, त्वरया-शीघ्रं, दुर्ज्ञेयो-दुर्लक्ष्यो वर्तत इत्यन्वयः। एष किं कृतवान्? पावित्र्येण-शुचिना, वर्जिता-रहिता रमणी-योषित्, नाऽर्हत्सपर्योचिता-जिनपूजार्हा न भवत्येवेत्यमुना प्रकारेण मत्वा-ज्ञात्वा

निह्नवाधिकाराद् दुर्ज्ञानविषयीकृत्येतियावत्। तां योषितं प्रतिषिद्धवान्-स्त्रीणां जिनपूजायामनधिकार इत्येवंरूपेण जिनपूजातः पृथक् कृतवान् जिनपूजां त्याजितवानिति यावत्। चः पुनरर्थे। ज्ञानादिसम्पद्ग्रहं पुनः किमु-किं न निषिद्धवान्? तथा कादाचित्कमशौचमिति। स्त्रीगतं यत्कादाचित्कमशौचं-अपावित्र्यं, तदन्यसदृशं-रमण्यशौचापेक्षया पुङ्गतमशौचमन्यत् तेन सदृशं-तुल्यं न ज्ञातवानित्यक्षरार्थः।

भावार्थस्त्वयं-हे भगवन्! एष खरतरनामा तव वैरी साम्प्रतीनजनानां दुष्षमानुभावादज्ञानबाहुल्येनाविदितसद्गुरुवचनपरमार्थानां कदाग्रहग्रस्तचेतसां चेतिगम्यः, सहसा दुरधिगम्यः। दुरधिगम्यत्वं च 'कुमतं हि क्रियाबलेन वर्धते' इतिवचनात् शेषकुमतापेक्षयाऽस्य स्वमतिकल्पितक्रियाया उग्रत्वाऽऽभासतया मूढात्मनां क्रियाधिक्यस्य भ्रान्त्याऽऽपादकत्वेन बोध्यम्। तच्चैवं-अपावित्र्येण हेतुना स्त्रीणां जिनपूजायामनधिकारः, विशेषव्रतित्वेन पौषधिकानां भोजनानधिकारः, सामायिकादौ साधुव्रतोच्चारवन्नमस्कारत्रयपूर्वकत्रिदण्डकोच्चार इत्यादिकं तीर्थकराऽऽज्ञाबाह्यत्वेनानुग्रमप्युग्रक्रियात्वेनाऽऽभासत इति। तत्र स्त्रीपूजानिषेधनिराकरणं त्वत्रैव काव्येऽतिप्रसङ्गादिना कृतमेव। पौषधिकानां भोजननिषेधनिराकरणं तु चतुष्पर्व्यां नियमेनोक्ते पौषधव्रते चतुर्दश्यां नियमेन चतुर्थतपःकरणाज्ञया च तीर्थकृतामनुज्ञैव पूर्णिमायां पारणके सिद्धे सिद्धमेव। अन्यथा चतुर्मास्यामिव पाक्षिकेऽपि षष्ठतप एव प्रोक्तं भवेत्तच्च नोक्त-

मिति। एवं त्रिनमस्कारपूर्वकत्रिदण्डकोच्चारादावुग्रत्वाभासत्व-निराकरणं मत्कृतौष्ट्रिकमतोत्सूत्रप्रदीपिकातो बोध्यम्। अज्ञरा-डिति विशेषणेन दिगम्बराद्यपेक्षयाऽतिप्रसङ्गाद्यज्ञानेन सर्वथा तत्त्वविचारबाह्यत्वमसूचि। अतिप्रसङ्गाद्यज्ञानं तस्यापावित्र्येण हेतुना स्त्रीणां जिनपूजानिषेधकत्वेन स्फुटमेव। तथाहि-स्त्रीणां यदपावित्र्यं, तत्सार्वजनिकं कादाचित्कं वा?। आद्येऽति-प्रसङ्गो यथा-सार्वदिकादपावित्र्यात् स्त्रीणां यदि जिनपूजानिषे-धस्तर्हि तेनैव हेतुना ज्ञानादिसम्पद्ग्रहस्यापि निषेधः सम्पन्नः, उभयत्रापि तत्कल्पितयुक्तेस्तौल्यात्। स चानेन मूर्खशेखरेण न-ज्ञातः। द्वितीयहेतोरप्यतिप्रसङ्गो, यथा-कादाचित्कमपावित्र्यं स्त्रीषु तथा पुंस्वपि प्रतीतमेव। अपि शब्दात्साध्यातिप्रसङ्गो बुद्धिगम्यः। तथाहि-तुल्येप्यपावित्र्ये यदि स्त्रीणां जिनपूजा-निषेधः कथं न नृणामपि। एवमपि यदि पुंसामनुज्ञा कथं न स्त्रीणामपीति बन्द्य(बाधा)-परनामा साध्याऽतिप्रसङ्गः सोप्यनेन न ज्ञातः। एवमागमबाधोपि प्रभावत्यादिकृतजिनपूजादर्शनतः, सोऽपि न ज्ञातः इति काव्यार्थः।

अथ तत्कल्पितं तस्यैवोभयपाशकल्पं विकल्पयन् भगवदाऽऽ-ज्ञापराङ्मुखत्वप्रसिद्धिं तद्धेतुं च दिदर्शयिषुर्द्वितीयकाव्यमाह-

**वृद्धौ मासतिथी प्रमाणमथवा ते न प्रमाणं किमु,**
**ब्रूहीत्येवमुदीरितः प्रतिवचोऽशक्तः कुकर्माऽरिजित्!।**
**वाचाऽऽज्ञाविमुखः प्रसिद्धिमगमत् श्रीवार्षिके पर्वणि,**
**प्राप्तानन्द इव स्मितं च कुरुते कृत्वा हि तत् श्रावणे॥१२॥**

व्या०—हेऽरिजित् जिन ! वृद्धौ मासतिथ्योर्वृद्धौ सत्यामिति गम्यं, मासतिथी प्रतीते ते-तव, किमु-किं प्रमाणं, दिनगणनापङ्क्तावुपन्यसनीये ब्रूहीत्येवममुना प्रकारेणोदीरितो-नोदितः, प्रतिवचोऽशक्तः-प्रत्युत्तरयितुमसमर्थः, वाचा-वचनेन, कुकर्मा-यत्तत्प्रलापी सन् आज्ञाविमुखस्तीर्थकृदाज्ञाखण्डनकारी श्रीवार्षिके पर्वणि-पर्युषणामहसि, प्रसिद्धिमगमत्-अयं जिनाज्ञावज्ञाकारीत्येवंरूपेण लोके प्रसिद्धो जातः। हि यस्मात्तद्वार्षिकं पर्व श्रावणे-श्रावणमासे चकारात् भाद्रपदवृद्धौ प्रथमभाद्रपदे च-कृत्वा-विधाय, प्राप्ताऽऽनन्द इव अवाप्तमुदिव स्मितं-हास्यं कुरुते-विदधातीत्यन्वयमुखेनैवाक्षरार्थः।

भावार्थस्त्वयं-मासतिथ्योर्वृद्धौ सत्यां प्रथमो मासस्तिथिर्वा किं तव प्रमाणं ? सविंशतिरात्रिमासे व्यतिक्रान्ते पर्युषितव्यमित्यादिदिनगणनापङ्क्तावुपन्यसनीये उत नेत्येवं इहोदीरितोऽपि उभयथापि पाशात् प्रत्युत्तरयितुमसमर्थः। तथाहि-प्रमाणे तावत् "चउण्हं मासाणं अट्ठण्हं य पक्खाणं वीसुत्तरसयराइंदिआण" मित्यादिक्षामणकालापकपाठप्रामाण्यात् श्रावण भाद्रपदाश्विनवृद्धावाषाढसितचतुर्दशीतो ह्याश्विनसितचतुर्दश्यामेव चतुर्मासककरणताप्रसङ्गेन कार्तिकसितचतुर्दश्यां चतुर्मासकरणे 'पंचण्हं मासाणं दसण्हं पक्खाणं पंचासुत्तरसयराइंदिआण' मित्यादिनवीनक्षामणकालापककल्पनप्रसङ्गेन च महति सङ्कटे पतनमेतस्य, तस्योभयोरप्यनिष्टत्वात्। किञ्च-श्रावणवृद्धौ चतुर्मासकात्पञ्चाशता दिनैः पर्युषणाकरणे

कार्तिकचतुर्मासकादर्वाक् शतदिन्या पर्युषणाकरणताऽऽपत्त्या "समणे भगवं महावीरे सवीसइराइमासे वइक्कंते सत्तरि राइंदिएहिं सेसेहि" त्ति प्रवचनबाधा प्रकटैव। अप्रामाण्ये च तत्पूर्वाऽऽचार्यकल्पितविधिप्रपादि ग्रन्थानां दत्ताञ्जलिताऽऽपत्त्या ऽप्यनिष्टमेवेत्युभयपाशात् प्रत्युत्तरयितुमशक्तः कटुकभाषी भवतीति।

ननु सहर्षं श्रावणे पर्युषणाकरणतः स्मितं कुर्वन् भगवद्वैरित्वेन कथं विख्यातः? इति चेत्। उच्यते-यथाऽन्योऽपि कश्चिद्देवानांप्रियो विरुद्धाचरणतः सहर्षं स्वीयं स्वरूपं जनेभ्यो ज्ञापयन् तत्कर्मकारित्वेन विख्यातो भवति, तथाऽयमपि जिनानुपदिष्टं श्रावणेऽपि पर्युषणापर्व कृत्वा सहर्षं जनज्ञापनं कुर्वन् जिनाज्ञाविरुद्धचारित्वेन जनप्रसिद्धो भवतीति काव्यार्थः।

अथाऽज्ञत्वेन प्रतिक्रमणदृष्टान्तं पुरस्कृत्य चतुष्पर्वीव्यतिरिक्ततिथिषु पौषधं निषेधयतोऽर्हदाज्ञाबाह्यत्वं दर्शयन् तृतीयकाव्यमाह—

**प्रायश्चित्तकृतिः प्रतिक्रमणसत्कृत्यं द्विशः प्रत्यहं,**
**प्रज्ञप्तं भगवंस्त्वया तदधिकं कुर्वीत कः काम्यधीः।**
**तद्दृष्टान्तमुखेन संवरमयं सामायिकादीव यत्,**
**पर्वस्वेव नु पौषधं नियमयन्नस्ति त्वदाज्ञाबहिः॥१३॥**

व्या०—हे भगवन्! यद्यस्मात् यत्तदोर्नित्याभिसंबन्धात् यत्प्रायश्चित्तकृतिः-दिवारात्रिसम्बन्धिपापापहार्यनुष्ठानं प्रत्यहं-

प्रतिदिनं द्विशो-द्वयोः सन्ध्ययोर्द्विवारं, प्रतिक्रमणं प्रतीतमेव तद्रूपं यत्सत्कृत्यमुत्तमानुष्ठानं त्वया-भगवता प्रज्ञप्तं-प्ररूपितं तद धिकं-त्रिः प्रभृतिकं काम्यधीः-सुखाभिलाषी कः कुर्वीत ? न कोऽ पीत्यर्थः। नु-वितर्के प्रकरणात् खरतरनामा दुरात्मा तद्दृष्टान्त-मुखेन-प्रतिक्रमणदृष्टान्तपुरस्कारेण, सामायिकादीव-सामायि-कोपवासादिवत्, संवरमयं-आश्रवनिरोधलक्षणं पौषधं पर्वस्वेव-अष्टम्यादिपर्वदिवसेष्वेव नियमयन्-अपर्वदिवसेषु प्रतिपदादिषु न कर्तव्यमित्येवंरूपेण मर्यादीकुर्वन्, अस्ति-विद्यते यत्तदोर्नित्या-भिसंबन्धात् तस्मात् त्वदाज्ञाबहिर्बोध्य इत्यन्वयमुखेनैवाक्षरार्थः।

भावार्थस्त्वयं-यथा सदनुष्ठानमपि प्रतिक्रमणं प्रतिनियतवेला यां प्रत्यहं द्विरेव विधीयते, तथा पौषधोऽपि पर्वदिवसेष्वेव युक्तो, न पुनः प्रतिपदादिष्वपर्वदिवसेष्वपीति तस्याऽज्ञशेखर-स्याकूतं, अज्ञशेखरत्वं चास्य प्रतिक्रमणपौषधयोः स्वरूपस्यैवाऽ परिज्ञानात्। यतः प्रतिक्रमणं तावत् दिवारात्र्योः पापानुष्ठा-नस्य प्रायश्चित्तं, तच्चोत्कृष्टारम्भिणोऽपि श्रीमहावीरतीर्थे षाण्मासिकतपोवन्नाधिकमुचितं, पौषधस्तु संवररूपत्वेन सामा-यिकोपवासादिवदपर्वदिवसेष्वपि युक्त एव। अन्यथा चतु-र्थादितपसामपि चतुर्दश्यादिपर्वदिवसेष्वेव कर्तव्यतापत्तेः,चतु-र्दश्यादिष्वेव चतुर्थादितपसो नियमेनाऽऽगमे दृश्यमानत्वात्। तस्माद्यथा चतुर्थादितपसोऽष्टम्यादिदिनेषु नियमेनोक्तत्वेऽपि-संवररूपत्वेनाऽन्यतिथिष्वपि कर्त्तव्यतयाऽनुज्ञातः, तथा पौषध-स्यापि। उक्तं च तत्त्वार्थभाष्यवृत्तौ-"प्रतिपदादिष्वनियमेन कार्य"

इति। कृतेरप्युपलम्भो विपाकश्रुताङ्गादौ सुबाह्वादिनिदर्शनतो बोध्यः। किञ्च-(यथा) 'पडिक्कमे देवसिअं सव्व'मित्यादि सूत्रपाठोऽप्यधिकप्रतिक्रमणनिषेधको दृश्यते, न च तथा 'जाव पव्वदिवसं-पज्जुवासामीत्यादि' सूत्रपाठोऽपर्वसु पौषधनिषेधकः, प्रत्युत जाव दिवसं अहोरत्तिं पज्जुवासामी' त्यादिपाठः। स च सर्व-दिनपौषधव्यवस्थापक इति। ये तु 'पौषधोपवासातिथिसंविभागौ तु प्रतिनियतदिवसानुष्ठेयौ न प्रतिदिवसाचरणीया'वित्यावश्यकवृत्त्यनुसारेण निषेधयन्ति, ते तद्वृत्तेरभिप्रायानभिज्ञा एवावगन्तव्याः। तदभिप्रायजिज्ञासुभिस्तु मत्कृततत्त्वतरङ्गिणीवृत्तिरवलोकनीयेति काव्यार्थः॥

अथ सामायिके क्रियावैपरीत्यं पौषधे च क्रियाधिकं दिदर्शयिषुश्चतुर्थं काव्यमाह—

**ईर्यां सामयिके सुचित्तजननीमन्ते प्रतिक्रामयन्,**
**सद्बीजाङ्कुरितक्षमामिव हलेनोल्लेखयन्नल्पधीः।**
**दोषापौषधिनोऽन्त्ययामसमये सामायिकं शिक्षयन्,**
**दक्षंमन्यजनः कथं कथय मां स्वामिस्त्वदाज्ञापरः ॥१४॥**

व्या०—हे स्वामिन्! त्वं मां कथय अयं सामयिके दोषद्वयभाग् खरतरो दक्षंमन्यजनः-अदक्षमप्यपण्डितमप्यात्मानं दक्षं मन्यते स दक्षंमन्यः, स चासौ जनस्त्वदाज्ञापरः—तवाज्ञावर्ती कथं? न कथमपीत्यन्वयः। स च किंलक्षणः?, अल्पधीः, अल्पा-एकांशग्राहित्वेनातिकृशा धीर्बुद्धिर्यस्य। यद्वाऽल्पशब्दोऽ-

भाववाची बुद्धिरहित इत्यर्थः। किं कुर्वन् ?, सद्बीजाङ्कुरितक्षमां हलेनोल्लेखयन्निव, सद्बीजैः-शाल्यादिभिरङ्कुरिता-जाताङ्कुरा या क्षमा-पृथ्वी, तां हलेनोत्कीरयन्निव, सुचित्त-जननीं-धर्मानुष्ठानयोग्यचित्तविधात्रीमीर्यामीर्यापथिकीमन्तेऽव-साने सामायिकदण्डकोच्चारानन्तरमित्यर्थः, प्रतिक्रामयन् चकारोऽध्याहार्यः, चः—पुनर्दोषापौषधिनो-रात्रिपौषधिकस्या-न्त्ययामसमये-रात्रिपाश्चात्यप्रहरे सामायिकं शिक्षयन् ग्राहयन्नित्यक्षरार्थः।

भावार्थस्त्वयं-पृथिव्याद्युपमर्दहेतुगमनाऽऽगमनादिक्रियापरिणताऽऽत्मनो हि धर्मानुष्ठानं विवक्षितफलवन्न भवतीत्यतः पृथिव्याद्यारम्भपरिणामनिवृत्तिहेतुरीर्याप्रतिक्रमणं, तच्च शेषानुष्ठानेष्विव सामायिकेऽपि प्रथममेव युक्तं, उक्तहेतोर्बाधकं विना सर्वत्रापि समानत्वात्। यच्च सामायिके महर्द्धिकस्य राजाऽऽकारणकारणाद्युद्भावनं तत्पौषधाद्यनुष्ठानेऽपि समानत्वादकिञ्चित्करमेव। यत्परकृतसामायिकस्येर्यापथैवेति (?) कुविकल्पनं तदप्यशेषानुष्ठानेष्वतिप्रसङ्गभुजङ्गग्रस्तत्वात्तथैव बोध्यं। यच्च "सामाइअं काऊण"मित्याद्यावश्यकचूर्ण्यादिवचनं तदपि मूढानामेव भ्रान्त्युत्पादकं, न पुनः सम्यग्धीधनानां। यतः सेर्या जइ चेइआइं अत्थि तो पढमं वंदति'त्ति श्री आवश्यकचूर्णिवचनादेव कृतसामायिकस्य चैत्यगमनागमनविषयिणी स्फुटैव, अन्यथा श्रीमहानिशीथादिनैव विरोधः स्यात्, तत्र च चित्तशुद्धिनिमित्ताया ईर्यायाः प्रतिक्रान्तिं विना चैत्यवन्दन-स्वाध्याय-ध्यानादि-

धर्मानुष्ठानस्य निषिद्धत्वात्। अत्र बह्व्यो युक्तयो ग्रन्थगौरव-भयान्नोच्यन्ते, दिग्मात्रदर्शनं तु तत्त्वतरङ्गिणीवृत्तितो बोध्यम्। एवं च सति यत्सामायिके पश्चादीर्यानिरूपणं तत्सा-मायिके विपरीतक्रियारूपो दोषः। स च सद्बीजाङ्कुरिते-त्यादिलौकिकदृष्टान्तेन सर्वथा बुद्धिविकलस्यैव भवतीतिदर्शि-तम्। तथा 'जाव पोसहं पज्जुवासामि'त्ति पाठोच्चारेणैव पौष-धावधिके विद्यमानेऽपि सामायिके यद्रात्रिपश्चिमप्रहरे सामायि-कोपदेशनं तदधिकक्रियादोषः पौषधे बोध्यः। सोप्यतिमूर्ख-स्यैव भवति। यतोऽवध्यपूर्तावपि यदि पुनःपुनः कृतिः फल-वती स्यात्तर्हि एकस्मिन्नेवोपवासे पुनःपुनः प्रत्याख्यानकरणेन शतशोप्युपवासा भवेयुरवधिकरणस्य च वैयर्थ्यमापद्येत। तथा च यावज्जीवावधिकचारित्रेप्युक्तयुक्तिरीक्षणीयेति सामायिक-पौषधयोरपि प्रसिद्धदोषद्वयादाज्ञाबाह्यत्वमिति काव्यार्थः॥

अथ न केवलं विपरीतक्रिययैव सामायिकं दूषितं, किन्तु मूढजनविप्रतारणार्थमधिकोच्चारेणापि दूषितमिति प्रदर्शनाय पञ्चमकाव्यमाह —

आयुःपर्यवसायिपञ्चयमवत् त्रिदण्डकोच्चारणं ;
सम्यक् सामयिके जनेति मतिकृन्नो नन्दिपूर्वं तथा।
प्रत्याख्यानविधावुभे इति विभो! स्यात् सोऽनुकम्प्यः कथं?
तद्यद्देव! दिवाकरद्युतिततिः कुर्वीत किं पेचकम्॥ १५॥

व्या०—हे विभो ! तत्-तस्मात्-स खरतरः अनुकम्प्यो-ऽनुकम्पार्हः, कथं स्यान्न कथमपीत्यन्वयः। तत्कुतो ? यद्यस्मात् हे देव ! दिवाकरद्युतिततिः—आदित्यांशुश्रेणिः, पेचकं-कौशिकं घूकमिति यावत्। किं कुर्वीत समस्तजीवलोकं प्रकाश-यन्नपि तथाविधजातिदोषदूषितं कौशिककुलं प्रकाशमाश्रित्य ? न किमपि कुर्यात् प्रत्युतान्धीकुर्यादित्यर्थः। न चैतावता भगवतो दूषणं। उक्तं च श्रीसिद्धसेनदिवाकरपादैः—

"सद्धर्मबीजवपनानघकौशलस्य,
यल्लोकबान्धव ! तवापि खिलान्यभूवन्।
तन्नाद्भुतं खगकुलेष्विह तामसेषु,
सूर्यांशवो मधुकरीचरणावदाता" ॥इति॥ स किम्भूतः ? हे जनेति लोकसम्बोधने। आयुःपर्यवसायिनो-यावज्जीवावधिका ये पञ्च यमा-महाव्रतानि, उपलक्षणत्वात्तथाविधानुव्रतान्यपि ग्राह्याणि। त इव-तद्वत्, सामायिके घटिकाद्वयमात्रकालावधिक-संवरविशेषे, उपलक्षणादेकदिनावधिकसंवरविशेषे पौषधेऽपि, त्रिदण्डकोच्चारणं-नमस्कारत्रयपूर्वकवारत्रयसामायिकाऽऽलापको-च्चारणं, सम्यग्-सत्यमित्यमुना प्रकारेण, मतिकृत्-मतिकर्ता बुद्धिनिवेशयितेत्यर्थः, तथेति चारित्रवन्नन्दिः-प्रतीतः, उपलक्षणात् शोभनमुहूर्तवासक्षेपादिपरिग्रहः। तत्पूर्वकं सम्यगिति न मति-कृत्, तथाशब्दस्य लालाघण्टान्यायेनोभयत्र सम्बन्धात्तथा चारित्रवत् प्रत्याख्यानविधावुभे-त्रिरुच्चारो नन्दिश्चेतिद्वयमपि सम्यगिति नो मतिकृदित्यक्षरार्थः।

भावार्थस्त्वयं-तेन शठेनाल्पकालीनेऽपि सामायिके यावज्जीवाधिकचारित्रदृष्टान्तेन त्रिरुच्चारः स्वीकृतो, न पुनर्नन्द्यादिविधिपूर्वकत्वं, तथा सामायिकापेक्षया बहुकालीनेष्युपवासादिप्रत्याख्याने न त्रिरुच्चारो नापि नन्दिरिति महाज्ञानाऽऽवृतलोचनोऽसौ कौशिकादित्यदृष्टान्तेन प्रकाशमाश्रित्य भगवदसाध्य इति काव्यार्थः ॥

अथ यो यत्प्रतिपक्षः स तत्प्रतिपक्षानुकूल इति न्यायात् लौकिकमिथ्यात्वमप्यस्य युक्तमेवेति दर्शनाय षष्ठं काव्यमाह—

**पीयूषद्विषतो विषादनमिव प्रीताशुमृत्योः पुन-**
**र्भूपाज्ञापरिपन्थिनोऽलमटवीस्तेनैकनिश्राश्रमः ।**
**नद्याः साधनमस्य चाधममतेश्चामुण्डिकाराधनं,**
**युक्तं त्वेव तवाहितस्य हितकृत् ! खेदं वृथा मा कृथाः ॥५॥**

व्या०—हे हितकृत्-हितकारिन् ! त्वं वृथा-मुधा खेदं मा कृथाः, मादृशेऽपि प्रभौ विद्यमाने नदीचामुण्डिकाद्याराधनं कथं करोत्यसावित्येवंरूपेण परविषयकं दुःखं मा कार्षीरित्यन्वयः । खेदः कुतो न विधेयः ?, हि-यस्मात्, अस्यौष्ट्रिकस्याधममतेः-निन्द्यकृत्यकारित्वेन हीनधियः, तवाहितस्य-त्वद्वैरिणो, नद्याः साधनं-पञ्चनदीसाधनं युक्तमेव । किमिव ?, प्रीताशुमृत्योः, प्रीतो-वल्लभः, आशुमृत्युः-शीघ्रं मरणं यस्य स, तस्य पीयूषद्विषतोऽमृतपानवैरिणो, विषादनमिव-विषभक्षणमिव, तथा पुनश्चामुण्डिकाराधनं, अपेगम्यत्वात्तदाराधनमपि तस्य युक्तमेव, इव

शब्दस्यापि (स्येहापि) सम्बन्धात् इव भूपाज्ञापरिपन्थिनो-राजाज्ञापरिपन्थिनो राजाज्ञावैरिणोऽलमत्यर्थं अटवीस्तेना-राजविरोधिनो वनवासिन-श्चौरास्तेषामेका-अद्वितीया, निश्रा-शरणं तस्य श्रमः-प्रयासः कृतिरिति यावत्, स इवेत्यक्षरार्थः ।

भावार्थस्त्वयम्-मरणाभिलाषुकस्य पीयूषद्विषतो विषभक्षणमिव पञ्चनदीसाधनं राजाज्ञावैरिणश्चौरशरणकरणमिव मिथ्यादृग्व्यन्तरीविशेषचामुण्डिकाराधनं तव वैरिणश्चामुण्डिकाराधनाल्लोकदत्तचामुण्डिकनाम्नः खरतराऽपरपर्यायस्य युक्तमेव । भगवति खेदाभावेप्यन्यत्र तथादर्शनात् स्वरूपयोग्यतया युक्तैव खेदाकरणविज्ञप्तिरिति काव्यार्थः ॥ इति गतः खरतरः ॥

अथ काव्यत्रयेणाञ्चलमतं दूषयितुं प्रथमकाव्येनाऽज्ञानोद्भावनामाह —

**किञ्चिद्धर्मवशेन वस्तु निखिलं साधर्म्यवैधर्म्यभा-,**
**गन्योऽन्यं प्रतिवस्तुविस्तरविभुज्ञानिन्नजानन्नयम् ।**
**श्रद्धालुर्मुखवस्त्रिकाग्रहणतः स्यात्साधुलिङ्गी ततो,**
**नो युक्तं तदिति प्रकल्पनपरः पापात्मराड् विश्रुतः ॥१७॥**

व्या० —हे प्रतिवस्तुविस्तरविभुज्ञानिन् । प्रतिवस्तुविस्तरं-वस्तु २ प्रत्यनन्तपर्यायविषयकं, विभु च-द्रव्यपर्यायाभ्यां निखिलविषयत्वेन व्यापकं, तच्च तत् ज्ञानं च तद्विद्यते यस्य स प्रतिवस्तुविस्तरविभुज्ञानी सर्वज्ञ इत्यर्थः । तस्य सम्बोधनं हे प्रति-

वस्तुविस्तरविभुज्ञानिन् ! किञ्चिद्धर्मवशेनानन्तधर्मात्मके वस्तुनि विवक्षितैकतरो धर्मः किञ्चिद्धर्मस्तद्वशेन तत्पारतन्त्र्येणाऽन्योन्यं-परस्परेण साधर्म्यवैधर्म्यभाग्। साधर्म्यं च-समता, वैधर्म्यं च-विषमता-ते भजते-आश्रयते इति साधर्म्यवैधर्म्यभाग्, एवंविधं निखिलं-सम्पूर्णं, वस्तु-आत्मादिपदार्थसार्थरूपं अजानन्नावगच्छन्, यत्तदोर्नित्याभिसम्बन्धात् यस्मान्मुखवस्त्रिकाग्रहणतः श्रद्धालुः-श्रावकः, साधुलिङ्गी स्यात्ततस्तस्मात्तत् मुखपोतिकाग्रहणं श्रद्धालूनां नो युक्तं-नोचितमित्यमुना प्रकारेण कल्पनपरः-कुविकल्पनाऽऽसक्तोऽयमध्यक्षोऽञ्चलः पापात्मराट्-अधर्मिशेखरो, विश्रुतः-प्रायः सर्वजनप्रतीतः, इत्यन्वयमुखेनैवाक्षरार्थः।

भावार्थस्त्वयम्-हे सर्वज्ञ ! समस्तवस्तूनामन्योऽन्यं साधर्म्यं वैधर्म्यं च प्रतीतमेव। तथाहि-द्रव्यत्वादिधर्मो घटपटयोः साधर्म्यं, वैधर्म्यं च मृन्मयत्वतन्तुमयत्वादिधर्मः। एवमात्माकाशादीनाममूर्तत्वादिधर्मैः साधर्म्यं, वैधर्म्यं च चैतन्याचैतन्यादिधर्मैरित्यादि स्वधिया बोध्यम् (यथा) तत्र केवलं न साधर्म्यसूचकधर्मैरेवोभयोरैक्यमापद्यते, भिन्नत्वसूचकानामपि धर्माणां विद्यमानत्वात्। तथा मुखवस्त्रिकाग्रहणमात्रेणापि न साधुलिङ्गता, श्रद्धालोर्भिन्नत्वसूचकानामपि धर्माणां विद्यमानत्वात् श्रद्धालोर्भिन्नत्वसूचकविरुद्धनेपथ्याऽऽहारादिविधेर्लोकप्रतीतत्वात्। यदि साधूपात्तत्वमात्रेण परित्यागो युक्तस्तर्हि धान्याहार-पादविहार-जलपान - वस्त्रपरिधान-तत्त्वश्रद्धान-नमस्कारादिजापादेः परित्यागं प्रसज्येत। तस्मादावश्यकादि-

क्रियासाधकतमत्वेन श्रद्धालूनामपि रजोहरण-मुखवस्त्रिकाग्रहणं युक्तमेव। उक्तं चागमे—

"से किं तं लोउत्तरिअं भावावस्सयं ?, २ जं णं समणो वा समणी वा सावओ वा साविआ वा तच्चित्ते तम्मणे तल्लेसे तदज्झवसिए तदज्झवसाणे तदट्ठोवउत्ते तदप्पिअकरणे अण्णत्थ कत्थइ मणं अकुणमाणो उभओ कालं आवस्सयं करेंति"त्ति। अनुयोगद्वारसूत्रम्। एतद्वृत्त्येकदेशो यथा—'तदर्पितकरणः' करणानि-तत्साधकतमानि देह-रजोहरण-मुखवस्त्रिकादीनि, तस्मिन्नावश्यके यथोचितव्यापारनियोगेनार्पितानि-नियुक्तानि तानि येन स, सर्वथा सम्यग् यथास्थानन्यस्तोपकरण इत्यर्थः। तथा "तस्साहणे जाणि सरीररजोहरणमुहणंतगादिआणि दव्वाणि ताणि किरिआकरणत्तणओ अप्पिआणि"त्ति। अनुयोगचूर्णिः। तद्ग्रहणं चानेनाभिनिवेशात्प्रतिषेधयतोऽन्येषामपि त्वद्वैरित्वेन सम्मत इति काव्यार्थः॥

अथ साधूपात्तत्वेन श्रद्धालोर्मुखवस्त्रिकादित्याजनेन न्यायस्य समानत्वात् तद्वैपरीत्यस्यापि कल्पनाप्रसङ्गेन स्वगलपाशं दिदर्शयिषुर्द्वितीयकाव्यमाह—

किञ्चारोपयता तुलां निलयिनः स्वात्मानमाप्तप्रभो !
तेनाऽऽनायि निजे गले दृढतरः पाशः स्वयं दुर्धिया।
धान्याऽऽहारजलोपचारशुचिता-वस्त्रावृताऽवाच्यप-
न्न्यासार्हन्नति-जैनशासनमतिश्रद्धानसद्ध्यानतः॥१८॥

व्या०—हे आप्तप्रभो-जिनपते! किञ्चेति दूषणाभ्युच्चये। स्वात्मानं निलयिनो-गृहस्थस्य, तुलां-समतामारोपयता तेन-स्तनिकेन दुर्धिया-दुर्बुद्धिना, निजे गले-स्वकीये कण्ठे, स्वयं-स्वयमेव, दृढतरोऽतिनिबिडः, पाशो-बन्धनमानायि-आनीत इत्यन्वयः। तत्र गृहस्थतुल्यता कुतः?, धान्याऽऽहार-जलोपचारशुचिता-वस्त्रावृतावाच्य-पन्न्यासार्हन्नति-जैनशासनमतिश्रद्धान-सद्ध्यानतः। धान्याहारश्च प्रतीतः, जलोपचारशुचिता च-जलस्योपचारेण-आहारनीहारादिक्रियाविधिलोकप्रसिद्धव्यापारेण, शुचिता-पावित्र्यं, वस्त्रावृताऽवाच्यं च-वस्त्रेणावृतमाच्छादितमवाच्यं-लिङ्गोपस्थादि, पन्न्यासश्च-चरणन्यसनं, अर्हन्नतिश्च-तीर्थकरनमस्कारः जैनशासनमतिश्रद्धाने च। मतिश्च श्रद्धानं च मतिश्रद्धाने, जैनशासने मतिश्रद्धाने, सद्ध्यानं च-धर्मध्यानादिध्यानमिति समाहारद्वन्द्वस्तत इत्यक्षरार्थः।

भावार्थस्त्वयं-यदि मुखपोतिकाग्रहणमात्रेणापि श्रद्धालोः साधुसाम्यं स्यात्, तर्हि धान्याहारादिभिः साधोरपि श्रद्धालुसाम्यं भवत् केन वार्यं? न्यायस्योभयत्र समानत्वात्। तथाचात्मनो गृहस्थतुल्यतां मन्वानोऽञ्चलः कथं (न) मूढानामपि गुरुरिति स्वगलपाशाऽऽनयनमिति काव्यार्थः॥

अथ तस्य निर्दयत्वमाविष्कुर्वन्नाह—

**हत्वाऽऽवश्यकभूपतिं जिनपते! तत्कण्ठहारोपमं,!**
**द्विः सङ्ख्यानियमं समत्वनृपतेस्सत्संवरैकात्मनः।**

**कण्ठे पाशमधीश ! पश्य पुरतः कुर्वन्नुपादाय वै,**
**षड्जीवेष्वघृणो घृणास्पदमसौ स्यात्ते कथं संवरेट् ! ॥१६॥**

व्या०—हे जिनपते ! हे अधीश ! हे संवरेट् !-संवरराज ! त्वं पश्य-असावञ्चलः आवश्यकभूपतिं-प्रतिक्रमणनृपतिं, हत्वा-विनाश्य, तस्यावश्यकस्य कण्ठस्तत्कण्ठस्तस्मिन् हारोपमं सुसूत्र-गुणप्रोतमुक्ताफलश्रेणिरचितभूषणकल्पं, द्विः सङ्ख्यानियममुपा-दाय-गृहीत्वा सत्संवरैकात्मनः-शोभनसंवरैकस्वरूपस्य समत्व-नृपतेः-सामायिकभूपतेः, कण्ठे पाशं-गलबन्धनं कुर्वन् षड्जीवेषु-पृथिव्यादिषड्जीवनिकायेषु अघृणो-निर्दयः, ते-तव पुरस्तात्कथं घृणास्पदं-करुणास्थानं, न कथमपीत्यन्वयमुखेनैवाक्षरार्थः ।

भावार्थस्त्वयं-प्रतिकमणं तावद्दिवारात्रिसम्बन्धिप्रायश्चित्ता-नुष्ठानं । तत्र च यथा 'यथापराधं दण्डो न्याय'इति वचनात् द्विः सङ्ख्यानियमो युक्तः, अन्यथा प्रायश्चित्तानैयत्येन प्रवचन-व्यवस्थाविप्लवः प्रसज्येत । सामायिकं पुनः संवररूपक्रिया, तत्र च सङ्ख्यानियमो न युक्तः इति सम्यग् वस्तुस्वरूपापरि-ज्ञानादभिनिवेशाच्च श्राद्धानां प्रतिकमणं न युक्तमित्यावश्यक-भूपतिं विनाश्य तत्कण्ठे हारोपमं तदीयमेव द्विः सङ्ख्यानियमं-श्राद्धैः सामायिकमेव विधेयं, तदपि द्विवारमिति, संवररूपस्य सामायिकभूपतेः कण्ठे पाशं कुर्वन्नसावञ्चलिकः षड्जीवेषु निर्दयस्तस्माच्च तथाविधयोग्यतासद्भावात्तव पुरस्तान्न करुणा-स्पदं, उपलक्षणात् संवररूपस्य पौषधस्यापि चतुष्पर्व्यां नियमयन् गलपाशिको बोध्य इति काव्यार्थः ॥ इति गतोऽञ्चलः ॥

अथ पूर्वार्द्धेन सार्द्धपूर्णिमीयकमतमुत्तरार्द्धेन त्रिस्तुतिकमत-मतिदेशेन दूषयितुं काव्यमाह—

**प्रायस्तुल्यकदाग्रही शरमितश्चक्षुर्मितेन प्रभो !,**
**सभ्यान्तस्तदयं पुरस्तव तिरस्कार्यस्त्वनार्यप्रभुः ।**
**तद्वत्त्रिस्तुतिकोऽपि कोपदहनः काम्यः कुकर्मात्मनां,**
**कोप्यस्त्वद्वचनामृतैकरसिकैर्बाह्यातिबाह्यो यतः ॥ २० ॥**

व्या०—हे प्रभो ! 'यत्तदोर्नित्याभिसम्बन्धात्' यस्मात् शरमितः-उद्दिष्टेषु पञ्चमः सार्द्धपूर्णिमीयकः, प्रायो-बाहुल्येन, चक्षुर्मितेन-तद् द्वितीयेन पूर्णिमीयकेन, तुल्यकदाग्रही-समानाभिनिवेशिकः, तत्तस्मात् अयं सार्द्धपूर्णिमीयकः अनार्यप्रभुः, अनार्या-आज्ञाविकलधर्मकारिणस्तेषां प्रभुः-स्वामी तव पुरस्तात् सभ्यान्तः-सभ्यमध्ये, तिरस्कार्यः, तुरेवार्थे, तिरस्कार्य एवेत्यन्वय-मुखेनैवाक्षरार्थः ।

भावार्थस्त्वयं-सार्द्धपूर्णिमीयकः पूर्णिमापाक्षिकादिप्ररूपणया प्रायः पूर्णिमीयकतुल्यः । प्रायोग्रहणात् कर्पूरवासक्षेपादि-पूजानिषेधादिनाऽधिकोऽपि । तत्तस्मात्तव पुरस्तिरस्कार्य एवेति पूर्वार्द्धं । इति गतः सार्द्धपूर्णिमीयकः । तथा हे प्रभो ! तस्मात्तत्पूर्णिमीयकवत् त्रिस्तुतिकोप्यागमिकोऽपि त्वद्वचनामृतैकरसिकैः-तवाज्ञापरायणैः कोप्य-अनिष्टविषादिवत् त्याज्य इत्यन्वयः । तस्मात् कुतो? यस्माद् बाह्यातिबाह्यः । संघबाह्यो-राकारक्तः, ततो बाह्योऽञ्चलस्ततोऽप्ययं बाह्योऽतो बाह्यातिबाह्यः । किंलक्षणः सः?,

कुकर्मात्मनां-उत्सूत्रभाषणादिना कुत्सितं कर्म येषां ते एवंविधा ये आत्मानः प्राणिनस्तेषां काम्यः-प्रीतिकारी। पुनः किंलक्षणः? कोपदहनः-उत्सूत्रभाषिणां हि क्रोधादयोऽनन्तानुबन्धिन एवोदयप्राप्ता भवन्ति, तस्मात् कोपोऽप्यनन्तानुबन्धी क्रोधस्तेन दहन इव अग्निरिव कोपदहनोऽतः कोप्य इति काव्यार्थः।

अथातिदेशेन तिरस्कृतस्याप्यागमिकस्याऽस्य चित्रकारिचरित्रमाविष्कुर्वन् काव्यमाह—

स्वामिंश्चित्रकृदश्रुतं तव रिपोरेकं चरित्रं शृणु,
त्वत्तीर्थस्य नमस्कृतिं च वचसा स्वीकृत्य तन्मध्यगा।
न स्तुत्या श्रुतदेवतेति वदति श्रुत्वापि तत्सन्निधे-
रौन्नत्यं जिनशासनस्य सततं श्रीहेमचन्द्रादितः॥२१॥

व्या०—हे स्वामिन्! तव रिपोरागमिकस्यैकमश्रुतं चित्रकृद्-आश्चर्यकृच्चरित्रं शृणु इत्यन्वयः सुगमः। तच्चरित्रं किं? 'नमो तित्थस्स'त्तिवचनात् त्वत्तीर्थस्य-द्वादशाङ्गीरूपप्रवचनाधारस्य, साध्वादिसमुदायस्य, नमस्कृतिं-प्रणामं, स्वीकृत्य-चोऽप्यर्थे, अङ्गीकृत्यापि, तन्मध्यगा-तीर्थान्तर्वर्त्तिनी श्रुतदेवता न स्तुत्या-स्तवनार्हा न भवतीति वदति। किं कृत्वा?, श्रुत्वापि, किं?, जिनशासनस्यौन्नत्यं-शासनप्रभावनां, कुतः?; श्रीहेमचन्द्रादितः-श्रीहेमचन्द्रसूरिस्त्रिकोटीग्रन्थकर्ता श्रीकुमारपालप्रतिबोधकृत्,स आदिर्यस्य, आदिशब्दात् नवाङ्गीवृत्तिकारकश्रीअभयदेवसूरिप्रमुखयो ग्राह्याः। सततं किंलक्षणात्?; तत्सन्निधेः, सा-श्रुत

देवता सन्निधौ-समीपे सान्निध्यकारितया विवक्षितैककार्य-व्यापारवत्तया यस्यैवंभूतादित्यक्षरार्थः ।

भावार्थस्त्वयं-अर्हदाद्यसाध्यं कार्यं कथं श्रुतदेवतासाध्यमित्याद्यभिप्रायेण तेन श्रुतदेवतास्तुतिर्निषिद्धा । तच्च महाऽज्ञानविलसितं । नहि यो यदपेक्षया प्रबलबलवान् स तत्साध्यकार्यसाधक इति नियमः । अन्यथाऽऽचार्योपाध्यायसाधुसाध्यकार्यस्य तदपेक्षया प्रबलबलवदर्हत्साध्यत्वेन 'नमो अरिहंताण'मित्येकपदात्मकस्यैव नमस्कारस्य जापः प्रसज्येत । तस्मात्-स्वस्वसाध्यकार्ये सर्वेषामपि प्रबलबलवत्त्वं, वैपरीत्ये च दुर्बलत्वमेव यथागमं बोध्यम् । लोकेऽपि प्रदीपादिसाध्यं सूर्येण साधयितुमशक्यं दृष्टं, उक्तं च-"विश्वान्धकारविध्वंस-हेतुर्हेलिर्महानपि । नालं प्रदीपवद्भूमि-गृहान्तस्तमसोऽपहृत्" ॥१॥ इत्यादि । युक्तिविस्तरस्तु मत्कृतषोडशश्लोकीवृत्तितोऽवसातव्य इति काव्यार्थः ।

॥ इति गतस्त्रिस्तुतिकः ॥

अथ काव्यपञ्चकेन क्रमागतं लुम्पाकमतं दूषयितुं तावत्तस्य विश्वासघातिनः केवलिगम्यमेवोत्पत्तिस्थानं दिदर्शयिषुः काव्यमाह—

विश्वाच्यर्क्रम ! हे महाजडजनव्यामोहकृद्दुर्गिरा,
त्वद्बिम्बार्चनदोषदर्शनपराऽपुण्याक्षराक्षूणया ।
षड्जीवेष्वनुकम्पयाऽऽर्द्रहृदयोऽस्मीति ब्रुवाणो बहिर्विश्वास्य प्रतिघातको हतघृणः किंयोमिमाकीभवेत् ॥२२॥

व्या०—हे विश्वार्च्यक्रम !-जगदर्चनीयचरण !, हतघृणो-लुम्पाकः कियोनिभावी। का-चासौ योनिश्च कियोनिः, कियोनौ भविष्यतीति कियोनिर्भाविनी यस्य वा स कियोनिभावी भवेदित्यन्वयः। किंलक्षणः ?, प्रतिघातकः-सन्मुखघाती शरणतया स्वमाश्रितस्य हन्तेति यावत्। किं कृत्वा ?, विश्वास्य-विश्वासं जनयित्वा, किं कुर्वाणः ?, षड्जीवेष्वनुकम्पयार्द्रहृदयः-क्लिन्नचेतस्कोऽस्मीति बहिर्बाह्यवृत्त्यैव ब्रुवाणः, पुनः किंलक्षणः ? महाजडजनव्यामोहकृत्। महाजडजनो-महामूर्खलोकः तस्य व्यामोहं करोतीति महाजडजनव्यामोहकृत्। कया ?, दुर्गिरा-श्रोतॄणामनन्तापद्धेतुत्वेन पापभाषया, किंलक्षणया ?, त्वद्बिम्बार्चनदोषदर्शनपराऽपुण्याक्षराक्षूणया-त्वद्बिम्बार्चने-तव मूर्तिपूजायां, दोषदर्शने-पुष्पाद्यारम्भसम्भवेनेदं सावद्यत्वान्न जिनोपदिष्टमित्यादिरूपेण दोषाऽऽविष्करणे, पराणि-तत्पराणि यान्यपुण्याक्षराणि-अपवित्राक्षराणि पापवर्णा इतियावत्, तैरक्षूणा-सम्पूर्णा तयेत्यक्षरार्थः।

भावार्थस्त्वयं-कियोनिभावी भवेदित्यनन्तपापकारित्वेन कस्यां योनावयमुत्पत्स्यते इति स्तोतृप्रश्नेन केवलिनामेव गम्यं यदनन्तदुःखविपाकस्थानं सूक्ष्मनिगोदादि, तत्रैवाऽस्योत्पत्तिः सूचिता। शेषं सुगममिति काव्यार्थः॥

अथाऽस्योन्मत्तकेलितां दर्शयन् द्वितीयं काव्यमाह—

**नद्युत्तारपुरोविहारकरणं वाचंयमानां जिनाऽऽ-**
**देशः पेशलमुत्तरं विरचयन्नर्हन्नपीति प्रभो !।**

पूजाऽणुव्रतिनोऽर्हतां न कुसुमैर्युक्ता जिनेत्यावदन्;
मद्याशीव तव द्विषन्नहह वै वैरूप्यभागीक्ष्यताम् ॥२३॥

व्या०—हे अर्हन्! हे प्रभो! हे जिन! अहह खेदे, वै निश्चितं। तव द्विषन्-लुम्पाकनामा तव वैरी मद्याशीव-मद्यपानिवदित्यर्थः। वैरूप्यभाग्-वैरूप्यमसङ्गतजल्पनादिचेष्टया वैसदृश्यं भजत इति वैरूप्यभाक्, ईक्ष्यतां-दृश्यतामित्यन्वयः। मद्यपानिचेष्टामाह-किं कुर्वन्?, अणुव्रतिनः-श्राद्धस्याऽर्हतां-भगवतां कुसुमैरुपलक्षणाच्चन्दनादिपरिग्रहः, तैः पूजा न युक्तेत्यमुना प्रकारेणाऽऽवदन्-मूर्खजनेभ्यो ज्ञापनाय वचसा ब्रुवाणः, अपीति विरोधे। पुनः किं कुर्वन्?, विरचयन्-विकल्पयन्, किं?, पेशलमुत्तरं-मनोहरं प्रतिवचः, कथम्?, इति-अमुना प्रकारेण, तत्प्रकारो यथा-नद्युत्तारपुरोविहारकरणं। नद्या उत्तार-उत्तरणं पुरो यस्त्वेवंविधो विहारो-ग्रामानुग्रामविचरणं वाचंयमानां-सर्वविरतीनां, जिनादेशो-जिनाज्ञेत्यक्षरार्थः।

भावार्थस्त्वयं-प्रत्याख्यातसर्वसावद्ययोगानां संयमाऽऽराधनत्वेन नद्युत्ताराविनाभावी विहारस्तावज्जिनाज्ञा, अनाज्ञा चाणुव्रतिनामपि सम्यक्त्वनैर्मल्यहेतुः पुष्पाद्यविनाभाविनी जिनपूजेतिविरोधः, जीवविराधनासम्भवस्योभयत्र तौल्यात्। ननु नद्युत्तारादौ न पुनः पुनः करणस्पृहानुमोदनादि, पूजायां तु तद्वैपरीत्यमिति कुतस्त्यं तौल्यमिति चेत्, उच्यते-नहि वयं पूजायां पुष्पादिविराधनाऽनुमोदनीयेति ब्रूमः, किन्तु पुष्पाद्यविनाभाविनी पूजाऽनुमोदनीया स्पृहणीया च। तथा साक्षान्नद्युत्ता-

राद्यननुमोदनेऽपि तदविनाभावी विहारस्त्वनुमोदनीयः स्पृहणीयश्च, अन्यथा जिनाज्ञा न स्यात्। यद्वा कार्येच्छूनां कारणेच्छुत्वनियमादितिन्यायात् विहारहेतुनद्युत्तारादावपि स्पृहादि स्वीकर्तव्यमेवेत्यलं प्रपञ्चेन। तथा च सति विहारो जिनाज्ञा, न पुनर्जिनपूजेति जल्पनं मद्यपानिजल्पनमिव पूर्वापरसङ्गतिविकलं सकलजनप्रतीतमेव। शेषं सुगममिति काव्यार्थः॥

अथ अर्थापत्त्या वेश्याजनपूजाप्रकाशकस्याऽस्य कलिकालतुलामाविष्कुर्वन् काव्यमाह—

चार्वी चन्दनचम्पकादिकुसुमैर्नार्चा सदर्च्यक्रम !,
त्यागीशस्य दिशन्नहो ! जडसभाशृङ्गारभूतः स्वयम्।
अर्थानर्थविवेकदृग्विरहितो वेश्याजनं पूजय,-
न्नर्थान्मूर्खजनं ह्यवातरदयं कालः कलिर्मूर्तिमान् ॥२४॥

व्या०—हे सदर्च्यक्रम ! उत्तमजनपूज्यपाद !, अहो आश्चर्ये। अयं लुम्पाकनामा अमूर्तोऽपि कतिचिज्जनानां महापापकर्मानुभावात् कालः कलिर्दुःषमाकालो मूर्तिमानऽवातरत्-अवतीर्ण इत्यन्वयः। किंलक्षणः ?, अर्थानर्थविवेकदृग्विरहितः-अर्थश्चानर्थश्च तयोर्विवेको-विवेचनं यस्या एवंविधा या दृग्-ज्ञानलोचनं तया विरहितः-शून्यः। पुनः किंलक्षणः ?, जडसभाशृङ्गारभूतः-मूर्खपर्षदलङ्काररूपः। किं कुर्वन् ?, दिशन्-कथयन् कथं ?, चन्दनचम्पकादिकुसुमैस्त्यागीशस्य अर्हतोऽर्चा-पूजा न चार्वी-न शोभनेति, अत्रेतिरध्याहार्यः। अर्थात्-अर्था-

पत्त्या, पुनः किं कारयन् ?, मूर्खजनं-स्वप्रतिबद्धविश्वासिजनं अत्यागित्वेन वेश्याजनं प्रति पूजयन्-पूजां कारयन्, भो लोक ! त्यागित्वेन भगवतोऽर्चा न चार्वीत्यर्थादत्यागित्वेन वेश्याजनं पूजयतु भवानित्युपदिशन्नित्यक्षरार्थः ।

भावार्थस्त्वयं-यदि त्यागित्वेन भगवतः कुसुमादिना पूजा न युक्ता, युक्ता तर्हि अत्यागित्वेन वेश्याजनस्यैव पूज्यता । यथा दिवाऽभोजिनो देवदत्तस्य पीनत्वान्यथानुपपत्त्या रात्रिभुक्ति र्व्यक्तीभवति । कलिकालतुल्यता तु पूज्यस्य भगवतोऽपूज्यत्वमपूज्यस्य च वेश्याजनस्य पूज्यत्वं दर्शयतः स्फुटमेवेति काव्यार्थः ॥

अथ निराम्नायप्रवचनार्थकरणेनोपमयोपहसन् काव्यमाह—

**पेटा वज्रमयी रदैरिव महामुद्राङ्किता दुर्मते-**
**रुन्मुद्रीकरणोद्यतस्य दशनव्यापत्तिहेतुर्हित ! ।**
**गम्भीरार्थमिदं तव प्रवचनं व्याख्योद्यतस्याऽऽत्मधी-**
**क्लृप्त्या वृत्तिपरम्पराद्यपमतेर्युक्तं द्विषोऽध्वच्युतेः ॥२५॥**

व्या०—हे हित ! जगन्मित्र ! अध्वच्युतेः-जैनमार्गभ्रष्टस्य द्विषः, इदं तव प्रवचनं-आचाराङ्गादिशास्त्रं, दशनव्यापत्तिहेतुः-दन्तपातनिदानं युक्तमेवेत्यन्वयः । किंलक्षणस्य तस्य ?, आत्मधीक्लृप्त्या-स्वबुद्धिकल्पनया, व्याख्योद्यतस्य-व्याख्यां कर्तुमुद्यतस्य, दुर्मतेर्धृष्टधियः, वृत्तिष्टीका, परम्परा-गुरुक्रमः, ते आदिर्येषां भाष्यचूर्ण्यादीनां ते वृत्तिपरम्परादयस्तत्राऽपगता मतिर्यस्य तस्य दन्तपातनिदानं युक्तमेव । केवेत्युपमयति-वज्रमयी-

वज्रसम्बन्धिनी, पेटेव-मञ्जूषेव, कस्य ?, उन्मुद्रीकरणोद्यतस्य। उन्मुद्रीकरणमुद्घाटनं तत्रोद्यतस्य, कैः कृत्वा ?, रदैः-दन्तैः, पेटा किंलक्षणा ?, महामुद्राङ्किता। महामुद्रा-वज्रतालकं तयाङ्किता-चिह्नीकृता दत्ततालकेत्यर्थ इत्यक्षरार्थः। भावार्थस्त्वयं यथा प्रतिताल्या बहुपरिचितमर्मज्ञैरपि दुरुद्घाट्या महामुद्राङ्किता वज्रमयी पेटा दन्तैरुद्घाटयितुमुद्यतस्य दन्तपातहेतुर्भवत्येव, तथा तव प्रवचनमपि बहुपरिचितव्याकरण-साहित्य-तर्क-ज्योतिष्काद्यनेकग्रन्थाभ्यासपरिकर्मितमेधानां पुरस्कृतगुरुक्रमनिर्युक्तिवृत्त्याद्याम्नायानां विदुषामपि दुरधिगम्यं स्वकृतमतिकल्पनया व्याख्यानयितुर्लुम्पाकस्य इहलोके विद्वत्पर्षदि पार्षद्यैर्दन्तपातो विधीयते एव। परलोके च तत्प्रवचनं नरकादिपातहेतुरिति। एवं गुरुक्रमादिशून्यानां शून्यचित्तानामन्येषामपि स्वधिया व्याख्यानोद्यतानामियमेव गतिर्बोध्येतिकाव्यार्थः।

अथ प्रवचनार्थस्यान्यथा प्ररूपणादैहिकफलोपदर्शनद्वारा पारत्रिकफलमुपदर्शयन् काव्यमाह—

**प्रायः प्राकृतसंस्कृताशनरतिः स्त्रीवस्त्रवाष्पानकृद्,**
**व्युच्छिष्टान्नविगानवानगपहृन्नाम्नापि निन्द्यश्रुतिः।**
**दुर्वेषी विमुखीह ते प्रवचनाच्चेन्नाऽभविष्यद् द्विषन्,**
**धर्माऽधर्मफलं फलेक्षणपरोऽद्राक्षीदमुत्रापि कः ? ॥ २६॥**

व्या०—हे अगपहृत् !, अगपो-मेरुस्तद्वदकम्प्यं हृद् यस्य स अगपहृद् तस्य सम्बोधनं हे अगपहृत् ! दुर्वेषी-जैनवेषांश-

धारित्वात् न जैनवेषी न वा शैववेषी, किन्तु नरशरीरावयव-शिरःपाण्यादिमद्भूप्रदेशवद्बिभत्सवेषधारित्वात् दुर्वेषी, जैन-प्रवचनपराङ्मुखत्वात् विमुखी, लुम्पाक इति नामश्रवणादेव लोकानामप्रीतिसम्भवान्नाम्नापि निन्द्यश्रुतिः चेत्-यदीहाऽपे-ऽर्यवहितसम्बन्धात् इहापि-इहलोकेऽपि तव प्रवचनादर्थादन्यथा प्ररूपणात् प्रायः प्राकृतसंस्कृताऽशनरतिः। प्रायो-बाहुल्येन, प्राकृताः-रजकादयस्तैः संस्कृतं-निष्पादितं राद्धमितियावत्। यदशनादिस्तत्र भोज्यत्वेन रतिर्यस्य स, निन्द्यकुलभिक्षाटन-लम्पट इत्यर्थः। तथा स्त्रीवस्त्रवाष्पानकृत्। स्त्रीणां वस्त्राणि-शाटकतदान्तरपटकञ्चुकादीनि तेषां वाः-पानीयं प्रक्षालनजलं स्त्रीवस्त्रमलाविलजलमित्यर्थः। तस्य पानं करोतीति पानकृत् पापीत्यर्थः। तथा व्युच्छिष्टान्नविगानवान्। व्युच्छिष्टं-भुक्ता-वशिष्टं अर्द्धभुक्तपरित्यक्तान्नं वाऽनेन हेतुभूतेन विगानवान्-लोकनिन्दनीयो नाऽभविष्यत्, कस्तर्हि फलेक्षणपरो ऐहिकपार-त्रिकफलविलोकनतत्परो, धर्माधर्मफलममुत्र-परलोकेऽद्राक्षी-दित्यन्वयमुखेनैवाक्षरार्थः।

भावार्थस्त्वयं-हे अर्हन्! यद्ययमिहलोक एव निन्दितान्न-पानादिनैव क्लृप्तैकवृत्तिर्नाभविष्यत्तर्हि परलोकेऽपि धर्माधर्म-फलं कोऽद्राक्षीत्-दृष्टाऽभविष्यन्न कोऽपीति काव्यार्थः॥ इति गतो लुम्पाकः॥

अथ काव्यद्वयेन कटुकमतमाविश्चिकीर्षुर्निर्गुरुत्वफलोप-दर्शकं काव्यमाह—

ही हीनो गुरुणा गुरुप्रभुरणानध्वश्रवास्साश्रवा,
साधुश्रेणिरिति प्रकल्पितमतिः सम्प्रत्यसावीक्ष्यते ।
दुर्ल्लक्ष्या क्षितिमण्डले कटुफलैकासक्तिसेव्यः कटु-
र्युक्तस्तीर्थमपार्द्धमक्षिविषयं दुर्वावदन्नल्पधीः ॥२७॥

व्या०—हीति खेदे । सम्प्रति-वर्तमानकालेऽसावध्यक्षसिद्धो गूर्जरावनिप्रभृतिषु दृश्यमाना साधुश्रेणिः साश्रवा-साधुगुण-रहिता, ईक्ष्यते-दृश्यते, इत्यमुना प्रकारेण प्रकल्पितमतिः कटुः-कटुक इत्यनिष्टनामा युक्त इत्यन्वयः । किंलक्षणः ? क्षितिमण्डले कटुफलैकासक्तिसेव्यः । कटुफलानि-नरकादिगतिवेद्यदुष्कर्मजन्यदुःखानि, तेष्वेवैका-अद्वितीया आसक्तिः-कारणानुमेया लुब्धता येषां ते कटुकफलैकासक्तयस्तैः सेव्यः-सेवनार्हः, पुनः किंलक्षणः, ? दुर्ल्लक्ष्मा-दुष्टलक्षणधरः, पुनः किंलक्षणः ? अल्पधीर्बुद्धिविकलः, किं कुर्वन् ? दुर्वावदन्-मूर्खपर्षदि कुत्सितं भृशं वदन्, किं ? तीर्थं-साधुसाध्वीश्रावकश्राविकालक्षणं, कीदृशम् ? अपार्द्धं-अपगतं अर्द्धं साधुसाध्वीलक्षणं यस्मात्तदेवंविधमक्षि-विषयं-इन्द्रियगोचरमिति-एवं दुर्वावदन्, कुत इति विशेषणद्वारा हेतुमाह-यतः स किंलक्षणः ? गुरुणा हीनः-गुरुरहितः अनुपा-सितगुरुकुलविज्ञान इत्यर्थः । गुरुहीनोऽपि कुत इति विशेषण-द्वाराहेतुमाह-यतः स किंलक्षणः, ? गुरुप्रभुस्तीर्थकृत् तस्य रणः-शब्दो द्वादशाङ्गीरूपप्रवचनं तस्यानध्वा-अपथः श्रवसी-श्रोत्रे यस्य । यद्वा गुरौ-गुरुतत्त्वप्रसाधने प्रभवः समर्थास्ते च ते रणा-

श्च शब्दा गुरुप्रभुरणास्तेषामनध्वा श्रवसी यस्य । यद्वा गुरुप्रभ-वो-गीतार्था गुरवस्तेषां रणः-शब्दस्तस्याऽमार्गः-कर्णौ यस्य स, सद्गुरुवचनसूच्यविद्धकर्ण इत्यर्थः । इत्यक्षरार्थः ।

भावार्थस्त्वयं-"भूए अत्थि भविस्संति केइ तेलुक्कनमिअकम-जुअल"त्ति वचनात् अस्मिन् भरतक्षेत्रे दुप्पसहं यावत् त्रैलोक्य-नमस्कृतक्रमयुगलानां साधूनां सदैव सद्भावेऽपि नहीदानीं साध-वोऽस्मद्दृग्गोचरीभवन्तीति वदन् निर्गुरुत्वेन जात्यन्धपुरुषवत् स्वपृष्ठिविलग्नानां महासङ्कटपातहेतुत्वेन कटुक इत्यनिष्टनामा युक्त एवेति काव्यार्थः ॥

अथोत्सूत्रभाषिणस्तावत्प्रायोऽनन्तानुबन्धिमायोदयिन एव भवन्तीति द्वितीयकाव्येन मायित्वमाह—

**पापात्मा प्रतिमाऽर्हतामभिनमस्कार्याऽथ पूज्या च तत्**
**प्रोच्याऽपि प्रतिपक्षतामभिदधन्मायाविमुख्यः क्षितौ ।**
**यद्यद्धर्ममत्राप्यमुक्तिपदवीवीथी भवेत्पूजिता,**
**तं धर्मं प्रतिषेधयत्यधिपते ! साधुप्रतिष्ठात्मकम् ॥२८॥**

व्या०—हे अधिपते ! तत्तस्मात्कारणात् पापात्मा कटुकः क्षितौ-पृथिव्यां मायाविमुख्यो-मायाशीलशेखरो मन्तव्य इत्य-ध्याहार्यः इत्यन्वयः । मायाविमुख्यः किं कुर्वन्, ? अर्हतां-प्रतिमा नमस्कार्याऽथ च पूज्या, इतिगम्य इत्यमुना प्रकारेण प्रोच्याऽपि-भाषित्वाऽपि, प्रतिपक्षतां-तद्वैपरीत्यमभिदधन्-ब्रुवाणः । अथ मायावित्वं दर्शयति-तस्मात् कुतः ? यद्यस्मात् यद्धर्म-यश्चासौ

धर्मश्च यद्धर्मस्तं, अवाप्य-प्राप्य, पूजिता प्रतिमा मुक्तिपदवीवीथी भवेत्-मोक्षपदमार्गः स्यात्, तं धर्मं साधुप्रतिष्ठात्मकं प्रतिषेधयति-प्रतिषेधं करोतीति णिज्विधानात् प्रतिषेधयतीति बोध्यं। अन्यथा भ्वादिगणात् प्रतिषेधतीत्येव स्यादित्यक्षरार्थः।

भावार्थस्त्वयं-कटुकेन जिनप्रतिमायास्तावदाराध्यत्वं वचोमात्रेण स्वीकृतम्, परं यं धर्मं पुरस्कृत्य सा पूजार्हा भवति, स साधुप्रतिष्ठात्मको धर्मो नाङ्गीकृतोऽतोऽन्तवृत्या न पूज्येति श्रद्धानान्मायावीति। यत्र कुपाक्षिकतिलकस्तिलकाचार्यः स्वाभिनिवेशात् श्रावकप्रतिष्ठाव्यवस्थापनाय स्वकपोलकल्पिते प्रतिष्ठाकल्पे भूतात्त इव यत्तत्प्रलपन् जिनबिम्बप्रतिष्ठा श्रावकेणैव कर्त्तव्या द्रव्यस्तवरूपत्वात् सावद्यत्वादेवेत्याद्यनुमानादिकं प्रकल्पितवान्, तन्न युक्तं। तत्रानुमानस्य तावत्पक्षधर्मतादिप्राणवियुक्तत्वेन निर्जीवकलेवर इवेप्सितार्थसाधकत्वाभावात्।

ननु पक्षधर्मतादिराहित्यं कथमितिचेत्, उच्यते-जिनबिम्बप्रतिष्ठा श्रावकेणैव कर्त्तव्या द्रव्यस्तवरूपत्वादित्यत्र प्रतिष्ठाया द्रव्यस्तवत्वाऽभावेन शब्दाऽवृत्तिचाक्षुषत्वादिहेतुरिव हेतुः स्वरूपाऽसिद्धः। प्रयोगो यथा-प्रतिष्ठा न द्रव्यस्तवः, प्रतिष्ठाप्यविषयकक्रियाविशेषत्वात् प्रतिष्ठाहेतुभूतक्रियात्वाद्वा प्रतिष्ठाप्यप्रतिमाया नेत्राद्याकारनिर्मापणवत्। व्यतिरेके च प्रतिष्ठितप्रतिमाविषयकपूजाभिप्रायपुरस्सरपुष्पाद्यारोहणं। किंच-द्रव्यस्तवाऽनर्हत्वमप्यप्रतिष्ठितप्रतिमायाः, उक्तं च—"शरीरमिव निर्जीवं, निर्विद्य इव सत्सुतः। निर्नेत्रमिव सद्वक्त्रं, निष्पुत्रमिव-

सत्कुलम् ॥ १ ॥ विना जलं सर इव, व्योमेव गतभास्करम्। अप्रतिष्ठं तथा बिम्बं, नैवमर्हति चारुताम् ॥२॥ इति श्रीशत्रुञ्जयमाहात्म्ये। अनुमानप्रयोगोऽपि यथा-अप्रतिष्ठितप्रतिमा न द्रव्यस्तवार्हा, भावस्तवाऽनर्हत्वात्, अन्वये सुवर्णादि, व्यतिरेके च भगवानर्हन् सुसाधुर्वा। भावस्तवानर्हत्वं तु प्रतिष्ठावैफल्यप्रसङ्गभयेन तिलकाचार्येणापि स्वीकृतम्, कथमन्यथा स देवानांप्रियः स्वकपोलकल्पितप्रतिष्ठाकल्पेऽपि प्रतिष्ठाकरणक्रियाविधौ पूर्वप्रतिष्ठितप्रतिमायाः पुरस्तादेव देववन्दनादिक्रियामुपदिष्टवान्। नच देवनिर्मितप्रतिमायां हेतोर्भागासिद्धिरंशतो बाधश्चेति शङ्कनीयं, तादृक्प्रतिमायाः पक्षाऽनन्तर्भूतत्वात् तदाराध्यत्वगतिश्चाग्रे वक्ष्यते। तस्मात् प्रतिष्ठिताया एव प्रतिमायाः पूजाभिप्रायपुरस्सरपुष्पादिहेतुकक्रियाविशेषो द्रव्यस्तवो, नान्यथा। अन्यथा गौतमादिगणभृन्मस्तके वासनिक्षेपं कुर्वतो भगवतो-वीरस्यापि द्रव्यस्तवकृतिः प्रसज्येत। एवं सत्प्रतिपक्षितमपि-जिनबिम्बप्रतिष्ठा न श्राद्धकृत्यं, यतिकृत्यं वा, साध्वनुष्ठानयोग्यप्रतिष्ठाप्यक्रियाविशेषत्वात्, साधूनामेवागमे निर्दिष्टत्वाद्वा, स्थापनाचार्यप्रतिष्ठावदाचार्यादिपदप्रतिष्ठावद्वा। व्यतिरेके यत् श्राद्धस्यैव कृत्यं तन्न साध्वनुष्ठानयोग्यप्रतिष्ठाप्यक्रियाविशेषः साधुकर्तव्यतया जिनोपदिष्टं वा यथा द्रव्यस्तवः। किञ्च-साध्यव्यापकसाधनाव्यापकरूपरमण्याराध्यत्वमुपाधिरपि। किञ्च-श्रावकेणैवेति विशेष्यसंगतैवकारेणाऽन्ययोगव्यवच्छेदे सति श्रावकव्यतिरिक्ताऽकर्तव्यतासाध्ये तन्मताभिप्रायेणांशतो

बाधोऽपि। तेन हि देवानांप्रियेण स्त्रीणामपि प्रतिष्ठायामधिकारो दर्शितः, कथमन्यथा 'पाण्डवमात्रे'त्यादिना स्वकपोलकल्पितप्रतिष्ठाकल्पे निदर्शनमकारि। किञ्च-मुग्धजनविप्रतारकचतुरचेतस्कचामुण्डिकचतुरताया अप्यस्य चतुरता तु वाग्गोचरीकर्तुमप्यशक्या। यतः स्त्रीजिनपूजोच्छेदकत्वेन तेन चामुण्डिकवराकेनाबला एव वंचिताः, अनेन तु दुरात्मना जगदुत्तरसाहसमवलम्बमानेन त्रिजगत्पूज्याचार्यसंबन्धिप्रभुताधनं छित्वा दत्वा च स्त्रीभ्यस्ताश्चौर्यमाश्रित्य महापराधिन्यश्चक्रिरे। किंचागमबाधोऽपि, आगमे साधूनामेव प्रतिष्ठाया दृष्टत्वात्। तथाहि-श्रीसिद्धसेनदिवाकर-श्रीउमास्वातिवाचक-श्रीहरिभद्रसूरि-आर्यश्रीसमुद्राचार्य-श्रीप्रभाकरप्रभृतिप्रणीतप्रतिष्ठाकल्पास्तावदाचारप्रतिपादका ग्रन्थास्तेषु सर्वत्रापि 'सूरिः प्रतिष्ठां कुर्यादि'त्याद्यर्थप्रतिपादकवाक्यानामेव प्रयोगो, न पुनः श्राद्धः प्रतिष्ठां कुर्यादिति प्रयोगः। तथा पादलिप्ताचार्यविरचितनिर्वाणकलिकायामपि प्रतिष्ठाधिकारे 'सूरिः प्रतिष्ठां कुर्यादि'त्याद्येव प्रयोगः। एवमाचरितप्रतिपादकग्रन्था यथा—

"प्रतिष्ठामर्हतां यो हि, कारयेत्सूरिमन्त्रतः।
सोऽर्हत्प्रतिष्ठां लभते, यथा चापस्तथा फलं" ॥१॥ इति

बृहति श्रीशत्रुञ्जयमाहात्म्ये। तथा

"सर्वतीर्थोदकैः सर्वौ-षधिभिर्देवताहृतैः।
शास्त्रोक्तविधिना भूपः, प्रतिष्ठामप्यकारयत्" ॥१॥
वासाक्षताः सूरिमन्त्रे-णाभिमन्त्र्य पवित्रिताः।

क्षिप्ता ध्वजेषु दण्डेषु, चैत्यबिम्बेषु सूरिभिः ॥१॥ इति "सप्त-सप्तचतुः ४७७ सङ्ख्ये, गते विक्रमवत्सरे" इत्यादित्रयोदशश्लोकोपलक्षिते लघुनि श्रीशत्रुञ्जयमाहात्म्ये,। तथा तत्रैव-

"एवं सिंहनिषादाख्यं, प्रासादं भरताधिपः।

कारयित्वा प्रतिष्ठाप्य, जिनांश्चापूजयत्ततः" ॥१॥ इत्युक्तलघु श्री श० अष्टापदप्रासादप्रतिष्ठाधिकारे। तथा

"केवल्येष स्वयंबुद्धः, श्वेताम्बरशिरोमणिः।

कर्ता प्रतिष्ठिां कोऽप्येषु, पुण्यानामुदयस्तव ॥१॥

ततश्चावन्तिनाथेन, प्रार्थितः कपिलो मुनिः।

प्रत्यष्ठात्प्रतिमां मन्त्रपूतचूर्णानिति क्षिपन्" ॥२॥ इति श्रीहेमाचार्यकृतश्रीमहावीरचरित्रे एकादशसर्गे। तथा "प्रतिष्ठाप्य जिनेन्द्राणां, प्रतिमा निर्मिता नवाः। विधिना सूरिमन्त्रेण, गुरुणा ब्रह्मचारिणे"ति सम्यक्त्वकौमुद्यां तृतीयप्रस्तावे तृतीयकथायां। एवं श्रीऋषभचरित्रादिष्वप्यनेकेषु ग्रन्थेषु भरतादीनां श्रीनाभसूरिप्रभृतिभिः प्रतिष्ठाकारयितृत्वेन प्रयोगो दृश्यते, न पुनः स्वयं प्रतिष्ठाकर्तृत्वेन प्रयोगः। किञ्चार्बुदाचलादितीर्थेष्वपि शिलापट्टकोत्कीर्णवर्णपङ्क्तिषु नवाङ्गीवृत्तिकारक—श्रीअभयदेवसूरिसन्ताने श्रीधर्मघोषसूरिभिः श्रीशान्तिनाथबिम्बं प्रतिष्ठितमित्यादिश्रीनेमिनाथप्रासादे पश्चिमदिग्व्यवस्थितश्रीशान्तिनाथदेवकुलिकाप्रशस्तौ। एवं जीर्णप्रतिमास्वपि अमुकसूरिभिः प्रतिष्ठितमिति लिखितं दृश्यते, न पुनरमुकश्रावकेणेति दृश्यते। तस्मात् प्रतिष्ठाप्यप्रागभावावच्छिन्नसमयवर्त्य-

त्यक्रियारूपा प्रतिष्ठा साधुभिरेवानुष्ठेया, आगमे साधूनामेवोपदिष्टत्वात्, प्रव्रज्याप्रदानवत्। व्यतिरेके च जिनस्तववदिति। ननु कुमारनन्दिसुवर्णकारजीवेन विद्युन्मालिदेवेन निर्मिता श्रीमहावीरप्रतिमा साधुप्रतिष्ठाया असम्भवेन देवेनैव प्रतिष्ठिता कथं प्रभावत्यादिभिः पूजिता ? इति चेत्, मैवं देवेनैव प्रतिष्ठितेत्यत्र मानाभावात्। ननु तर्हि साधुनैव प्रतिष्ठितेत्यत्रापि किं प्रमाणम् ? इति चेत्, उच्यते-चेत् प्रतिष्ठिता, तर्हि साधुनैव। नहि भरतादिक्षेत्रवर्तिसाधवो देवानां दुर्लभाः, अन्यथाऽऽगमबाधप्रसक्तेः। ननु तर्हि गौरवाल्लाघवं न्याय्यमितिन्यायात् तथाविधदेवनिर्मितप्रतिमायाः प्रतिष्ठाया अभाव एव कल्प्यतामितिचेत्। सत्यं, यदि क्वापि व्यक्तिर्नोपलभ्यते तर्हि तथासंभावनापि ज्यायस्येव, देवतार्पितरजोहरणमुखवस्त्रिकादिवेषविशिष्टसाधोरिव देवनिर्मितप्रतिमायाः प्रतिष्ठामन्तरेणापि पूजार्हत्वसम्भवात्, दिव्यानुभावस्य तथास्वभावत्वात् शाश्वतस्वभावात् शाश्वतप्रतिमावदिति। परं साधुवेषार्पणमिव गृहस्थप्रतिष्ठा त्वनिष्टैव। किञ्च-सम्यग्दृष्टिदेवानामवधिज्ञानित्वेनाऽऽगमव्यवहार्य्यन्तर्भूतत्वादपि नान्यैस्तदपेक्षा समीक्षणीया। आगमव्यवहारिणो हि श्रुतव्यवहारप्रवर्तितं प्रतिपद्यन्ते, न पुनस्तदनुसारेण प्रवर्त्तन्ते। श्रुतादिव्यवहारापेक्षयाऽऽगमव्यवहारस्य बलीयस्त्वात्। न च व्यवहारपञ्चकं साधूनामेवेतिशङ्कनीयं, यथासम्भवमन्येषामपि श्रवणात्। कथमन्यथा भृगुकच्छवननिवासियक्षस्य धारणाव्यवहार उक्तः। केवला-

वधिज्ञाने तु गृहस्थावस्थायामपि कूर्मापुत्रानन्दादीनां प्रतीते एवेति। एवं दिव्यानुभावविशेषादन्यास्वपि प्रतिमास्वायोज्यं। एतेन सावद्यत्वादिहेतुरपि श्राद्धप्रतिष्ठाव्यवस्थापको भविष्यतीति शृगालकदाशाऽपि परास्ता, प्रतिष्ठायाः सावद्यरूपत्वाभावेन हेतोः स्वरूपासिद्धत्वात्। सावद्यत्वाभावस्तु सुवर्णशलाकादिनेत्रोन्मीलनरूपप्रतिष्ठाख्यान्त्यक्रियालक्षणायाः प्रतिष्ठाया यतिकृत्यत्वेन तीर्थकृद्भिः साधूनामेवोपदिष्टत्वेन च साध्यः। प्रयोगस्त्वेवं-उक्तरूपो जिनप्रतिष्ठा न सावद्यरूपा, साधुकृत्यत्वात् साधूनामेव जिनोपदिष्टत्वाद्वा, आचाराङ्गादिसूत्राध्ययनवत्। किञ्च-सावद्यत्वहेतुर्मत्स्यबन्धादिकर्मणि व्यभिचार्यपि। एवं व्यतिरेकव्याप्तिग्रहेऽपि यद्यत् श्रावककृत्यं न भवति तत्सावद्यं न भवतीत्यपि नास्ति, श्राद्धप्रतिष्ठा प्रवचनोक्तेत्येवंरूपेण तिलकाऽऽचार्यदत्तालीकप्रवचनकलङ्कदानवत्। कलङ्कलेशाकलङ्कितस्यापि जैनप्रवचनस्य अलीककलङ्कदानं तु श्राद्धकृत्यं न भवति, तथा तत्सावद्यमपि न भवतीति न, तस्य महासावद्यरूपत्वात्। ननु तिलकाऽऽचार्येणाऽलीककलङ्कदानमकारि तत्कथमिति चेत्, उच्यते-प्रायो लघुवैयाकरणानामपि भिन्नार्थत्वेन प्रतीतानां प्रतिष्ठा १ स्थापन २ प्रतिष्ठापन ३ स्थापना ४ शब्दानामेकार्थतां प्रकल्प्य कुकल्पनाचक्रवर्तिना तिलकाऽऽचार्येण पञ्चाशकहरिवंशादिग्रन्थानां सम्मतितया निदर्शनं चक्रे, तच्च ग्रीष्मकालाऽऽतपोपतप्तपिपासिनां पुंसां जलाशयधावतां मृगतृष्णेव न समीहितार्थसम्पादकं, विचार्यमाणस्य तस्य मेकलकन्यकायाः कूले

तालहिंतालयोर्मूले सुलभाः पिण्डखर्जूराः सन्तीति विप्रतारक-वाक्यवदर्थाप्रापकत्वेन विशीर्यमाणत्वात्, असत्यस्य च तादृग् स्वभावत्वात्। उक्तं च –

"यथा यथा विचार्येत, विशीर्येत तथा तथा।
असत्योक्तं बही रम्यं, नान्तः खरपुरीषवत् ॥ १ ॥ इति

तद्विचारणे च प्रतिष्ठाशब्दस्थापनशब्दयोरन्योऽन्यं पर्याय-भाक्त्वं किं व्युत्पत्त्या कविरूढ्या वा ?। नाद्यो, भिन्नार्थाभिधा-यिकाया व्युत्पत्तेः सर्वेषामपि वैयाकरणानां प्रतीतत्वात्। नापि द्वितीयः, प्रतिष्ठाशब्दस्थापनशब्दयोरेकार्थवाचकत्वेन कविरूढेर-भावात्। यद्यप्येतौ केवलावनेकार्थौ तथापि नान्योऽन्यं पर्याय-भाजिनौ। ननु तर्हि प्रकृतप्रकरणेऽनयोः को भेदः ? इति चेत्, उच्यते-प्रतिष्ठाशब्दस्तावत् प्रतिष्ठाप्यहेतुभूतक्रियाविशेषवाचकः, स्थापनशब्दः पुनराधाराधेयभावसम्बन्धनिबन्धनक्रियाविशेष-वाचकः, क्रमेण कविप्रयोगोऽपि-"ततश्चावन्तिनाथेन, प्रार्थितः कपिलो मुनिः। प्रत्यष्ठात् प्रतिमां मन्त्र-पूतचूर्णान् विनिक्षिप"॥ न्निति श्रीवीरचरित्रे। एवं शत्रुञ्जयमाहात्म्यादावपि। तथा स्थापनशब्दस्य कविप्रयोगो यथा—

"तदा नदीप्रवाहेण, पाटिताद्विकटात्तटात्।
युगादिदेवप्रतिमा, प्रकटाऽभूत् प्रभावयुग् ॥ १ ॥
तां प्रेक्ष्य हर्षयुक्तोऽसौ, स्नपयामास वारिणा।
पीठं कृत्वा मृदोत्तुङ्गं, स्थापयामास तत्र तां" ॥ २ ॥

इति श्रीविमलनाथचरित्रे।

तथा "उम्मग्गनिवारणयं, सम्मग्गठावणं च भव्वाणं।
एमाइ जं विहिअं, अणुमोए हं तमप्पहिअं ॥ १ ॥"ति श्री-आराधनापताकायां। किञ्च-स्थापनशब्दप्रतिष्ठाशब्दयोरन्योऽन्यं पर्यायतां कल्पयन् तिलकाऽऽचार्य एव स्वाभिमतार्थसिद्धये स्वकल्पितप्रतिष्ठाकल्पस्य स्थापनकल्प इत्येवाभिधानं कथं न दत्तवान्? । तस्मात् सान्वर्थाभिधायकप्रतिष्ठाकल्पनैव तिलकाऽऽचार्योऽप्यपर्यायरूपतां वदन् तटादर्शिशकुन्तपोतन्यायमशिश्रियदित्यलं विस्तरेण। एवं प्रतिष्ठापनशब्दः णिग्प्रत्ययनिष्पन्नत्वेन प्रतिष्ठाप्रयोजककर्तृक्रियाविशेषवाचकः, स्थापनाशब्दस्तु प्रतिष्ठाविषयीभूतो यो जिनबिम्बादिपदार्थस्तस्य वाचक इत्यादि स्वयं बोध्यम्। किञ्च-प्रातरग्राह्यनाम्नोऽस्य तिलकाऽऽचार्यस्याऽनार्यधौर्त्र्यं तावद्धीमन्त एव विदन्ति। यतः स्वकृतावश्यकवृत्तौ—

थूभसय भाउआणं, चउवीसं चेव जिणहरे कासी।
सव्वजिणाणं पडिमा, वण्णपमाणेहिं निअएहिं ॥१॥ति

गाथाया अतिदेशेन व्याख्याऽवसरे भरतः स्वयं प्रतिष्ठितवानिति स्वयमेव दुरात्मा पयसि गुप्ततालपुटविषमिव स्वमतं प्रक्षिप्य भरतेश्वरेण प्रतिष्ठा कृतेत्यावश्यकवृत्तावित्यादिसामान्यवचसा स्वकृतेरेव सम्मतिं दत्तवानिति। अत एव तिलकाऽऽचार्यकृताऽऽवश्यकवृत्तिर्न विदुषां सम्मतेति बोध्यम्। प्रतिष्ठामाश्रित्य स्वमतप्रक्षेपेणैव व्याख्यानात्। ननु तर्हि तावन्मात्रस्यैव तत्त्यागो युक्तो, न पुनः प्रवचनानुयायिनोऽपि सर्वस्येति चेत्, नैवं, निह्नवकृतस्य सर्वस्यापि प्रवचनानुयायित्वाभावात्। उक्तं च—

"जे भिक्खू वा भिक्खूणी वा परपासंडीणं पसंसं करेज्जा, जे णं निह्नगाणं पसंसं करेज्जा, जे णं निह्नगाणं अणुकूलं भासेज्जा जे णं निह्नगाणं आययणं पविसिज्जा, जे णं निह्नगाणं गंथं सत्थं पयं अक्खरं वा परूवेज्जा, जे णं निह्नगाणं संतिए कायकिलेसाइए तवे इ वा संजमे इ वा णाणे इ वा विण्णाणे इ वा सुए इ वा पंडिच्चे इ वा अविबुहमुद्धपरिसामज्झगए सिलाहेज्जा, से विअ णं परमाहम्मिएसु उववज्जेज्जा, जहा सुमती"ति श्रीमहानिशीथे। तस्मान्निह्नवकृतेः सत्यत्वासत्यत्वविवेको बालचेष्टितमेव। उष्णान्नपानीयादिसर्वसामग्र्याः पावित्र्येऽपि सत्कुलीनानां यवनीराद्धान्नस्यापावित्र्यमिव तीर्थकराज्ञावर्त्तिनां निह्नवकृतस्य सर्वस्याप्यसत्यत्वात्। नहि तालपुटविषानुषङ्गि पयः पिबता पुंसा विषानुषङ्गस्त्यक्तुं शक्यते इति। किञ्च-निह्नवकृत्यङ्गीकारे तन्मतोपबृंहणापि कृता भवेत्। तथाच तीर्थकरादीनां प्रत्यनीकतैव। उक्तं च—

"आणाइ अवट्टंतं जो उववुहिज्ज जिणवरिंदाणं।
तित्थयरस्स सुअस्स य, संघस्स य पच्चणीए सो ॥१॥
किं वा देइ वराओ सुट्ठुवि मणुओ धणी विभत्तो वि।
आणाइक्कमणं पुण, तणुअंपि अणंतदुहहेऊ ॥२॥
तम्हा सइ सामत्थे, आणाभट्ठंमि नो खलु उवेहा।
अणुकूलगेअरेहिं, अणुसिट्ठी होइ कायव्वा ॥३॥ इति सन्देह-

विषौषधिप्रकरणे। किञ्चोत्सूत्रवादिकृतग्रन्थादिस्वीकारे सूत्रवृत्तिनिर्युक्तिभाष्यचूर्ण्यादीनां ग्रन्थानां सुविहितपरम्परायाश्चोच्छेदा-

पत्तेरत्यन्तमासमञ्जस्यं प्रसज्येत। दिग्मात्रदर्शनं यथा-तिलकाऽऽचार्यकृताऽऽवश्यकवृत्त्याद्यङ्गीकारे साधुप्रतिष्ठोच्छेदः। तथा च प्राग् प्रदर्शिताऽऽचाराचरितप्रतिपादकग्रन्थानां निर्वाणकलिका-शत्रुञ्जयमाहात्म्य-श्रीमहावीरचरित्रप्रमुखाणां दत्ताञ्जलिरेव स्यात्। तत्र साधूनामेव प्रतिष्ठाया दृष्टत्वात्। तथाऽऽञ्चलिककृताऽऽवश्यकदीपिका-शतपद्याद्यङ्गीकारे श्राद्धानां रजोहरण-मुखपोतिकादिग्रहण-प्रतिक्रमण-द्वयाधिकसामायिककरणाद्युच्छेदापत्तिः। तथा च अनुयोगद्वारसूत्रवृत्तिचूर्ण्यादीनामुच्छेदः प्रसज्येत। तत्र श्राद्धानां रजोहरणादिग्रहणस्योक्तत्वात्, तथा औष्ट्रिकग्रन्थस्वीकारे च स्त्रीजिनपूजा-मासकल्पादिव्युच्छेदः श्रीमहावीरषट्कल्याणकप्ररूपणं श्रावणपर्युषणाकरणादि च प्रसज्येत। तथाच ज्ञातधर्मकथाङ्ग-श्रीस्थानाङ्ग-श्रीहरिभद्रसूरिकृतयात्रापञ्चाशकनिशीथचूर्ण्यादीनामुच्छेदः। तत्र क्रमेण स्त्रीजिनपूजा-मासकल्पकरण-श्रीमहावीरपञ्चकल्याणक-भाद्रपदपर्युषणाकरणानामुक्तत्वात्। औष्ट्रिकग्रन्थास्तु श्रीकल्पसूत्रस्य सन्देहविषौषधिवृत्तिः विधिप्रपा उत्सूत्रपदोद्घाटनकुलं आचाराङ्गदीपिका सङ्घपट्टकसूत्रं तद्वृत्तिश्च गणधरसार्द्धशतकसूत्रवृत्ति-सन्देहदोलावली पौषधविधिप्रकरणं चेत्यादयो बोध्याः। ननु सङ्घपट्टकसूत्रं पौषधविधिप्रकरणं च खरतरमताऽऽकर्षकजिनदत्ताऽऽचार्यस्य गुरुणा जिनवल्लभेन कृतं, तत्कथमौष्ट्रिकसम्बन्धीति चेत्, उच्यते-जिनवल्लभस्य जमालिवदवस्थाद्वयसम्भवेन सङ्घबाह्यावस्थायां ये ग्रंथाः कृतास्ते उत्सूत्रभाषिकृतत्वेन नान्येषां सम्मताः, किन्तु तदपत्यस्य

जिनदत्ताचार्यस्यैव, अतस्तत्सम्बन्धिन एवोच्यन्त इति। तथा लुम्पाकस्य ग्रन्थकर्तृत्वाऽसामर्थ्येऽपि तत्कृतबालचेष्टितगीताभासाद्यंगीकारेऽपि श्रीजिनपतिप्रतिमादीनामप्युच्छेदापत्त्या नमस्कारादिप्रवचनमात्रस्याप्युच्छेदः प्रसज्येत। तत्र सर्वत्रापि श्रीजिनप्रतिमादीनामाराध्यत्वेनोपलम्भात्। ननु श्रीभगवत्यङ्गराजप्रश्नीयोपाङ्गादिषु जिनप्रतिमानामुपलम्भः सुलभः, परं नमस्कारादिप्रवचनमात्रेऽपि कथमिति चेत्, उच्यते-प्रवचनस्थं पदमात्रमप्युपक्रमादिभिश्चतुर्भिरनुयोगद्वारैर्व्याख्येयम्। उक्तं च- "चत्तारि अणुओगदारा पं० तं० उवक्कमो निक्खेवो अणुगमो नओ अ"त्ति श्री अनुयोगद्वारे। तत्रानुगमो द्विधा-सूत्रार्थो निर्युक्त्यर्थश्च। तत्र निर्युक्त्यर्थस्त्रिधा-निक्षेपनिर्युक्त्यर्थ उपोद्घातनिर्युक्त्यर्थः सूत्रस्पर्शिकनिर्युक्त्यर्थश्च। उक्तं च—

"से किं तं अणुगमे २ दुविहे पं० तं० सुत्ताणुगमे निज्जुत्तिअणुगमे, से किं तं निज्जुतिअणुगमे? नि० तिविहे पं० तं० निक्खेवनिज्जुत्ति-अणुगमे उवग्घातनिज्जुत्तिअणुगमे सुत्तफासिअनिज्जुत्तिअणुगमे"ति अनुयोगद्वारे। तत्र तावदुपोद्घातनिर्युक्तिः प्रवचनमात्रस्यापि श्रीआवश्यकसम्बधिनी या साऽवसातव्या, तस्याः प्रवचनमात्रसाधारणत्वात्। तथा च निर्युक्तिमिश्रितद्वितीयव्याख्याने

थूभसयभाउआणं, चउवीसं चेव जिणहरे कासी।

सव्वजिणाणं पडिमा, वण्णपमाणेहिं निअएहिं"ति गाथायामष्टापदे प्रासादप्रतिमाः कारिताः। तथा—

"सुतत्थो खलु पढमो, बीओ निज्जुत्तिमीसिओ भणिओ। तइओ अ निरवसेसो, एस विही होइ अणुओगे"त्ति भगवत्यां पञ्चविंशतितमशतकतृतीयोद्देशकवचनात्। तृतीयव्याख्याने प्रसङ्गाऽनुप्रसङ्गाऽऽगतनिरवशेषार्थकरणे भरतादिचरित्राणामुपादानं प्रसङ्गार्थग्रहणेनाऽनुप्रसङ्गार्थग्रहणेन च प्रतिष्ठाकल्पादीनामप्युपादानम्। तथा च प्रवचनस्थपदमात्रस्याऽप्यर्थकरणेन भरतेश्वरादिभिः प्रतिष्ठा कारिता, कृता च मन्त्रपूतचूर्णादिना श्रीनाभसूरिप्रभृतिसाधुभिरिति नमस्कारादेरपि सिद्धं जिनप्रतिमाप्रबोधकत्वमिति। एवं निक्षेपकरणेनापि स्थापनानिक्षेपे जिनप्रतिमोपलम्भः सुलभ एवेति दिग्मात्रदर्शनं। एवं पाशचन्द्रकृताऽऽचाराङ्गादिबालावबोधादिस्वीकारेऽप्याऽऽयोज्यं। किञ्च निह्नवकृतग्रन्थस्वीकारे निह्नवदीक्षितोऽपि त्वया साधुतया व्यवहर्तव्यः स्यात्तद्वत्तत्प्रतिष्ठितप्रतिमापि पूज्यत्वेन स्वीकर्तव्या स्यात्। तथा च निह्नवाऽनिह्नवयोरभेदापत्त्या प्रवचनमात्रस्याऽप्युच्छेदापत्तिः। नह्येकस्यामुखायां (स्थाल्यां) भोक्तुमुपविष्टयोर्ब्राह्मणचाण्डालयोर्विवेको भवितुमर्हति। लोकेऽपि कुलीनानां शीतलस्यापि चाण्डालकूपजलस्य परित्यागो दृष्टस्तथा शीतकालादावयत्नलब्धोऽपि श्मशानस्थोऽग्निरसेव्य एवेत्यादयो दृष्टान्ताः स्वधियाऽभ्यूह्या इत्यलंविस्तरेणेति काव्यार्थः ॥

इति गतः कटुकः ॥

अथ क्रमागतं वन्ध्यापरपर्यायं सङ्करमतं दर्शयन् काव्यमाह—

त्वद्बिम्बप्रतिबद्धशुद्धहृदयस्कन्धोर्णिकादण्डभृद्,
दृष्ट्वापि प्रतिमाश्रवः श्रवणभृद् बिम्बारिवद् विश्वराट् ! ।
साङ्कर्यं दधदेष वेषविषयं वैषम्यभाग्गुर्वनु-
क्रान्तेः क्रान्तिसमोपमः श्रुतिपथाऽनाकर्ण्यवैवर्ण्यभाग् ॥ २६ ॥

व्या०—हे विश्वराट् ! जगदधिपते ! एष वन्ध्यनामा वैरी श्रुतिपथाऽनाकर्ण्यवैवर्ण्यभाग् वर्तते इत्यन्वयः सुगमः। तत्र श्रुतिपथः-कर्णस्तेनाऽनाकर्ण्यमश्राव्यं यद् वैवर्ण्यं-मूर्खता तस्य भाग्। एष किंलक्षणः ? क्रान्तिसमोपमः। क्रान्तिसमो-ज्योतिःशास्त्रप्रसिद्धो दोषविशेषस्तेनोपमा यस्य स क्रान्तिसमोपमः, कस्याः ? गुर्वनुक्रान्तेर्गुरुपरम्परायाः, यथा क्रान्तिसमो दोषो जन्मादौ बालकाद्युपघातकः, तथाऽयं वन्ध्यो गुरुक्रमोपघातकः। एतत्पदं कुपाक्षिकमात्रस्याऽप्याऽऽयोज्यं। सर्वेषामपि नग्नाट-राकारक्तादीनां नवीनमतप्रवर्तकत्वेन गुरुपरम्पराया अभावात्। पुनः किंलक्षणो ?, वैषम्यभाग्, वैषम्यं-वक्रता तस्य भाग् अनन्तानुबन्धिमायावीत्यर्थः। किं कुर्वन् ?, दधत्, किं ? साङ्कर्यं-परस्परपरिहारैर्भिन्नव्यक्तिनिवेशिनोः धर्मयोरेकत्र समावेशलक्षणां सङ्करतां, किंलक्षणं साङ्कर्यं ?, वेषविषयं, वेषो-नेपथ्यं तद्विषयो यस्य तत्तत्। तदेव विशेषणद्वारा स्पष्टयति—किंलक्षणः 'त्वद्बिम्बे'त्यादि। तव बिम्बेषु प्रतिबद्धं-जिनप्रतिमा जिनवदाराध्येत्येवंरूपेण न्यस्तं, शुद्धं-निर्मलं पापरहितं हृदयं-मनो यैस्तेषां सुसाधूनामर्थात्तद्वेषान्तर्भूतौ यौ स्कन्धोर्णिकादण्डौ

तौ बिभर्तीति त्वद्बिम्बप्रतिबद्धशुद्धहृदयस्कन्धोर्णिकादण्डभृत्। तथा श्रवणभृत्-अर्थात्कर्णाऽऽकारभृत्, किंवत्?, बिम्बाऽरिवत्-जिनप्रतिमापापबुद्धिलुम्पाकवत् बुट्टकर्णाऽऽकारभृदित्यर्थः। किं-कृत्वा?, दृष्ट्वापि, किं? प्रतिमाश्रवः-गौतमादिजीर्णप्रतिमा कर्णाऽऽकारमित्यक्षरार्थः। भावार्थस्त्वयं-वेषेण नो सुसाधुलिङ्गी, न वा लुम्पाकलिङ्गी, किन्तु देशोपादानाद् मिश्रलिङ्गी। प्ररूपणाविषयकमुत्सूत्रं तु प्रायः पूर्णिमीयकादिसमानमेवेति नात्रोपदर्शितमिति काव्यार्थः॥ इति गतो वन्ध्यः॥

अथ क्रमाऽऽगतं विवक्षितकुपाक्षिकदशकेऽन्त्यमेव पाशमतं काव्यद्वयेन दर्शयितुं प्रथमकाव्येन पूजाऽरित्वमाह—

**पूजाऽरिः प्रतिमाऽरिवज्जिनपते! पूजाऽवसाने जने,**
**मिथ्यादुष्कृतमादिशन्नभिमतः पाशस्तपस्व्यङ्गिनः।**
**पञ्चाऽऽचारगतामपीन! न विधौ वादे वदेदर्चनां,**
**मूर्त्यादेः करणं तथा च कुमुनिर्मूर्तिप्रतिष्ठां पुनः॥३०॥**

व्या०—हे जिन! हे इन-स्वामिन्! कुमुनिः-पाशचन्द्रनामा साध्वाऽऽभासः पञ्चाऽऽचारगतामपि-दर्शनकरणीयत्वेन ज्ञानादिपञ्चाऽऽचारान्तर्भूतामपि, अर्चनां-जिनपूजां, तथा मूर्त्यादेः करणं-जिनबिम्बजिनप्रासादादिविधानं, चः—पुनस्तथा मूर्तिप्रतिष्ठां-प्रतिष्ठाख्यस्थापनाजिनक्रियाविशेषं विधौ वादे-विधिवादे न वदेदित्यन्वयः। किंलक्षणः स? अभिमतः आभीरकल्पेषु लुम्पाकादिकुपाक्षिकेषु प्रतीतः। पुनः किंलक्षणः?

पाश इव पाशः, कस्य ?, तपस्व्यङ्गिनः-मृगकल्पप्राणिनः, पुनः किंलक्षणः ? पूजाऽरिः—पूजाद्वेषी, किंवत् ?, प्रतिमाऽरिवत्, लुम्पाकवत्, परं लुम्पाकः प्रकटः प्राकृतजनानामपि ज्ञानगोचरत्वात्, अयं तद्वैपरीत्याद् गुप्तः, परमार्थतो लुम्पाकभ्रातेत्यर्थः। किं कुर्वन् ?, आदिशन्-मूर्खजनेभ्य आज्ञापयन्-जनेलोके मिथ्यादुष्कृतं, क्व ? पूजावसाने पूजाप्रान्ते इत्यक्षरार्थः।

भावार्थस्त्वयं-जिनपूजा श्रावकेण कर्तव्येत्येवंरूपेण विधिवादरूपो जिनोपदेशो न भवतीति पाशचन्द्रकुविकल्पनं। तच्चाऽत्यन्तमसङ्गतं। यतः पूजा दर्शनाऽऽचाररूपा, दर्शनं च सम्यक्त्वं, तच्च संवररूपमेव। उक्तं च-"पंच संवरदारा पं० तं० सम्मत्तं विरती अपमादो अकसातित्तमजोगित्तं"ति श्री स्थानांगे। एतद्वृत्त्येकदेशो यथा-तथा संवरणं-जीवतडागे कर्मजलस्य निरोधनं संवरस्तस्य द्वाराण्युपायाः संवरद्वाराणि मिथ्यात्वादीनामाश्रवाणां क्रमेण विपर्ययाः सम्यक्त्वविरत्यप्रमादाकषायित्वायोगित्वलक्षणाः प्रथमाध्ययनाद्वाच्या इति। तस्य च जिनोपदेश एव। एवं प्रासादप्रतिमादावप्यवगन्तव्यम्। शेषं सुगममिति काव्यार्थः।

अथ स्वात्मानं दृष्टान्तीकृत्याऽन्येषामपि भगवद्वैरित्वं शिक्षयतीत्याविष्कुर्वन् द्वितीयकाव्यमाह—

**निद्रा साधुजनस्य जैनसमये नाऽऽज्ञा प्रमादो यतः,**
**प्रोच्येति प्रतिसेव्य तां च ससुखं स्वर्गापवर्गाध्वनि।**

**भो लोकाः ! किल पश्यत स्फुटमहं सम्प्रस्थितोऽस्मीति वाग्न्योक्त्या जिन ! शिक्षयंस्त्वद्‌रितां**

**विश्वोपमान् व्यंसकः ॥३१॥**

व्या०—असावित्यध्याहारात् असौ व्यंसकः-पाशचन्द्रनामा धूर्तः साध्वाऽऽभासः, विश्वोपमान्। विशिष्टः श्वा-अस्थिभुक् तेनोपमा येषां ते तान् विश्वोपमान्-महास्थिभुक्सदृशजनान् अन्योक्त्या-स्वात्मदृष्टान्तेन स्वकीयमात्मानं दृष्टान्तीकृत्येति-यावत्, त्वद्वैरित्वं शिक्षयन्-शिक्षां ग्राहयन्नस्तीत्यन्वयः। स्वात्म-दृष्टान्तमाह-स किंलक्षणः ?, भो लोकाः ! पश्यताऽहं स्वर्गा-पवर्गाध्वनि स्फुटं यथा स्यात् तथा प्रस्थितोऽस्मि-प्रस्थानं कृत-वानस्मीत्यमुना प्रकारेण वाक्-वाणी यस्य स, किं कृत्वा प्रस्थितः ? (तां) जिनाऽऽज्ञाबहिर्भूतामपि निद्रां, कथं ? ससुखं यथेष्टं यथा स्यात् प्रतिसेव्य-आसेव्य, च-पुनः किं कृत्वा ? प्रोच्य-सम्भाष्य, कथमिति। इतीति किं ? जैनसमये-जिनशासने, साधूनां निद्रा-निद्राकरणम् नाऽऽज्ञा, तत्कुतो ? यतस्तत्प्रमाद इत्यक्षरार्थः।

भावार्थस्त्वयं-भो लोकाः ! यूयं पश्यत-साधूनां निद्राकरणं नाऽऽज्ञा। अहं चानाऽऽज्ञाभूतामपि निद्रां ससुखं प्रतिसेव्य स्व-र्गापवर्गमार्गे प्रस्थितोऽस्मीति वचसा स्वात्मनो जिनाऽऽज्ञाखण्ड-नादेव मुक्तिगामित्वसूचनेनाऽन्येषामपि जिनाऽऽज्ञाखण्डनादेव मुक्त्यवाप्तिर्भविष्यतीति जनेभ्यो ज्ञापयन् दुर्जनजनान् भगव-

द्वैरित्वं शिक्षयतीत्यतो व्यंसको दशमः पाशोऽवसातव्य इति। ननु सम्प्रत्यधिका अपि कुपाक्षिका दृश्यन्ते, तत्कथं दशसंख्या-नियमः? इति चेत्। सत्यं, सतामप्यधिकानामप्रसिद्धनामत्वा-दकिञ्चित्करत्वाच्च तदन्तर्भावादतिरिक्ताऽविवक्षणमिति प्रागे-वोपदर्शितमित्यलं विस्तरेणेति काव्यार्थः ॥इति गतः पाशचन्द्रः॥

अथोद्दिष्टदस्युदशकं निर्दिश्योपसंहारपुरस्सरमाशीर्वादगर्भि-तकाव्यमाह—

**इत्युद्भाव्य निबन्धितानधिकृतान् कक्षाऽम्बरग्राहकान्,**
**दीनान्दीनरवान्निरीक्ष्य भगवंस्त्वत्किङ्कराऽस्मत्पुरः।**
**सद्राज्यं निजधर्मसागरशशी स्वीयेषु पीयूषदृग्,**
**भुञ्जन्नाऽऽरविचन्द्रमा जय जयिष्वस्मादृशेषु प्रभो! ॥३२॥**

व्या० – हे भगवन्! हे प्रभो! त्वं सद्राज्यम्-धर्मराज्यं, आ-रविचन्द्रं-सूर्यचन्द्रमसौ यावत्, भुञ्जन्-पालयन्, आ-सामस्त्येन जय-जीया इत्यन्वयः। किं कृत्वा? निरीक्ष्य-सन्दृश्य, कान्? अधिकृतान्-इमे वैरिण इति विज्ञप्तिद्वारा ज्ञापनायोद्दिष्टान्, किंलक्षणान्,? दीनान्-दीनदशाऽऽपन्नान्, तस्मात् कीदृशान्? दीनरवान्-कारुण्यजनकजनितशब्दान्, क? त्वत्किंकराऽस्मत्पुरः-तव सेवकानामस्माकं पुरस्तात्। अनेन सेवकपुरो दीनदशाप-न्नत्वं वैरिणः सेव्यप्रतापवृद्धिरेवेतिन्यायात्प्रभोरतिप्रतापवृद्धिर-सूचि। दीनत्वं कुत इति विशेषणद्वारा हेतुमाह-यतस्तान् किं लक्षणान्?, उद्भाव्य निबन्धितान्-प्रकटीकृत्य यथापराधं निबद्धान्

अधिकारात्तदभिप्रायमाविष्कृत्याऽऽगमिकयुक्तिभिस्तत्तिरस्कारद्वारा निरुत्तरीकृतान्। अन्येऽपि प्रकटीकृत्य निबद्धा वैरिणो दीना एव भवन्ति, तथाऽमी अपि। उद्भाव्य निबन्धनं कुत इति विशेषणद्वारा हेतुमाह-यतस्तान् किंलक्षणान् ? कक्षाऽम्बरग्राहकान्। कक्षे-वनेऽधिकारात् सुसाधुसङ्गविरहात्मके अम्बरं-वस्त्रं, तच्च सम्यक्त्वात्मकं गृह्णन्तीति कक्षाऽम्बरग्राहकास्तान्। अन्येऽपि तथाभूता निबध्यन्त एव, तथाऽमी अपि। सेवकसाध्यवैरिनिग्रहेषु सेवकेषु-स्वामी सौम्यदृष्टिरेव भवतीति दर्शयति, त्वं किंलक्षणः ? जयिषु-प्रभुप्रतापद्वारा जयशीलेषु, स्वीयेषु-निजसेवकेषु अस्मादृशेषु, पीयूषदृग्-हितकारित्वेन पीयूषवदमृतवद् दृशौ-लोचने यस्य स। अन्योऽपि राजा जयिषु सेवकेषु सौम्यदृग्, तथा त्वमपि। अनेन स्तुतिकर्तरि प्रभोरतिप्रसन्नता दर्शिता। पुनः किंलक्षणः ? निजधर्मसागरशशी, निजः-स्वीयो यो दानादिभेदभिन्नश्चतुर्द्धा धर्मस्तद्रूपो यः सागरः-समुद्रस्तत्र वृद्धिकारित्वेन शशीव-चंद्रवत् निजधर्मसागरशशी। अन्योऽपि राजा निजधर्मा न्यायादयस्तद्रूपो यः समुद्रस्तत्र चंद्रवत् वृद्धिकारी भवतीति। अत्र धर्मसागरेति स्तुतिकर्तुर्नामाप्यसूचि। यद्वा निजः-सेवकत्वेन स्वकीयो यो धर्मसागरः स्तुतिकर्ता तस्याऽऽनन्दकारित्वेन शशीवेति काव्यार्थः॥ इति श्रीविजयदानसूरीश्वरशिष्योपाध्याय-श्रीधर्मसागरगणिविरचितश्रीमहावीरविज्ञप्तिद्वात्रिंशिकावृत्तिः समाप्ता॥

श्रीमत्तपागणनभोऽङ्गणनव्यभानु-
श्रीसूरिराड् विजयदानगुरुक्रमाब्जम्।

संसेव्य भव्यमतिपोतमवाप्य तीर्ण-
शास्त्रार्णवैस्सकलतार्किकसार्वभौमैः ॥१॥
वादैकलब्धजयवादजनप्रसिद्धा-
भिख्यैः कुपाक्षिकमतंगजसिंहनादैः ।
श्रीधर्मसागरसुवाचकशेखराख्यै-
र्द्वात्रिंशिका चरमतीर्थकृतः कृताऽसौ ॥२॥

९ १ ६ १

श्रीविक्रमान्नवरसारसराजवर्षे,
श्रीस्तम्भतीर्थनगरेऽनुपमश्रियाढ्ये ।
तद्बन्धुना विमलसागरसंज्ञितेन,
संशोधिताऽल्पमतिनाऽपि मया स्वबोधम् ॥
त्रिभिर्विशेषकम् ॥३॥

ग्रन्थाऽग्रं ११५० श्रीमहावीरविज्ञप्तिद्वात्रिंशिका सम्पूर्णा ॥



ॐ नमो जिनाय ।

आगमोद्धारक-आचार्यप्रवरश्रीआनन्दसागरसूरीश्वरेभ्यो नमः ।

*महोपाध्याय-श्रीधर्मसागरगणिप्रवरप्रणीता स्वोपज्ञविवरणविभूषिता*

*गुरुतत्त्वप्रदीपदीपिकाऽपरनाम्नी*

# षोडश-श्लोकी ।

प्रणम्याऽऽत्मविदं वीरं, ज्ञानसङ्क्रान्तविष्टपम् ।
श्रीमद्विजयदानाह्वान्, सूरीशान् सद्गुरून् पुनः ॥ १ ॥
व्याकुर्वे षोडशश्लोकीं, स्वोपज्ञामज्ञतापहाम् ।
गुरुतत्त्वप्रदीपस्य, दीपिकां कृतधीमताम् ॥ २ ॥ युग्मम् ॥

इह तावद् निर्विघ्नसमाप्तिहेतु-स्वाभिमतदेवतानमस्कृति-पूर्वकं सहेतुकग्रन्थाभिधेयमाविष्कुर्वंस्त्रिभिर्विशेषकमाह—

श्रीमद्वीरजिनं नत्वा, तत्त्वाऽतत्त्वविवेकिनम् ।
सर्वांश्चोत्सूत्रविच्छेद-त्यक्ताऽऽलस्यान् बहुश्रुतान् ॥ १ ॥
श्रीवीरजन्मनक्षत्र-सङ्क्रातभस्मदुर्ग्रहात् ।
तीर्थाधिपत्यभीष्टस्य, तीर्थस्याऽऽपद्विधायकान् ॥ २ ॥
उद्धृत्य तत उत्सूत्र-भाषिणः कण्टकानिमान् ।
कुण्ठितास्यान् विधास्येऽहं पुनःपीडापराङ्मुखम् ॥ ३ ॥

त्रिभिर्विशेषकम्

व्या०—तत्त्वातत्त्वविवेकिनं श्रीमद्वीरजिनं उत्सूत्रविच्छेदत्यक्ताऽऽलस्यान् बहुश्रुतांश्च नत्वा-प्रणम्य, तीर्थाधिपत्यभीष्टस्य तीर्थस्याऽऽपद्विधायकान् इमान् वक्ष्यमाणान् विद्यमानसन्तान· द्वाराऽध्यक्षान् वा उत्सूत्रभाषिणः कण्टकान् ततः तीर्थादुद्धृत्य पुनः पीडापराङ्मुखं यथा स्यात् तथा कुण्ठताऽऽस्यान् अहं विधास्ये इत्यन्वयः स्वयं योज्यः। श्रीः-चतुस्त्रिंशदतिशयलक्षणा सा विद्यते यस्य स श्रीमान्, विशेषेणेरयति-प्रेरयत्यष्टप्रकारं कर्म यः स वीरः, रागादिजेतृत्वाज्जिनः, वीरश्चासौ जिनश्च वीरजिनः, श्रीमांश्चासौ वीरजिनश्च श्रीमद्वीरजिनः-चरमतीर्थकृदित्यर्थः। तं किंभूतं?, तत्त्वातत्त्वविवेकिनं, तत्त्वं-रजतत्वादिमत्सु रजतादिषु रजतत्वादिमत्त्वं वस्तुनो याथार्थ्यं च अरजतत्वादिमत्सु शुक्तिकादिषु रजतत्वादिमत्त्वं वस्तुनोऽयाथार्थ्यं ते विवेक्तुं शीलमस्येति शीलार्थे इन् विधानात् तत्त्वातत्त्वविवेकिनं, च पुनरर्थे, बहु-प्रचुरं, श्रुतं-श्रुतज्ञानं, येषां ते तान्, किम्भूतान्? सर्वान्-सकलान्, पुनः किम्भूतान्? उत्सूत्रस्य-जिनप्रवचनविरुद्धवचनस्य, विच्छेदो-विनाशो विच्छेदकत्वमिति यावत्। तत्र त्यक्तं परिहृतमालस्यमुद्यमराहित्यमुपेक्षेति यावद् यैस्ते तान्, उत्सूत्रं-जिनप्रवचनविरुद्धम् भाषितुं शीलमस्येत्युत्सूत्रभाषिणस्तान्, किम्भूतान्? आपद्विधायकान्, आपदः-पीडाया विधायका-निष्पादका कर्तृत्वेन हेतव इतियावत्। कस्य? तीर्थस्य-तीर्यते संसारोऽस्मिन् अस्माद्वा तत्तीर्थं-साधुसाध्वीश्रावकश्राविकासमुदायलक्षणम्, तस्येति। किम्भूतस्य तीर्थस्य? तीर्थाधिपत्यभीष्टस्य, तीर्थाधिपतिस्तीर्थकृत्, स च वर्त्त-

मानतीर्थाधिपतित्वेन बुद्ध्यारूढः श्रीमहावीरस्तस्याभीष्टं-वल्लभं पूज्यत्वेनाभिमतं वा तस्येति। उत्सूत्रभाषिणः कण्टकास्तीर्थस्याऽऽपद्विधायकास्तत्कुतः ? श्रीवीरजन्मनक्षत्रसङ्क्रान्तभस्मदुर्ग्रहात्। श्रीवीरस्य जन्मनक्षत्रमुत्तराफाल्गुनी, तस्यां सङ्क्रान्तो-निर्वाणसमये तया संयुक्तो, भस्म इति पदैकदेशे पदसमुदायोपचाराद्भस्मराशिः, स एव दुर्ग्रहो-दुष्टग्रहः-क्रूरग्रहस्तस्मात्, ततः-तीर्थादुद्धृत्य-अर्थात् तीर्थमनुलग्नाः कण्टका इव कण्टकास्तान् पृथक्कृत्वा इमान्-अध्यक्षसिद्धानहं कीदृशान् विधास्ये-निष्पादयिष्यामि ?, कुण्ठिताऽऽस्यान्, कुण्ठितं-कुण्ठीकृतमुत्सूत्रभाषणादिलक्षणान् स्वव्यापारान्प्रत्यसमर्थीकृतमास्यं-मुखं येषां ते तान् विधास्ये। कथं ? पुनः पीडायां पराङ्मुखाः-पुनः पीडां कर्तुमशक्ता-अक्षमा यथा भवन्तीति क्रियाविशेषणमेतदित्यक्षरार्थः।

भावार्थस्त्वयं-ज्ञानादिगुणैः समानत्वेऽपि नाभेयादीन् विहाय श्रीमहावीरस्य नमस्कारो वर्त्तमानतीर्थाधिपतित्वेनाऽऽसन्नोपकारित्वादेव। श्रीमदितिविशेषणेन सामान्यकेवलित्वनिरासः, सामान्यकेवलिनां चतुस्त्रिंशदतिशयलक्षणश्रियोऽसद्भावात्। उत्सूत्रविच्छेदस्यैव प्रकृतत्वेनोत्सूत्रविच्छेदे पूजाज्ञानाऽपायापगम-वचनलक्षणानां चतुर्णां मूलातिशयानां मध्ये वचनातिशयस्यैव प्राधान्यज्ञापनार्थं तत्त्वातत्त्वविवेकिनमितिविशेषणेन स्तुतिद्वारा भगवान् विशेषितः। यद्वा वचनातिशये सति ज्ञानातिशयस्तत्कारणत्वात् सिद्धः। सिद्धश्चाऽवश्यतत्कार्यत्वात्पूजातिशयोऽपि, अपायापगमातिशयस्तु प्रकृते तदर्थमेव

नमस्कृतत्वेन सिद्धः। तथा च सिद्धं मूलातिशयचतुष्टयमपीति। "यो यदर्थे समर्थः स तदर्थं निमन्त्र्य' इति न्यायात् उत्सूत्रविच्छेदस्यैव प्रकृतत्वेन प्रकृते उत्सूत्रविच्छेदोद्यता एवाऽन्येऽपि नमस्कार्याः, अत उत्तरार्द्धेनोत्सूत्रविच्छेदोद्यतानामेव बहुश्रुतानां नमस्कृतिः। कालत्रयवर्त्तिबहुश्रुतग्रहणार्थं 'सर्व्वानि'ति विशेषणम्। बहुश्रुतपदं तु उत्सूत्रविच्छेदोद्यता अपि बहुश्रुतत्वमन्तरेण विफलप्रयासा भवन्तीति तद्व्यवच्छेदार्थं ज्ञेयम्। बहुश्रुता अपि केचित् तथाविधप्रवचनाऽनुकम्पारहिता उत्सूत्रविच्छेदेऽनुद्यता अपि भवन्तीत्यतस्तद्व्यवच्छेदार्थं 'उत्सूत्रविच्छेदत्यक्ताऽऽलस्या'निति विशेषणमिति मङ्गलार्थमभिमतदेवतादिनमस्कृतिरूपश्लोकस्य भावार्थः।

अथ प्रतिज्ञायां सहेतुकग्रन्थाभिधेयमिति यदुक्तं, तत्र द्वितीयश्लोके हेतुसूचकत्वं त्वेवं-'उत्सूत्रभाषिणः कण्टकान् कुण्ठिताऽऽस्यान् विधास्ये'तत्कुत ? इति विशेषणद्वारा हेतुमाह—उत्सूत्रभाषिणः किम्भूतान् ? तीर्थाधिपत्यभीष्टस्य तीर्थस्याऽऽपद्विधायकान्, यतस्ते तथाभूतस्य तीर्थस्याऽऽपद्विधायकास्तत इत्यर्थः। लोकेऽपि शक्तौ सत्यां स्वस्य व्यथाकारिणः शक्तिरिक्ताः कर्त्तव्याः शक्त्यभावे च तत्सम्पर्कस्त्याज्यः।

उक्तं च-कण्टकानां खलानां च, द्विविधैव प्रतिक्रिया। उपानङ्मुखभङ्गो वा, दूरतो वा विसर्जनम्॥ २॥ एवं मैत्रीभावमापन्नस्यापि दस्योर्विश्वासो न युक्तः। उक्तं च—

'न विश्वसेत्पूर्वविरोधितस्य, शत्रोश्च मित्रत्वमुपागतस्य ।
दग्धां गुहां पश्य उलूकपूर्णां,-काकप्रणीतेन हुताशनेन' ॥१॥

इति। आपद्विधायकानामुदयोऽशुभकर्मोदयहेतु-कुग्रहयोगाद् भवतीतिज्ञापनाय 'श्रीवीरे'त्यादिपञ्चम्यन्तम्। ननु श्रीवीरजन्मनक्षत्रसङ्क्रान्तो भस्मराशिनामा दुर्ग्रहः श्रीवीरस्य पीडाकारी भवतु, परं तत्तीर्थस्य कथं? इति चेत्, उच्यते-यथा समर्थपृथिवीपतिं प्रति पीडां कर्त्तुमप्रभविष्णुः प्रत्यर्थी तद्देशनिवासीभ्येभ्यपुत्रादीनामेव पीडाकारी भवति, तथाऽयमपि भगवन्तं प्रत्यसमर्थस्तदाऽऽज्ञावर्त्तितदभीष्टस्य तीर्थस्य पीडाकारीति। भगवन्तं प्रत्यसमर्थस्तु निर्वाणसमये जन्मनक्षत्रसङ्क्रान्तत्वेन विद्यमाने भगवति क्षणमात्रमपि तद्राशिभोगानवाप्तेः। अत एव तीर्थमोहमोहितेन शक्रेण आयुर्वृद्धिकृते विज्ञप्तोऽपि भगवानुवाच-भो शक्र! त्रुटितमायुः केनापि सन्धातुं न शक्यते, मत्तीर्थस्य चाऽवश्यम्भाविनी पीडा। अत एव द्वे वर्षे सहस्रे यावत् साधुसाध्वीनामुदितोदितः पूजासत्कारोऽपि न भवतीति। उक्तं च श्रीकल्पसूत्रे—

जं रयणिं च णं समणे भगवं महावीरे जाव सव्वदुक्खप्पहीणे, तं रयणिं च खुद्दाए भासरासीनाम महग्गहे दोवाससहस्सठिई समणस्स भगवओ महावीररस जम्मनक्खत्तं संकंते। जप्पभिइं च णं से खुद्दाए भासरासी महग्गहे दो वाससहस्सठिई समणस्स भगवओ महावीरस्स जन्मनक्खत्तं संकंते, तप्पभिइं च णं समणाणं निग्गंथाणं निग्गथीण य नोदिओदिए पूयासक्कारे

पवत्तई। जया णं से खुद्दाए भासरासी जम्मनक्खत्ताओ विइक्कंते भविस्सइ, तया णं समणाणं निग्गंथाणं निग्गंथीण य उदिओदिए पूयासक्कारे भविस्सइ'त्ति। इति हेतुसूचकश्लोकस्य भावार्थः।

अथाऽभिधेयाभिधायकश्लोकस्यायं भावः-यथाऽन्येऽपि कण्टका वस्त्रादौ विलग्ना वस्त्रादेः पृथक्कृत्य कुण्ठिताऽऽस्यीकृतास्सन्तः शक्तिरहितत्वात् पुनः पीडापराङ्मुखीभवन्ति, तथाऽमी अपि। प्रमेयं तावदत्र ग्रन्थे-उत्सूत्रभाषिकण्टकानामुद्धारपूर्वकं कुण्ठिताऽऽस्यीकरणमेवेति। ननु उत्सूत्रभाषिणः कण्टकैरुपमिताः, कण्टकानां ह्युद्धारस्तावद्वस्त्रादौ विलग्नानामेव सम्भवति, कुण्ठिताऽऽस्यीकरणं तु लग्नालग्नसाधारणमिति तत्कथं कण्टकैरुपमेति चेत्। उच्यते-वस्त्रादौ लग्नत्वं तावत्तेषां कुयुक्तिमादाय वादायोद्यतत्वम्, तदुद्धारस्तु सुयुक्त्या कुयुक्तेर्निराकरणं, कुण्ठिताऽऽस्यीकरणं तु एते उत्सूत्रभाषिण इति जनेभ्यो ज्ञापनं, तच्च साधारणमेवेति। 'क्रियाऽन्वयि पदं प्रधान'मितिन्यायात् कण्टकानां पुनः पीडापराङ्मुखत्वस्यैव प्राधान्यज्ञापनार्थं 'पुनः पीडापराङ्मुख'मिति क्रियाविशेषणमिति। ननु तीर्थबाधाकारिणामुत्पत्तिर्भस्मराशिकुग्रहयोगादेवेति प्रागुक्तम्। तस्य चैकत्र राशौ द्वे वर्षसहस्रे स्थितिः। अतो वर्षसहस्रद्वयं यावत्प्रवचनपीडाया अवश्यम्भावात् प्रयासमात्रतैव भवत्प्रयासस्येति चेत्। मैवं, यतोऽशुभग्रहस्याप्युपचारेण शुभीकरणात् तद्धेतुकपीडाकारिणां पीडापराङ्मुखीकरणं भवत्येव। उक्तं च—

'प्राणप्रवेशे वहनाडिपादं, कृत्वा पुरो दक्षिणमर्कबिम्बम् ।
प्रदक्षिणीकृत्य जिनं च याने, विनाप्यहःशुद्धिमुशन्ति सिद्धि'
मिति ॥ १ ॥ अयं भावः—यथा ज्योतिःशास्त्रप्रसिद्धकुयोगादशुभभावमापन्नास्तिथिवारनक्षत्रग्रहाश्चिकीर्षितकार्याभिमतदिनशुद्ध्यभावहेतवः सन्तोऽपि जिनपतिप्रतिमाप्रदक्षिणाद्युपचारेण शुभीभवन्ति, तथा भस्मनामा दुर्ग्रहोऽपि भगवद्भक्त्युन्नतचेतसां प्रवचनाऽनुकम्पैकप्रवृत्तिमतां तथाविधप्रयत्नोपचारेण शुभीभवति । तथा च 'कारणाऽभावे कार्यस्याप्यभाव' इति न्यायात् अशुभग्रहहेतुकानां प्रवचनपीडाकारिणामुत्सूत्रभाषिकण्टकानां कुण्ठताऽऽस्यीकरणं भवत्येवेति प्रयाससाफल्यमिति । या च साम्प्रतीनतीर्थस्याऽवश्यम्भाविनी पीडा, सा तूत्सूत्रभाषिणामुत्पत्तिमात्रेणापि सिद्धैवेति न किञ्चिदनुपपन्नमिति । अथाऽस्य ग्रन्थस्य षोडशश्लोकी गुरुतत्त्वप्रदीपदीपिका चेति नामद्वयी । तस्याः सान्वर्थत्वं त्वेवं-षोडशानां श्लोकानां समाहार इति व्युत्पत्त्या षोडशश्लोकशरीरात्मकत्वेन षोडशश्लोकी, गुरुतत्त्वप्रदीपनाम्नो ग्रन्थस्य दीपिकेव गुरुतत्त्वप्रदीपदीपिका, गुरुतत्त्वप्रदीपस्योत्सूत्रकन्दकुद्दालाऽपरपर्यायस्याऽऽधारभूतेत्यर्थः । अयं भावः-यथा तैजसः प्रदीपो वातादिविघ्ननिवारिकायां गृहान्तर्वर्त्तिदीपिकायां स्थितो निर्विघ्नं वेश्म प्रकाशयति, तथा गुरुतत्त्वप्रदीपनामापि यो ग्रन्थः, स षोडशश्लोकीरूपदीपिकायां स्थितः षोडशश्लोक्या संयुक्तः दुर्जनवचनवातादिविघ्नरहितो गुरुतत्त्वं वेश्म प्रकाशयतीत्यभिधेयाभिधायकश्लोकस्य भावार्थः । तथा च व्याख्यातं त्रिभिर्विशेषकमिति ॥ १-२-३ ॥

अथोत्सूत्रभाषिण इत्यत्र यदुत्सूत्रमुक्तं, तत्कस्य ज्ञानविषयो भवतीति दर्शयन् सप्रभेदं विभजंश्चाह—

**उत्सूत्रं तत्त्रिधा वक्ष्ये, जघन्यादिकभेदतः।**
**तत्त्यागोत्सुकमेधावि-मेधाऽऽदर्शैकसङ्क्रमम् ॥ ४ ॥**

व्या०—तत्त्यागोत्सुकमेधाविमेधाऽऽदर्शैकसङ्क्रमं तदुत्सूत्रं जघन्यादिकभेदतस्त्रिधा वक्ष्ये इत्यन्वयः। 'उत्सूत्रभाषिण'इत्यत्र विशेषणद्वारा यत्प्रागुत्सूत्रमुक्तं, तत्त्रिधा-त्रिविधं वक्ष्ये-वाग्गोचरीकरिष्ये, त्रिधा कुतः ?, 'जघन्यादिकभेदतः'। जघन्यमादिर्येषां तानि जघन्यादिकानि-जघन्यमध्यमोत्कृष्टानि, तान्येव भेदास्ततः। किम्भूतं त्रिधाऽप्युत्सूत्रं ?, 'तत्त्यागे'त्यादि, तस्योत्सूत्रस्य त्यागस्तत्त्यागस्तत्रोत्सुका-उद्यताः, मेधाविनः-पण्डितास्तेषां या मेधा-धारणक्षमा बुद्धिः सैवाऽऽदर्शो-दर्पणस्तत्र सङ्क्रमः-सङ्क्रान्तिर्यस्य तत्तदित्यक्षरार्थः। भावार्थस्त्वयं-जघन्यमध्यमोत्कृष्टभेदतस्त्रिधाऽपि वक्ष्यमाणमुत्सूत्रोद्भवभवकूपपातभीरुतया उत्सूत्रपरिहारे समुत्सुका ये पण्डितास्तेषामेव ज्ञानविषयो भवति, न पुनरुत्सूत्रोद्भवकटुकविपाकाऽनभिज्ञपुरुषाणामपीति। विस्मरणशीलबुद्धेर्विषयीभूतमप्युत्सूत्रं सच्छिद्रघटजलवद्विवक्षितफलवन्न भवतीतिज्ञापनार्थं मेधापदोपादानम्। मेधाशब्देन धारणक्षमा बुद्धिरुच्यते। "सा मेधा धारणक्षमे'तिवचनात्। 'तत्त्यागोत्सुके'तिपदं छाद्मस्थिकज्ञानमनन्यचेतसा प्रयुक्तं सत् सम्यग्वस्तुपरिच्छेदकं, नान्यथेति हेतोरुत्सूत्रपरिहारोपेक्षापरायणानां त्रिधाऽप्युत्सूत्रबुद्धिषिषयो न भवतीतिज्ञापनार्थमिति।

अथ त्रिधाऽप्युत्सूत्रं तत्स्वामिद्वारा दिदर्शयिषुराद्योत्सूत्रिणः स्वरूपं श्लोकस्य पूर्वार्द्धेन दर्शयन्नाह—

**तत्राऽऽद्योऽवेत्य तान् लोके, किं ममेति विगीतवाक् ।**

व्या०—तत्र तानवेत्य किं ममेति विगीतवाक् आद्य उत्सूत्री ज्ञातव्य इति पूर्वार्द्धस्यान्वयः। तत्र जघन्यमध्यमोत्कृष्टोत्सूत्रिषु आद्य उत्सूत्री-जघन्योत्सूत्री कः ? यस्तान्-प्रसिद्धोत्सूत्रिणो निह्नवादीन्, अवेत्य-ज्ञात्वा, किं मम स्यात्, न किमपि मदीयं यातीत्युल्लेखेन लोके-सम्यग्दृग्लोके 'विगीतवाक्,' विगीता-निन्द्या वाक्-वाणी यस्य स विगीतवाक्-निन्दितं ब्रूत इत्यर्थः। स जघन्योत्सूत्री ज्ञेय इत्यक्षरार्थः।

भावार्थस्त्वयं-यः कश्चित् वराको निह्नवादीन् उत्सूत्रिणो ज्ञात्वा, य एव तावदुत्सूत्रिणस्त एव दुःखभाजो भविष्यन्ति, नह्येतावता मदीयं किमपि यातीति चेतसि कुविकल्प्य 'न किमपि मदीयं याती'ति सम्यग्दृग्लोके निन्दितं ब्रूते, स प्रवचनानुकम्पारहितो जघन्योत्सूत्री ज्ञेयः। प्रवचनविरुद्धभाषकत्वं चास्य, प्रवचनपीडाकारिणो निह्नवादीन् ज्ञात्वोपेक्षावचनस्य प्रवचने निषिद्धत्वात् । उक्तं च—

'साहूण चेइयाण य पडिणीयं तह अवन्नवायं च ।

जिणपवयणस्स अहियं सव्वत्थामेण वारेति' ॥१॥ त्ति [उप० माला]। नन्वत्र साध्वादिप्रत्यनीकाः सर्वबलेन निवारणीया इत्युक्तं, तच्च युक्तमेव, परं तथाविधबलाभावे तूपेक्षावचनस्यैवोचितत्वात्, स उत्सूत्री कथं स्यात् ? । उच्यते-उपेक्षावचनं

हि ब्रुवाणस्य शेषबलाभावेऽपि वाग्बलस्याऽवश्यंसिद्धत्वेनाऽमी प्रवचनद्वेषिणोऽनन्तसंसारहेतवश्चेत्याद्युल्लेखेन साध्वादिप्रत्यनीकादिनिवारकोऽवश्यं वाक्प्रयोगः कर्त्तव्य एवेति कुत उपेक्षावचनस्यौचित्यं ? तथा च वाग्बले सत्यपि न किमपि मदीयं यातीत्याद्युपेक्षावचनं प्रवचनविरुद्धमिति सिद्धमुपेक्षावचनंवक्तुरुत्सूत्रमिति। यत्तु केचिदमी प्रवचनद्वेषिणोऽनन्तेत्यादिवचोमात्रेण साध्वाद्यहितनिवारणं कुतः ? प्रत्युत द्वेषिण एव कृता भवन्तीति वदन्ति। ते गम्भीरप्रवचनरहस्यानभिज्ञा एव अवगन्तव्याः। यतः शेषवलाऽभावेऽपि तादृग्वचःप्रयोगं कुर्वता तेन तत्साध्यसाध्वाद्यहितनिवारणं कृतमेव। किञ्च-शेषबलापेक्षया वाग्बलस्य गरीयस्त्वात्प्रवचनस्य महानुपकारोऽपि। तत्कथं ? इति चेत्। शृणु-अमी उत्सूत्रिणः प्रवचनद्वेषिणोऽनन्तसंसारिणोऽनन्तसंसारहेतवश्च त्याज्या इत्यादिवाग्विलासेन पूत्कुर्वता प्रवचनभक्तेन ते निह्नवादय आबालगोपालाङ्गनानामपि प्रतीतिविषयीकृता भवन्ति। तथा च बालगोपालाङ्गनादयस्तद्वचनचकिताः सावधानीभूतास्तन्मार्गावलम्बिनो न भवन्ति, तन्मताऽऽश्रयणाऽभावे च न तन्मतवृद्धिः, तद्वृद्ध्यभावे च साध्वादीनां हितमेव, हितं चाहितनिवारणव्याप्तमेवेति सिद्धमहितनिवारणं, महाँश्च प्रवचनोपकारोऽपि। स्तेनाद्याकुलितमार्गं यथावत् ज्ञात्वा बहुजनानां पुरस्तात् पूत्कुर्वाणो बहुजनोपकारी भवतीत्यलं विस्तरेण। यद्यपि कदाचिदनादेयवचनात् कस्यचित्तथाविधलाभो न भवति, तथापि प्रवचनभक्तेरावश्य-

कत्वेन सम्यक्त्वशुद्धिर्भवत्येव। उपेक्षावचने तु तन्मतवृद्धिरेव। यत उपेक्षावचनमाकर्ण्य बालादयो जना जानन्ति-यद्ययं मार्गः केनाऽपि न दूष्यते, तह्यर्यमपि मार्गः सत्य एव। अतस्तन्मार्गाश्रयणमस्माकं श्रेय एवेति निश्चित्य तन्मार्गानुगामिनो भवन्ति। तथा च तन्मतवृद्धिस्तद्वृद्धौ च प्रवचनस्याहितमेवेति स्वयमेवाऽऽलोच्यम्। यच्चोक्तं-प्रत्युत द्वेषिण एव भवन्ति, तदप्यसारं, तादृग्द्वेषस्य विदुषां चेतस्यकिञ्चित्करत्वात्। नहि तादृग्द्वेषेण जगज्जन्तुकरुणारसार्द्रीकृतचेतस्काश्चतुरचेतसस्तदुपेक्षापरायणा भवन्ति। नहि कटुकाद्यौषधप्रयोगेण रोगातुराणामप्रीतेरि-[रप्री] त्युपेक्षाद्युपहतचेतोवृत्तयः सद्वैद्या भवन्तीति। ननु वयं सुहृद्भावेन पृच्छामः-यदि कदाचित्तथाविधवचःप्रयोगेण प्रवचनेऽनर्थोत्पत्तिर्भवति तदा किं कर्त्तव्यं ? इति चेत्। सत्यं, तथाविधक्षेत्रकालादिसामग्रीवशात् तद्धेतुकाऽनर्थोत्पत्तिर्भाविनी यदि नियमेन स्वज्ञानविषयीभवेत्, तर्हि तत्क्षेत्रकालाद्यवच्छेदेन मौनमेव कर्त्तव्यं, नतूपेक्षावचनवता भाव्यं। उपेक्षावचनं हि निह्नवं प्रत्यनुकूलभाषणं, तच्च प्रवचने निषिद्धमेव। उक्तं च श्रीमहानिशीथे—

'जे भिक्खू वा भिक्खुणी वा परपासंडीणं पसंसं करेज्जा, जे आवि निह्नगाणं पसंसं करेज्जा, जे आवि निह्नगाणं अणुकूलं भासेज्जा, जेआवि निह्नगाणं आययणं पविसिज्जा, जे आवि निह्नगाणं गंथं सत्थं पयं अक्खरं वा परूवेज्जा, जे णं निह्नगाणं संतिए कायकिलेसाइए तवे इ वा संजमे इ वा नाणे इ वा विण्णाणे-

इ वा सुए वा पंडिच्चे इ वा अविबुहमुद्धपरिसामज्झगए सिला-हेज्जा से वि य णं परमाहम्मिएसु उववज्जेज्जा । जह सुमति'त्ति । न तावत्तज्जातीयहेतुकां क्वाप्यनर्थोत्पत्तिं दृष्ट्वा तत्दृष्टान्तावष्टम्भेन सर्वक्षेत्रकालाद्यवच्छेदेनाऽसतीमाशङ्क्याऽपि मौनं कर्त्तव्यम् । नहि शक्रस्तुतिहेतुकमभव्यसुरकृतं श्रीमहावीरोपसर्गमालोक्य तन्निदर्शनेन सर्वत्राऽप्यसदाशङ्कया पुनः शक्रोऽन्यो वा कोऽपि भगवद्गुणनिबद्धैकचेता भगवद्गुणग्रामस्तुतौ मौनमाश्रयते, न वा भगवत्स्तुतिं कुर्वाणं कञ्चित् कश्चिदपि प्रतिषेधति । नहि लोकेऽपि तथाविधजठराग्निसामग्र्यभावात् परमान्नहेतुकव्यथामापन्नं कञ्चित् पुरुषं दृष्ट्वा तद्दृष्टान्तेन सर्वैरपि तत्परिह्रियते, इत्यादिदृष्टान्ता लोकसिद्धा अपि चेतसि चिन्त्याः । मौनमपि प्रवचनापेक्षयाऽवगन्तव्यं, नत्वाऽऽत्मापेक्षया ।

'तवापि प्रतिपक्षोऽस्ति, सोऽपि कोपादिविप्लुतः ।
अनया किंवदन्त्यापि, किं जीवन्ति विवेकिनः' ? ॥ १ ॥

[ वीतरागस्तवः ] इति वचनात् । अत्र सूत्रे लोकशब्देन जिनप्रवचनं मदीयमिति प्रवचने ममताबुद्धिमान् सम्यग्दृष्टिसमूहात्मको विवक्षितः । तेन तथाविधं ब्रुवाणं कञ्चित्कश्चिदज्ञानी वीतरागोपमया प्रशंसयन्नपि न दोषाय । यतः सोऽप्युपेक्षावचोवक्त्रृसदृशत्वात् प्रथमोत्सूत्र्येव गीयते गीतार्थैरिति । नन्वयं प्रथमोत्सूत्रिसदृशः कथं ?, इति चेत् । ममताभावेनाङ्गीकारार्हे जैनप्रवचने ममताबुद्धिरहितस्य तस्य तत्त्वार्थश्रद्धान-

मेव न भवति, तदभावे च नोपशमादयो भावाः। उक्तं च ( प्रमाणनय ) तत्त्वालोकालङ्कारे-'न सन्त्यस्योपशमप्रभृतयो भावास्तत्त्वार्थश्रद्धानाऽभावा'दिति। उपशमादिभावाऽभावे च स न रागद्वेषविलयः। उक्तं च आगमे—

'उवसमेण हणे कोहं, माणं मद्दवया जिणे।

मायं चज्जवभावेण, लोभं संतोसओ जिणे ॥ १ ॥ [दशवै०]

त्ति। तथा च रागद्वेषवन्तमप्युपेक्षावचनवक्तारं प्रति वीतरागत्वेन प्रणयन् सिद्धः प्रथमोत्सूत्र्येवेति। ननु निह्नवादीन् उत्सूत्रिणो निरीक्ष्य न किमपि मदीयं यातीत्युपेक्षावाग्मी प्रवचने ममताबुद्धिरहितः कथं ?, इति चेत्। उच्यते-प्रवचने ममताबुद्धिमत उपेक्षावचनमेव न सम्भवति। नहि लोकेऽपि चौरादिभिर्धनादिना रिक्तीक्रियमाणं गृहमालोक्य गृहे ममताबुद्धिमान् गृहपत्यपत्यं कोऽपि न किमपि मदीयं यातीतिरूपेणोपेक्षावाग्मी भवेत्। किन्तु यथासामर्थ्यं तद्वित्रासनाद्युपायमेव रचयति। तथाविधक्षेत्रकालादिसामग्र्यभावाच्च मौनमवलम्बमानोऽप्यवसरमासाद्य पुनरुद्यत एव भवेत् तदपहृतधनादिमोचनोपाये इति भावः। ननु प्रवचने ममताबुद्धिरहितस्य तस्य तत्त्वार्थश्रद्धानमेव न भवतीति यदुक्तं, तच्चायुक्तमेव, प्रवचने ममताबुद्धिरहितानामपि प्रवचनबाह्यानां तत्त्वार्थश्रद्धानश्रवणात्। उक्तं च—'सेअंबरो य आसंबरो य बुद्धो य अहव अन्नो वा।

समभावभाविअप्पा लहइ मुक्खं न संदेहो' ॥ २ ॥ त्ति।

अत्र समभावभावितात्मनां दिगम्बरबौद्धादीनामपि तत्त्वज्ञाना-

विनाभाविमोक्षाऽवाप्तिकथनेन तत्त्वज्ञानमुक्तमेव, तच्च तत्त्वार्थ-श्रद्धानं जनयत्येव, क्षपणादयस्तु प्रवचनबाह्यास्तेषां च कुतो ममताबुद्धिरिति चेत्। मैवं, तत्त्वज्ञानात् खल्वाराध्यत्वेन जैनप्रवचनममताबुद्धेरावश्यकत्वात्। अयं भावः-समभावजन्यं हि तत्त्वज्ञानं हेयोपादेयज्ञेयवस्तुषु हानोपादानोपेक्षाबुद्धिजनकत्वेनैव सफलं, अन्यथा तत्त्वज्ञानस्यैवाऽभावात् कुतस्तत्त्वार्थश्रद्धानम् ?। यतस्तत्त्वज्ञानं तावत्प्रमाणात्मकमेव भवति, तस्य च लक्षणं स्वपरव्यवसायात्मकमेव 'स्वपरव्यवसायि ज्ञानं प्रमाण' मितिवचनात्। तस्य च स्वरूपं हेयोपादेयज्ञेयवस्तुषु परिहार-स्वीकारोपेक्षाक्षमत्वमेव 'अभिमताऽनभिमतवस्तुस्वीकार-तिरस्कारक्षमं हि प्रमाण'मिति वचनात्। तथा च हेये-नरकादिपात-हेतुत्वेनात्मनोऽनर्थकारित्वान्नेदं मदीयमित्यममत्वरूपेण परिहार्ये धनधान्यमित्रपुत्रकलत्रकुप्रवचनाद्यनर्थे तावदममत्वरूपेण परिहारबुद्धिः सिद्धा, सिद्धा चोपादेयेऽनन्ताऽऽनन्दसम्पादकत्वेनात्मनोऽर्थकारित्वादाराध्यत्वेनेदं मदीयमिति ममतारूपेण स्वीकारार्हे जिनप्रवचनाद्यर्थे ममत्वरूपेण स्वीकारबुद्धिः, उपेक्षाबुद्धिश्चार्थानर्थकारित्वाभावात् तृणादिषु बोध्येत्येवंरूपेण तत्त्वज्ञानसिद्धौ सिद्धं जिनप्रवचने ममताबुद्धिरेव तत्त्वार्थश्रद्धानमिति। अत एव समभावः समता-तत्त्वबुभुत्सूनां तत्त्वज्ञानहेतुभूतरागद्वेषराहित्यरूपं माध्यस्थ्यं, तेन भावितस्तन्मयीभूत आत्मा येषां ते समभावभावितात्मान इत्यर्थवद्विशेषणविशिष्टा एव नग्नाटादयो मुक्तिभाजो भवन्तीति निगदितम्। एतद्विशे-

षणेन द्रव्यतोऽन्यतीर्थिका अपि द्रव्यस्याऽप्राधान्याद् भावतो जिनोक्ततत्त्वार्थश्रद्धानभाज एव मुक्तिभाजो भवन्तीति भावस्य प्राधान्यं सूचितं, प्रवचने भावस्यैव प्राधान्यात्। अत एव सुसाधु-श्रावक-संविग्नपाक्षिकास्त्रयोऽपि भावतो जिनोक्ततत्त्वार्थश्रद्धानादेव मुक्तिपथगामिनः। शेषाश्च गृहिलिङ्ग-कुलिङ्ग-द्रव्यलिङ्गधारिणस्त्रयोऽपि मिथ्यादृष्टयः संसारपथगामिनः।

उक्तं च-सावज्जजोग-परिवज्जणाइ सव्वुत्तमो जईधम्मो।
बीओ सावगधम्मो तइओ संविग्गपक्खपहो ॥१॥
सेसा मिच्छद्दिट्ठी गिहिलिंग-कुलिंग-दव्वलिंगेहिं।
जह तिन्नि य मुक्खपहा संसारपहा तहा तिन्नि ॥२॥
संसारसागरमिणं परिब्भमंतेहिं सव्वजीवेहिं।
गहियाणि य मुक्काणि य अणंतसो दव्वलिंगाइं॥३॥ [उप०माला]

इति। अत्र मिथ्यादृष्टिकुलिंगग्रहणात् सम्यग्दृष्टिकुलिङ्गी तावदम्बडवत् श्रावकेऽन्तर्भवतीति बोध्यम्। ननु किं तत्त्वज्ञानस्याहेतुभूतं रागद्वेषसाहित्यरूपमप्यन्यत् किञ्चिन्माध्यस्थ्यमस्ति?, येन तत्त्वज्ञानहेतुभूतेत्यादिविशेषणाऽन्वितं माध्यस्थ्यमुक्तमिति चेद्। अस्त्येव, तथाहि-रागद्वेषयोर्मध्ये तिष्ठतीति व्युत्पत्त्या मध्यस्थो-द्विविधः। उक्तं चोत्सूत्रकन्दकुद्दालापरपर्याये गुरुतत्त्वप्रदीपे—

'यद्रागद्वेषयोर्मध्ये, तिष्ठतीत्युच्यते बुधैः। मध्यस्थः स द्विधा-तु स्यान् मिथश्च बृहदन्तरः ॥३॥ अस्य वृत्तिः-यत्-यस्मात् कारणात्, रागद्वेषयोर्मध्येऽन्तस्तिष्ठति-विद्यते इत्यनेन कारणेन बुधैर्विद्वद्भिर्मध्यस्थ उच्यते-भण्यते, तु-पुनः स मध्यस्थो द्विधा-वक्ष्य-

माणनीत्या द्विप्रकारः, स्याद्-भवेत्, मध्यस्थस्य द्वौ भेदौ स्यातामित्यर्थः। स द्विप्रकारः कथम्भूतो? मिथः-परस्परं, बृहदन्तरो-मोक्षसंसारवन्महाऽन्तरः इति। मध्यस्थस्य भावो माध्यस्थ्यं। तदपि स्वामिभेदाद् द्विविधम्। तत्राद्यं माध्यस्थ्यं तस्यैव स्याद्यो यथावद्वस्तुस्वरूपं विचिन्तयन् किञ्चिदपि पक्षमकक्षीकृत्य न-रागं वा द्वेषं स्पृशेत्, किन्तु वामदक्षिणपार्श्ववर्त्तिनौ रागद्वेषावस्पृशन्नेव तयोरन्तरालस्थितः सन् वस्तुतत्त्वं यथावद्विचारयेत्। उक्तं च उत्सूत्रकन्दकुद्दाला०—

'आद्यो न रागं न द्वेषं, स्पृशेत्तत्त्वं विचिन्तयन्। उच्यतेऽतस्तयोर्मध्ये, तद्भावमये स्थितः ॥४॥ अस्य वृत्तिः-आद्यः-प्रथम-मध्यस्थस्तत्त्वं-देवगुरुधर्मलक्षणम्, विचिन्तयन्-विमृशन् न रागं स्पृशेत्, न द्वेषं स्पृशेत्, अतः-अस्मात्कारणात् तयो-रागद्वेषयोर्मध्येऽन्तराले स्थित उच्यते। कथम्भूते मध्ये? तद्भावमये, तयो-रागद्वेषयोरभावोऽसत्ता, तन्मयं-तद्रूपं यत्तस्मिन् रागद्वेषाऽसत्तारूपे इत्यर्थः। किमुक्तं भवति-वामदक्षिणयोः पार्श्वयोः स्थितौ रागद्वेषौ संत्यज्यान्तरालस्थित एवासौ तत्त्वं विचिन्तयेदिति मध्यस्थो भण्यते। आद्यमध्यस्थस्य स्वरूपं चेदं-रागद्वेष-राहित्यरूपसमताभावेन सम्यग्वस्तुपरीक्षणम्। ततश्च तत्त्वज्ञानं। तत्त्वज्ञानाच्च हरिहरादिकुदेवादेर्देवत्वादिना श्रद्धानुरूपमतत्त्वं परित्यज्याऽर्हदादिदेवादेर्देवत्वादिना श्रद्धानरूपं तत्त्वमेवाश्रयेत् उक्तं च उत्सूत्र०—अतत्त्वविषमुत्सृज्य, तत्त्वाऽमृतमसौ श्रयेत्।

विवेकी शुक्लपक्षश्च, राजहंस इवामलः ॥५॥ अस्य वृत्तिः-

पूर्वार्द्धं स्पष्टम्। विवेचनं विवेकः, स विद्यते यस्यासौ विवेकी तथा शुक्लपक्षः-सम्यग्दृष्टिरागमभाषया शुक्लपाक्षिको भण्यते, राजहंस इव निर्मलः। सम्यग्दृष्टिपक्षे मलम्-पापं। राजहंसोऽपि विषम्-पानीयमुत्सृज्य अमृतं-दुग्धमाश्रयेत्। सोऽपि विवेकी भवेत्, शुक्लपक्षश्च-श्वेतपक्षश्च। एवं द्वितीयमाध्यस्थ्यमपि तस्यैव ज्ञेयम्, यो वस्तुतत्त्वं विचिन्तयन् न रागं नवा द्वेषम् त्यजेत्, किन्तु प्रथमतः कुपक्षं कक्षीकृत्य रागद्वेषाऽऽवृतत्वेन रागद्वेषौ स्पृशन्नेव तन्मध्यस्थितो वस्तुतत्त्वं विचारयेत्। उक्तंच—

गुरुत०-द्वितीयो न त्यजेद्राग-द्वेषौ तत्त्वं विचिन्तयन्।

उच्यतेऽतस्तयोर्मध्ये, तत्स्वरूपमये स्थितः ॥६॥ अस्य वृत्तिः-स्पष्टः। नवरं-यत्रैव रागद्वेषौ तत्रैवास्यावस्थानमतस्तत्स्वरूपमये-रागद्वेषस्वरूपमये मध्ये स्थितोऽसौ भण्यते। द्वितीयमध्यस्थस्य-च स्वरूपमिदं-रागद्वेषसाहित्यरूपमाध्यस्थ्येन सम्यग्वस्तुपरीक्षणम् न भवति, तस्माच्च न तत्त्वज्ञानं, तत्त्वज्ञानाभावे च प्रागुक्तं-तत्त्वं परित्यज्यातत्त्वमेवासौ श्रयेद्। उक्तं च-उत्सूत्र०—

कुपक्षोऽयं विवेक्तुं न, क्षमः खिन्नो विलक्षधीः।
मध्यस्थोऽहमिति क्लृप्त-विकल्पोऽतत्त्वमाश्रयेत् ॥७॥

अस्य वृत्तिः-अयं-असौ रागद्वेषमये मध्ये स्थितः कुपक्षः पूर्णिमीयकादिः, विवेक्तुं-तत्त्वातत्त्वे पृथक्कर्तुं न क्षमो-समर्थो-भवेत्। अत एव खिन्नः-खेदमापन्नो, यत एव खिन्नस्तत एव विलक्षधीः, विलक्षा-लक्षरहिता धीः-बुद्धिर्यस्याऽसौ विलक्षधीर-तत्त्वं-पूर्णिमादेश्चतुर्दश्यादेश्च सामाचारीमाश्रयेत, उभयाऽऽ-

चारवान् भवेदित्यर्थः । किंविशिष्टो ? मध्यस्थोऽहमिति क्लृप्त-विकल्पः-अहं मध्यस्थ इत्यमुना प्रकारेण क्लृप्तः-स्वचेतसि विरचितो, विकल्पः-सन्देहो, येन स, यतो लौकिको लोकोत्तरो वा मिथ्यादृष्टिर्विपरीतं विश्वस्वरूपं प्रवाहपतित एव श्रद्दधाति । प्रवाहश्रयणं च सन्देहरूपमेव । यतोऽसौ निजमनसस्सन्देहे भाण्डागारित एव लोकप्रवाहं तत्त्वबुद्ध्यांगीकृत्य विश्वस्वरूपं विपर्ययावबोधेन स्वचेतसि निश्चिनोति । अतो लोकप्रवाहस्य गताऽनुगतिकत्वेनातत्त्वरूपतया तदपेक्षो निश्चयोऽप्यस्य सन्देह एव, ऊहने सति स्वचेतसि खुडक्कनात्, कोमलवचसा युक्तिपृच्छायां किमपि न ज्ञायते इत्यस्यैवोत्तरस्य दानात् । ततो मध्यस्थोऽहमि त्यसावप्यभिप्रायोऽस्य सन्देहरूप एव । सम्यग्दृष्टेः पुनरन्तर्गत-युक्तिनिरीक्षितं विश्वस्वरूपं करतलमुक्तमुक्ताफलवच्चेतसि प्रतिभाति । सम्यग्दृष्टिरपि कदाचित्किञ्चिद्वचनमपरीच्छन् कश्चिदर्थमाश्रित्य भाण्डागारितसन्देहस्सन् यथा जिनागमान्यतरवचनानि सत्यानि, तथेदमपि वचनं सत्यमिति जिनागमाऽन्यतरपरिष्टवचनानुलग्नो यत इदं संघेन मतं ततो मयापि मतमितिसङ्घमार्गानुलग्नो चेत्यनेनैवाल्पावबोधेन तद्वचनं स्वचेतसि निश्चनोति । जिनागमवचनप्रवाहस्ततो मार्गप्रवाहस्तयोस्तत्त्वरूपत्वेन तदा तदनुलग्नत्वमेवार्थमार्ग इत्यस्य निश्चयो निश्चय एवार्वाक्पुनस्स निश्चयो यथावस्थिततत्त्वस्य संक्षेपावबोधो भण्यते । कालान्तरेण तदर्थमार्गपरिज्ञानेन भाण्डागारितसन्देहस्य व्यपगमात् । एतेन यः कश्चित्तत्त्वातत्त्वे समदृशा पश्यति, स एव

समभावभावितात्मा मोक्षाधिकारीति वदति । सोऽपि परास्तः । यतस्तत्त्वातत्त्वे समदृशा पश्यतोऽतत्त्वाऽऽश्रयणमेव भवेत् । उक्तं च गुरुतत्त्वप्रदीपे—

तत्त्वातत्त्वे श्रयत्यस्मिन्, न तत्त्वमुदितं ततः ।

यत एष कुसन्दिग्धदृष्ट्या पश्यति ते समे ॥१॥ अस्य वृत्तिः- 'अस्मिन् कुपाक्षिके, 'तत्त्वातत्त्वे श्रयति' लोकोत्तरभद्रकतया तत्त्वं-कियन्तमपि तत्त्वाचारं, अतत्त्वं-कियन्तमप्यतत्त्वाचारं चाश्रयति ततः—तस्मात्कारणादतत्त्वमुदितं-प्राग्श्लोके उक्तं, यतो-यस्मात्कारणात्, एष कुपाक्षिकस्ते-तत्त्वातत्त्वे, 'कुसन्दिग्धदृष्ट्या' कुत्सिता-सन्दिग्धा सन्देहमापन्ना, या दृष्टिः-अन्तरङ्गलोचनं, तया । अवलेपवतस्सन्देहो हि दुर्व्यपगमत्वात् कुत्सितो भवति । अतः कुसन्दिग्धेत्युक्तं । समे-तुल्ये सदृशस्वरूपे पश्यति । किमुक्तं भवति-तत्त्वमतत्त्वसदृशमतत्त्वं तत्त्वसदृशं पश्यतस्तस्य यथावस्थितस्वरूपानिरीक्षणे उभयमप्यतत्त्वमेव परिज्ञेयम् ।' किञ्च-तत्त्वातत्त्वे समदृशा पश्यन् श्रीहेमाऽऽचार्येण स्वामिनः पुरस्तात्तत्त्वमत्सर्येव व्यवस्थापितः । उक्तं चागम्यमध्यात्मविदामवाच्यमित्याद्यपदोपलक्षितायां श्रीमहावीरतत्त्वालोकद्वात्रिंशिकायाम्—

'सुनिश्चितं मत्सरिणो जनस्य, न नाथ ! मुद्रामतिशेरते ते ।
माध्यस्थ्यमास्थाय परीक्षका ये,
मणौ च काचे च समानुबन्धा' ॥१॥ इति

यत्तु-'शत्रौ मित्रे तृणे स्त्रैणे, स्वर्णेऽश्मनि मणौ मृदि ।

मोक्षे भवे भविष्यामि, निर्विशेषमतिः कदे॥ति[योगशास्त्रम्] भावनायां या निर्विशेषमतेः प्रार्थना, सा रागद्वेषावेवाश्रित्याऽवसातव्या न पुनर्ज्ञानश्रद्धाने समाश्रित्यापि। यतः शत्रुं मित्रत्वेन मित्रं च शत्रुत्वेनोभावप्युभयत्वेन जानन् दृष्टेर्विपर्यासात् मिथ्यादृष्टिरेव स्यात्। सा च भावनाऽनुचितैव। तस्माच्छत्रुं शत्रुत्वेन मित्रं च मित्रत्वेन जानन्नपि रागद्वेषाकलङ्कितः कदा स्यामित्यादिरूपेण प्रार्थना, न पुनस्तुल्यत्वेन ज्ञानव्यवहारयोः प्रार्थनेति भावः। अन्यथा शत्रुमित्रयोस्तुल्यत्वेन प्रार्थनायामिव धर्माधर्मयोरपि तुल्यत्वेन ज्ञानव्यवहारप्रार्थनाप्रसङ्गात्। धर्मवदधर्मस्याप्युपादेयत्वेनाधर्मवद्धर्मस्यापि हेयत्वेन च प्रसङ्गः स्यात्। तथाचाऽत्यन्तमासमञ्जस्यं, उभयलोकविरुद्धत्वात्। नहि-लोकेऽपि पितृपुत्रयोर्विषामृतयोश्च तुल्यत्वेन ज्ञानं व्यवहारं वा स्वीकरोति। एवं लोकोत्तरेऽपि। आस्तां तावदन्यत्-केवलिनामपि तथाज्ञानव्यवहाराभावात्, तच्च प्रवचनविदां प्रतीतमेव। यतः 'इणमेव निग्गंथे पावयणे सच्चे अणुत्तरे केवलिय' त्तिवचनाज्जिनप्रवचनमुपादेयमेवेत्युक्तं। 'नो कप्पइ अज्जप्पभिइं अण्णउत्थिए वा अण्णउत्थियदेवयाणि वा अण्णउत्थियपरिग्गहियाइं अरिहंतचेइआणि वे'तिवचनात् जिनप्रवचनबाह्यं च हेयमेवेत्युक्तमित्यादि स्वधिया ध्येयमिति। तस्मादेव—

'रत्तो दुट्ठो मूढो पुव्विं व्वुग्गाहिओ अ चत्तारि।

एए धम्मअणरिहा अरिहो पुण होइ मज्झत्थो'त्तिगाथायां-यो मध्यस्थः स धर्मार्हत्वेनाद्यो बोध्यः। न पुनर्द्वितीयस्तस्य मूढ-

त्वेन तत्त्वातत्त्वाश्रयित्वात् धर्मानर्हत्वात्। ननु ममताबुद्धिर्हि रागवतामेव भवति, सा च प्रथममध्यस्थस्य न युक्तेति चेन् मैवं, तीर्थकृतामप्याराध्यस्य तीर्थस्य तादृग्वस्तुस्वभावत्वात् तत्र ममताबुद्धिर्न रागहेतुका, 'वस्तुस्वभावानतिक्रमणे हि बुद्धिर्न रागद्वेषस्पर्शिनी'तिन्यायात्। उक्तं च श्री महावीरतत्त्वालोकद्वात्रिंशिकायां श्रीहेमाचार्येण—

'न श्रद्धयैव त्वयि पक्षपातो, न द्वेषमात्रादरुचिः परेषु।
यथावदाप्तत्वपरीक्षया तु, त्वामेव वीर! प्रभुमाश्रिताः स्म'॥१॥

इति पूर्वार्द्धेनानुपेक्ष्यस्य प्रवचनस्योपेक्षावचनात्प्रथमोत्सूत्री समर्थितः॥ इति श्रीविजयदानसूरीश्वरशिष्योपाध्यायश्रीधर्मसागरविरचितायां गुरुतत्त्वप्रदीपदीपिकापरनाम्न्यां स्वोपज्ञायां षोड़शश्लोक्यां जघन्योत्सूत्रिनिदर्शनविवरणम्॥

अथोत्तरार्द्धेन मध्यमोत्सूत्रिणो भेदोद्देशमाह—

**स्थिराऽस्थिरप्रभेदाभ्यां, द्वितीयोऽपि द्विधा भवेत्॥५॥**

व्याख्या-द्वितीयस्तूत्सूत्री स्थिराऽस्थिरप्रभेदाभ्यां द्विधा भवेत् इत्यन्वयः। स्थिरोत्सूत्रभाषित्वात्स्थिरः, तद्वैपरीत्यादस्थिरः, स्थिरश्चास्थिरश्च स्थिरास्थिरौ तावेव प्रकृष्टौ भेदौ प्रभेदौ, 'भेदस्य भेदः प्रभेद' इति वचनात्, उत्सूत्रिणो द्वितीयभेदस्य भेदावित्यर्थः। ताभ्यामिति हेत्वर्थे तृतीया। द्वितीयो मध्यमोत्सूत्री द्विधा-द्विप्रकारो भवेद्, प्रागुक्तप्रकाराभ्यां द्विधा भिद्यत इत्यर्थः। इत्यक्षरार्थः। भावार्थस्त्वयं-उत्सूत्रम् प्ररूप्य इदमित्थमेव भवतीत्येवं रूपेणोत्सूत्रे स्थिरः-स्थिरस्वभावः अवस्थितकोत्सूत्रीत्यपरपर्यायः

तीर्थाभीरुस्तीर्थमेव त्यजेन्न पुनः स्वयमुदीरितमुत्सूत्रम्। द्वितीयस्तु तीर्थभीरुस्तीर्थताडित उत्सूत्रमेव त्यजेन्न पुनः तीर्थमिति। अथ स्थिरोत्सूत्रिणम् भेदत आह—

स्थिरोत्सूत्र्याऽऽदिकृच्चाऽन्यो, द्विधा निह्नवसञ्ज्ञितः।
आदिकृच्छिवभूत्यादि-रन्यस्तन्मार्गमाश्रितः ॥६॥

व्या—स्थिरोत्सूत्री आदिकृदन्यश्चेति द्विधा स्यादित्यन्वयः। स्थिरोत्सूत्री-अवस्थितकोत्सूत्री, स चादिं करोतीति आदिकृत्-प्रथमतया प्रकाशकः प्रथमः। द्वितीयस्तु तदुक्तमार्गाऽऽसक्तः। स च द्विधाऽपि किम्भूतः? निह्नवसञ्ज्ञितः-आगमभाषया निह्नवइति सञ्ज्ञा जाताऽस्येति निह्नवसञ्ज्ञितः। तत्रादिकृत् कः को वाऽन्यः? इति नामग्राहं दर्शयति-'आदिकृच्छिवभूत्यादिः' शिवभूतिर्दिगम्बरमताकर्षकः। स आदौ यस्य 'स्त्रीमुक्त्यवागि'त्यादिश्लोकयुग्मेन वक्ष्यमाणस्य पूर्णिमीयकादिमताऽऽकर्षकचन्द्रप्रभादिनवकस्य स, अन्यस्तदतिरिक्तः तन्मार्गाऽऽश्रितः-शरणीकृतशिवभूत्याद्युक्तमार्ग इत्यर्थ इत्यक्षरार्थः। भावार्थस्त्वयं-क्षपणक-नग्नाट-बोटिकाऽपरनाम्नां दिगम्बराणामादिकृत् स्थिरोत्सूत्री सहस्रमल्लाख्यापरनामा शिवभूतिः १ पूर्णिमीयकानां चन्द्रप्रभाऽऽचार्यः २, चामुण्डिकौष्ट्रिकापरनाम्नां खरतराणां जिनदत्ताऽऽचार्यः ३, आञ्चलिकानां नरसिंहोपाध्यायापरनामाऽऽर्यरक्षितः ४, सार्द्धपूर्णिमीयकानां सुमतिसिंहाचार्यः ५, त्रिस्तुतिकापरनाम्नामागमिकानां शीलगणो देवभद्रश्चेत्याचार्यद्वयं ६, लुम्पाकानां लुम्पाक-

नामा लेखकः 'लुंकओ' इति रूढिः७, कटुकमतीयानां कटुकनामा गृहस्थः८, धर्मार्थिकापरनाम्नां वन्ध्यमतीयानां लुम्पाकमतान्निर्गतस्य नुन्नकस्य शिष्यो वन्ध्यनामा 'वींजउ' इति लोकरूढिः ९, पाशचन्द्रीयाणां नागपुरीयतपागच्छभ्रष्टः पाशचन्द्रो नामोपाध्यायः १०, एतेषामुत्पत्तिकालस्त्वेवं-विक्रमसंवत्सरात् एकोनचत्वारिंशदधिकैकशते १३९ दिगम्बरमतोत्पत्तिः १, एकोनषष्ट्यधिकैकादशशतेषु ११५९ गतेषु पूर्णिमीयकमतोत्पत्तिः २, चतुरधिकद्वादशशतेष्वतीतेषु १२०४खरतरमतोत्पत्तिः ३, चतुर्दशाधिकद्वादशशतेषु १२१४ आञ्चलिकमतोत्पत्तिः ४, षट्त्रिंशदधिकद्वादशशतेषु १२३६ सार्द्धपूर्णिमीयकमतोत्पत्तिः ५, सार्द्धद्वादशशतेषु-१२५०, त्रिस्तुतिकमतोत्पत्तिः ६, अष्टाधिकपञ्चदशशतेषु १५०८, लुम्पाकमतोत्पत्तिः ७, द्वाषष्ट्यधिकपञ्चदशशतेषु १५६२ कटुमतोत्पत्तिः ८, सप्तत्यधिकपञ्चदशशतेषु १५७० वन्ध्यमतोत्पत्तिः ९, द्विसप्तत्यधिकपञ्चदशशतेषु १५७२ पाशचन्द्रीयमतोत्पत्तिः १० ।
एतदर्थसङ्ग्राहकं काव्यद्वयं त्वेवं ।

श्रीमद्विक्रमतोऽङ्करामरजनीशाब्देऽ १३९ भवद् बोटिको,
भूतिर्नामशिवान्नवेषुगिरिशे ११५९ चन्द्रप्रभः पौर्णिमः २,
वेदाभ्रारुण १२०४ औष्ट्रिको जिनपदाद्दत्ताह्वयाद्योऽभवद् ।
विश्वार्के १२१४ नरसिंहतोऽञ्चलमतं राकाङ्कितान्निर्गतम् ॥१
सिंहात्प्राक् सुमतेः षडग्निकरणे १२३६ऽब्दे सार्द्धराकाङ्कितं ।
जातं त्रिस्तुतिकं च शीलगणतो व्योमेन्द्रियार्के १२५० कलौ ।
लुम्पाको वसुखेन्द्रियेन्दुषु १५०८, कटुर्द्वाषष्टितिथ्य-
ब्दके १५६२ ।

वन्ध्यः खाद्रितिथौ १५७० तथाच दशमः पाशोक्षि-
सप्ताक्षकौ १५७२। ॥२॥ युग्मम् ॥

दशानामप्यमीषां बहुषूत्सूत्रेष्वेकैकमुत्सूत्रमादाय विनेयजनानुग्रहार्थं दिग्मात्रेण पूर्वपक्षपूर्वकनिराकरणमग्रे वक्ष्यते। अन्यस्तु तन्मार्गमाश्रितः-तदुक्तमार्गनिरतः। स च सम्प्रति दशधाऽपि प्रत्यक्षसिद्ध एव, सम्प्रति दशानामप्यपत्यानां विद्यमानत्वादिति।

अथाऽऽदिकृतः स्वरूपमाह—

तीर्थाऽऽवासपरित्यागात्, तीर्थाऽऽभासप्रवर्त्तनात्।
तीव्रद्वेषोदयादेव, भवेदाद्यः स्थिरात्मकः ॥७॥

व्या०—आद्यः स्थिरात्मकोऽवस्थितकोत्सूत्री तीव्रद्वेषोदयादेव भवेदित्यन्वयः। आद्यः आदिकृत् शिवभूत्यादिः स्थिरो निह्नवः, स प्रथमतयोत्सूत्रभाषी, कुतः स्यात्?, तीव्रद्वेषोदयादेव-अनन्तानुबन्धिकषायोदयादेव। तीव्रद्वेषोदयाऽवगमस्तु तीर्थमेवाऽऽवासस्तस्य परित्यागात्। अतीर्थमपि तीर्थमिवाऽऽभासते यदित्यर्थादुत्सूत्रिसमुदायस्तस्य प्रवर्त्तनात्-व्यवस्थापनाच्चेति। चकारोऽध्याहार्य इत्यक्षरार्थः।

भावार्थस्त्वयं-यथा केवलसातोदयनिदानं रम्यं हर्म्यं परिहृत्य स्वयं निर्मीयाऽन्धकूपे पातं विधास्यामीति कृतप्रतिज्ञस्य तथा प्रतिज्ञासफलीकरणम् तीव्रकषायोदये सत्येव सम्भवति। तथा केवलाऽनन्ताऽऽनन्दोदयनिदानं तीर्थाऽऽवासं परित्यज्य

तीर्थाऽऽभासरूपं कूपं स्वयमेव विधाय तत्र पतनं तीव्रकषायोदयिनामेवेति हेतुद्वयात्तीव्रकषायोदयावगमः ।

अथ द्वितीयस्थिरस्य स्वरूपमाह—

**अन्यस्तदुक्तमार्गानु-गामी च दृष्टिरागवान् ।**
**तत्त्वं विचिन्तयन्नन्तः-खिन्नोऽतत्त्वाऽऽश्रयी ध्रुवम् ॥१॥**

व्या०—तदुक्तमार्गानुगामी-आदिकृत्शिवभूत्याद्युक्तमार्गाऽऽसक्तोऽन्यः-प्रथमापेक्षयाऽपरो-द्वितीय इत्यर्थः । स्थिरोत्सूत्री भवेदित्यन्वयः । तेनादिकृत्स्थिरोत्सूत्रिणा उक्तः-सूत्रितो यो मार्गः-स्त्रीनिर्वाणनिषेधः चतुर्दशीपाक्षिकनिषेधः स्त्रीजिनार्चानिषेधः-मुखवस्त्रिकानिषेधः जिनालयप्रदीपनिषेधः चतुर्थीस्तुतिनिषेधः जिनप्रतिमानिषेधः संप्रति साधुदर्शननिषेधः प्रागुक्तवक्ष्यमाणसङ्करनिषेधः साधूपदिष्टजिनपूजानिषेधश्चेत्यादिरूपस्तमनुगन्तुशीलमस्येति तदुक्तमार्गानुगामी । किम्भूतो भवेत् ? अतत्त्वाऽऽश्रयी भवेत् । कथं ? ध्रुवं-निश्चितं, स चाऽतत्त्वाऽऽश्रयी कुतः ? इति विशेषणद्वारा हेतुमाह-यतः स तत्त्वं विचिन्तयन्नन्तःखिन्नः स्याद्-देव-गुरु-धर्माणां यथावस्थितस्वरूपं विचारयन् चेतसि खेदमापन्नो भवेत् । तत्त्वं विचारयन्नन्तःखिन्नोऽपि कुतः ? इति विशेषणद्वारा हेतुमाह-यतः स दृष्टिरागवान् । दृष्टौ-दर्शने लोकोत्तरमिथ्यात्वरूपे, रागः-स्वोपात्तं न त्यक्ष्यामीत्यादिरूपेण कदाग्रहो यस्य स, दृष्टिरागवानित्यक्षरार्थः ।

भावार्थस्त्वयं-दृष्टिरागी च स्वोपात्ताऽतत्त्वाऽऽग्रही-अतत्त्वं तत्त्वबुद्ध्या स्वीकृत्येदं कथमपि न त्यक्ष्यामीति कदाग्रही, आभि-

निवेशिक इति यावत्। स च तत्त्वमत्सर्येव स्यात्। अतत्त्वाऽऽग्रही तत्त्वान्वेषी चेति विरोधात्। स च तत्त्वविचारायोदीरितोऽपि तत्त्ववृत्त्या प्रत्युत्तरयितुमशक्तश्चेतस्येव खिन्नो भवति। असमर्थो ही प्रायो अन्तःखिन्नोऽप्युपशान्त इव बहिराभातीति अन्तरित्युपात्तं। तथाच 'यो यत् प्रतिपक्षः स तत्प्रतिपक्षानुकूल' इति न्यायात् तत्त्वे खिन्नस्याऽतत्त्वमेव शरणमिति। अत एव कामरागस्नेहरागापेक्षया दृष्टिरागो दुरपनेयः। उक्तं च—

'कामरागस्नेहरागा-वीषत्करनिवारिणौ।

दृष्टिरागस्तु पापीयान्, दुरुच्छेदः सतामपि॥१॥इति। यद्यपि यः कश्चिल्लोकोत्तरभद्रकतया तत्त्वाऽतत्त्वे समदृशा पश्यन् मिथ्यात्वबन्धमाश्रित्य लौकिकलोकोत्तराभद्रकापेक्षया वरीयान् तथापि सोऽपि तत्त्वमतत्त्वसदृशमतत्त्वं च तत्त्वसदृशं पश्यन्नुभयोरपि यथावस्थितवस्तुस्वरूपापरिज्ञानात् तत्त्वमत्सर्येव। उक्तं च—

तत्त्वातत्त्वे श्रयत्यस्मिन्नतत्त्वमुदितं ततः।

यत एष कुसन्दिग्ध-दृष्ट्या पश्यति ते समे॥इति। व्याख्या-चास्य प्रागुक्ता। ननु द्वितीयस्य स्थिरोत्सूत्रिणो हेतुरूपं विशेषणद्वयमुक्तं, तत् प्रथमस्यापि स्थिरोत्सूत्रिणः सम्भवति। यश्च प्रथमस्य तीव्रकषायोदयो निगदितः, स च द्वितीयस्यापीति कथमन्योऽन्यं व्यवच्छेदः? इति चेत्। ऊच्यते-गौणमुख्यविवक्षयैवाव्यवच्छेदव्यवच्छेदाववसातव्यौ। अयं भावः-तीव्रकषायोदयादेवाऽऽदिकृत् स्थिरोत्सूत्री स्ववचस्सु कदाग्रही भवत्यतोऽस्य तीव्रकषायोदयस्यैव मुख्यत्वं, दृष्टिरागस्य तु गौणत्वं। द्वितीयस्तु

प्रायेण शिवभूतिचन्द्रप्रभादिषु दृष्टिरागादेव तीव्रकषायोदयी भवत्यतोऽस्य दृष्टिरागो मुख्यः, कषायोदयस्तु गौण इति। यत्तु द्वितीयस्य 'तत्त्वं विचिन्तयन्नन्तः खिन्नः' इति विशेषणमदायि, तत् प्रथमस्य न सम्भवत्येव, तादृग्मार्गस्य स्वयमेव प्रवर्त्तकत्वेन तत्त्वविचारहेतोः सन्देहस्यैवाभावात् कुतस्तत्त्वविचारहेतुकः खेद इति बोध्यम्। ननु तत्त्वं विचिन्तयन्निति विशेषणभागस्तु प्रथममध्यस्थस्यैव सम्भवति, तस्यैव विचारस्य सम्भवात् नतु स्थिरात्मकस्य द्वितीयोत्सूत्रिणस्तस्य कुविचार एवाधिकारात्। उक्तं चोत्सूत्र०।

हेतुर्विचारे माध्यस्थ्यं, कुविचारे यथाऽऽग्रहः।
तत्त्वज्ञाने विचारोऽपि, यथा ज्योतिषसंविदि ॥१॥

अस्य वृत्तिः-विचारे-युक्तौ कार्यरूपे माध्यस्थ्यं हेतुः-कारणं, मध्यस्थचित्तपरिणामस्यैव विचारोत्पादात्। यथाऽऽग्रहः कुविचारे हेतुः, आग्रहग्रस्तचेतसः कुविचारोत्पादात्। तत्त्वज्ञाने विचारो हेतुः, विचारक्षोदक्षमस्य चेतसस्तत्त्वज्ञानोत्पादात्। विचारक्षोदक्षमं चाऽस्माकीनं चित्तं, ततोऽस्माकं तत्त्वज्ञानमुत्पन्नं, मतिश्रुतज्ञानयोः सम्प्रत्यपि वर्त्तमानत्वादित्यनुक्तमपि ज्ञेयम्। यथा ज्योतिषसंविदि-ज्योतिषज्ञाने विचारो हेतुः, सुविचारितस्यैव ज्योतिषस्य मिलनादिति चेत्। सत्यम्, द्वितीयोसूत्रिणः कुविचारस्य फलेग्रहित्वापेक्षया कथितत्वात्। अयं भावः-विचारं विदधानस्याप्याग्रहिणः कुविचार एवोदेति। यतः कदाग्रही प्रथममतत्त्वे मतिं निवेश्य तत्र युक्तिं नेतुमिच्छति, स च-

तत्त्वमार्गं न लभत एव, प्रत्युत युक्तिमलभमानः खेदमेवाऽवाप्नोति। कदाग्रहरहितस्तु युक्त्या यथावद्वस्तुस्वरूपं विचार्य पश्चाद्युक्तिक्षमे मतिनिवेशं विदधीत। उक्तं च द्वितीयाङ्गटीकायां–'आग्रही बत निनीषती युक्तिं, तत्र यत्र मतिरस्य निविष्टा। पक्षपातरहितस्य तु युक्ति-र्यत्र तत्र मतिरेति निवेश'॥१॥ मिति।

अथ द्वयोः साधारणस्वरूपमाह—

द्विधाप्ययं स्थिरोत्सूत्रं, सूत्रयेत्तीर्थनिर्भयः।
तीर्थेन ताडितोऽपि द्राक्, तीर्थमेवाऽवहीलयेद् ॥६॥

व्याख्या—द्विधापि अयं अनन्तरोक्तः स्थिरोत्सूत्री द्विधापि-द्विप्रकारोऽपि स्थिरोत्सूत्रं सूत्रयेदित्यन्वयः। स्थिरोत्सूत्रमित्यत्रैवकारोऽध्याहार्यः। स्थिरोत्सूत्रमेव सूत्रयेद्-विरचयेत् सभास्थितः स्थिरोत्सूत्रमेव प्रकाशयेदित्यर्थः। स्थिरोत्सूत्रस्यैव प्रकाशकः कुतः? इति विशेषणद्वारा हेतुमाह-यतः स किम्भूतः? तीर्थनिर्भयः। तीर्थं-साधुसाध्वीश्रावकश्राविकासमुदायलक्षणं, 'चाउवण्णो संघो तित्थं'तिवचनात्, तस्मान्निर्भयो-भयवर्जितः तीर्थाऽवज्ञापातकाऽभीरुस्तीर्थलज्जारहित इत्यर्थः। यो यस्मान्निःशूकः स तस्यारुचिविषयां प्रवृत्तिं कुर्वाणो न शङ्कते इत्यतस्तीर्थाभीरुस्तीर्थाऽरुचिविषयमुत्सूत्रं भाषत एवेति सिद्धस्तीर्थनिर्भयः स्थिरोत्सूत्री। अथोत्सूत्री तावत्तीर्थेनाऽवश्यं शिक्षणीयोऽन्यथा तीर्थमप्यतीर्थं भवेदतस्तीर्थशिक्षितः स कीदृक् स्यादित्युत्तरार्द्धेन निर्दिशति-'तीर्थेने'त्यादि। त्वमित्थं मिथ्या मा प्रवर्तयेत्यादि-

वचःप्रयोगादिना तीर्थेन ताडितोऽपि-कटुकभाषादिनाऽऽक्रोश-विषयीकृतोऽपि, द्राग्-शीघ्रं तीर्थमेवाऽवहीलयेत्—अवगणयेत् तीर्थात्पराङ्मुखीभवेत् दूरतस्तीर्थमेव त्यजेदिति यावदित्यक्षरार्थः।

भावार्थस्त्वयं-तीर्थाऽवज्ञापातकभीरुस्तावत्क्वचित्किञ्चिदन्यथा प्रवृत्तः सन् तीर्थेन ताडितस्तीर्थलज्जादिनैव'नाहमित्थं प्रवृत्त' इत्यादिरूपेणाऽनृतमेव ब्रूयात्, तज्जनितपातकस्य प्रायश्चित्तं प्रतिपद्य पुनस्तीर्थाऽऽज्ञामेव स्वीकुर्याद्वा, न पुनस्तीर्थं त्यक्तुं शक्नुयात्। स्थिरोत्सूत्री पुनस्तद्वैपरीत्यात्तीर्थेन ताडितोऽपि अविच्छिन्नपरम्परागतं साध्वादिसमुदायलक्षणं तीर्थं परित्यज्य मर्क्कटतापनककल्पं मतिकल्पिततीर्थं शरणीकुर्यादित्यर्थः।

अथ कः कस्मादुत्सूत्रपातकेन गुरुरिति दर्शयन्नेव प्रवचनबाह्यः स्थिरोत्सूत्रीति शास्त्रसम्मत्या प्राह—

**तस्मादेवाऽऽदिकृच्चान्यो, गुरुर्गुरुतरः क्रमात्।**
**उत्सूत्रकन्दकुद्दाले, तीर्थाऽस्पृक् सोऽप्यनेकभित्॥१०॥**

तस्मादेव आदिकृदन्यश्च क्रमाद् गुरुर्गुरुतरः उत्सूत्रकन्दकुद्दाले तीर्थाऽस्पृग् प्रकीर्त्तित इत्यध्याहार्यमित्यन्वयः। तस्मादेव अवज्ञापूर्वकतीर्थपरित्यागादेव आदिकृदन्यश्चेत्यनन्तरोक्तो द्विधापि स्थिरोत्सूत्री क्रमेण-यथासङ्ख्यमुत्सूत्रपातकेन गुरुर्महान्, गुरुतरो महत्तरः, तीर्थं न स्पृशतीति तीर्थाऽस्पृग्-तीर्थाद् दूरदेशवर्त्ती प्रवचनबाह्य इति यावत्। प्रकीर्त्तितः, क्व ? उत्सूत्रकन्दकुद्दाले गुरुतत्त्वप्रदीपापरनाम्नीत्यक्षरार्थः।

भावार्थस्त्वयम्—उत्सूत्रकन्दकुद्दालस्योपलक्षणत्वादन्यत्राऽपि निह्नवः प्रवचनबाह्य एव कथितः। तथाहि-'समुद्घातादि जिनाभिहितं वस्त्वन्यथा प्ररूपयन् प्रवचनबाह्यो भवति, यथा निह्नवा' इति तृतीयाङ्गटीकायां। तत्र चाऽऽदिकूच्छिवभूत्यादिनिह्नवो ज्ञानावरणीयादिकर्मपुद्गलैस्तन्निदानकर्मसन्तानपरम्परयाऽनन्तजन्ममरणादिहेतुकैरधोनिमज्जनस्वभावत्वाद् गुरुः स्यात्। द्वितीयस्तु तदपेक्षयाऽतिशयेन गुरुर्गुरुतरः। तदपेक्षया कर्मपुद्गलैरतिभाराक्रान्तात्मा भवेदित्यर्थः। एतेन प्रथमतया उत्सूत्रप्रवर्तकस्यैव पातकं, न पुनः तत्पृष्ठिविलग्नानामिति प्रवचनानभिज्ञः कश्चिद्वदति। सोपि परास्तः। तस्य तदपेक्षया जनोत्सूत्रस्थैर्याच्छिवभूत्यादिष्वाग्रहाच्चोत्सूत्रपातकस्य द्विगुणत्वात्। उक्तं चोत्सूत्र०

'ननु चन्द्रप्रभसूरेः प्रथममताऽऽकर्षकस्योत्सूत्रमस्तु, पाश्चात्यानां तच्छिष्याणां किं दूषणमित्याशङ्क्य परिहरन्नाह-

प्राच्यैः कृतं ते नोत्सूत्रं, चेत् तत्पापं जनेऽपि न।

प्रत्युतोग्रं जनोत्सूत्र-स्थैर्यात् प्राच्याऽऽग्रहाच्च तत् ॥१॥

अस्य वृत्तिः-अहो! शिष्य! चेद् यदि प्राच्यैः-पूर्वपुरुषैश्चन्द्रप्रभसूर्यादिभिः कृतं-विहितमुत्सूत्रं ते-तव, न उत्सूत्रं भवेत्, किन्तु सूत्रमेव। ततः पापं जनेऽपि न भवति। समग्रपारदारिकताचौर्यादिपातकानां पूर्वपुरुषकृतत्वात् पाश्चात्यलोकस्यापि तत्तत्परदारगमनादिकं कुर्वतोऽपि पातकं न जायते। अत्युत्सूत्रमाह-'प्रत्युत' तदुत्सूत्रमुग्रं-उद्दण्डं स्यात्, कस्मात्? 'जनोत्सूत्रस्थैर्यात् प्राच्याऽऽग्रहाच्च' तेनोत्सूत्रकरणेन जनस्याऽप्युत्सूत्रकरणप्रवृत्तौ

स्थिरता स्यात्। अयमत्र भावः-चन्द्रप्रभसूरिणा प्रथमत आकृष्टं मतं कोऽपि नाद्रियते, ततो न सर्वजनप्रसिद्धं स्यात्। अतस्तदङ्गीकारकारकाणामेक एष प्रवृत्तिदोषः। प्राच्याः-चन्द्रप्रभसूर्याद्यास्तेष्वाऽऽग्रहस्तस्मात्। यदहमात्मीयानां पूर्वपूरुषाणां कृतं प्रमाणीकरिष्याम्येवेति द्वितीयो दोषः। इतिदोषद्वयपुष्टितश्चन्द्रप्रभसूरेः पार्श्वात्तत्व गाढतरमुत्सूत्रं बभूव। उक्तलक्षणोऽपि निह्नवः कतिभेदो भवतीति दर्शयति-'सोऽप्यनेकभिद्' सोऽपि द्विधाऽपि स्थिरोत्सूत्री प्ररूपणाभेदतोऽनेकभिद् बहुप्रकारो भवतीत्यर्थः।

अथानन्तरोक्तमेव वार्त्तमानिकापत्यप्रसिद्धैकोत्सूत्रद्वारा नामतः स्पष्टयन् श्लोकद्वयीमाह—

स्त्रीमुक्त्यवाक् १ च राकाङ्कः २, स्त्रीजिनार्च्चारि३रञ्चलः।
सार्द्धराकारत४श्चेति, षष्ठः त्रिस्तुतिको मतः ६ ॥११॥
गुरुतत्त्वप्रदीपोक्ताः, षडेतेऽथ चतुष्टयी।
चैत्यद्विड् ७ गुर्वद्विड् ८ मिश्रो ६,
जिनार्चानुपदेशवाक् १० ॥१२॥

व्याख्या-स्त्रीणां मुक्तिरित्यर्थाभिधायिका न विद्यते वाग्वाणी यस्य स स्त्रीमुक्त्यवाक्-दिगम्बर इत्यर्थः। तन्मते स्त्रीणां मुक्तेर्निषिद्धत्वात्। चकारः समुच्चयार्थः सर्वत्राऽपि योज्यः। राका-पूर्णिमा, सैव पाक्षिकत्वाभिमतत्वेनाऽङ्कं-चिह्नं, यस्य स राकाङ्कः-पूर्णिमीयक इत्यर्थः।

तन्मते पाक्षिकत्वेन पूर्ण्णिमायामेवाऽऽग्रहात् २। स्त्रीणां जिनार्चा स्त्रीजिनार्चा, तस्या अरि-वैरी स्त्रीजिनार्चाऽरिः-औष्ट्रिकापरपर्यायः खरतर इत्यर्थः। तन्मते स्त्रीणां जिनपूजाया निषिद्धत्वात् ३। अञ्चलो-वस्त्रान्तभागः, स एव श्रावकद्वारा चिह्नं यस्येति मत्वर्थेऽच्विधानादञ्चलः प्रतीतः। तन्मते श्रावकश्राविकाणां सामायिकादौ रजोहरणमुखवस्त्रिकापरित्यागेनाऽञ्चलस्यैव ग्रहणात् ४। सार्द्धराका-सार्द्धपूर्णिमा, तत्र रतः-कदाग्रही, सार्द्धराकारतः-सार्द्धपूर्ण्णिमीयक इत्यर्थः। तन्मते सार्द्धपूर्ण्णिमायाः स्वीकारात् ५। तिस्रः स्तुतयोऽभिमता यस्य स त्रिस्तुतिकः-आगमिक इत्यर्थः। स चोक्तपञ्चकापेक्षया षष्ठो मतः। तन्मते चतुर्थस्तुतेरनङ्गीकारात्। एते दिगम्बराद्याः षट् गुरुतत्त्वप्रदीपे उक्ताः गुरुतत्त्वप्रदीपोक्ताः। अयं भावः-उत्सूत्रकन्दकुद्दालग्रन्थकर्तृकाले प्रकृतग्रन्थोक्तदशकमध्ये षण्णामेव विद्यमानत्वात् तत्र षडेवोक्ताः। शेषचतुष्टयं त्वधिकृतषोडशश्लोक्यामथेत्यादिसूत्रेणोच्यते इति। अथेत्यानन्तर्याऽर्थे गुरुतत्त्वप्रदीपे षडुक्ताः। अथ तदनु समुत्पन्ना चतुष्टयीत्येवं-चैत्यं-जिनप्रतिमा, तस्य द्विट्-प्रत्यर्थी लुम्पाक इत्यर्थः। तन्मते जिनप्रतिमाया अनङ्गीकारात् ७। गुरुः-सुसाधुः, तत्र न विद्यते दृष्टि-दर्शनमात्रे लोचनं यस्य। यद्वा सन्तमपि गुरुं न पश्यतीति क्विप्विधानात् गुर्व्वदृक्-कटुक इत्यर्थः। तन्मते गुरुदर्शनाऽनङ्गीकारात्। सम्प्रत्यत्र सुसाधवो न दृष्टिपथमायान्तीत्येवं तस्योपदेशात् ८। मिश्रः-सङ्करः, प्रायः पूर्णिमाद्युत्सूत्रैर्देशेन प्रागुक्तमतसाम्याद् लुम्पाकादिवेषसाङ्कर्याद्वाऽस्य

सङ्करत्वं। स च वन्ध्यः। 'वीजामती' इति लोकप्रसिद्धिः। तन्मतेऽनेकेषां मतानां देशेन वेषोत्सूत्राभ्यां प्रवेशात् ६। जिनार्चायां न विद्यते उपदेशो यस्यामेवंविधा निन्द्यदेशनारूपा वाक्-वाणी यस्य सः जिनार्चाऽनुपदेशवाक्-पाशचन्द्र इत्यर्थः। तन्मते जिनपूजादिषु सावद्यत्वधिया साधूपदेशस्यानङ्गीकारात् १०, इत्यक्षरार्थः।

भावार्थस्त्वयं-दिगम्बरमते स्त्रीणां मुक्त्यभावस्तत्र तस्य कुयुक्त्युद्भावना त्वेवं-स्त्रियो न मुक्तिभाजो, वस्त्रादिपरिग्रहोपेतत्वाद्देशविरतिवदिति। यद्वा स्त्रियो न मुक्तिभाजः, तथाविधचित्ताऽसामर्थ्यात् साम्प्रतीनपुरुषवदिति। यद्वा स्त्रियो न मुक्तिभाजः, पुरुषेभ्यो हीनत्वात् जातिनपुंसकवदित्यादि। तत्र सुयुक्त्युद्भावना त्वेवं-ननु भो नग्नाट ! पक्षत्वेनाभिमता याः स्त्रियस्ताः असंयतिन्यः संयतिन्यो वा ?। आद्ये, सिद्धसाधनं। अस्माकमपि तथैवाभिमतत्वात्। नहि वयमप्यसंयतिनीनां स्त्रीणां मुक्तिसद्भावं वदामः। द्वितीये, संयतिनीनां स्त्रीणां वस्त्रादिर्न परिग्रह इत्यतो हेतुः स्वरूपासिद्धः। परिग्रहत्वाभावस्तु मूर्च्छाद्यभावेन संयमादिरक्षार्थमेव वस्त्रादिधारणात्।

उक्तंचाऽऽगमे—'जंपि वत्थं व पायं वा कंबलं पायपुंछणं।
तंपि संजमलज्जट्ठा धारंति परिहरंति य ॥१॥
न सो परिग्गहो वुत्तो नायपुत्तेण ताइणा।
मुच्छा परिग्गहो वुत्तो इअ वुत्तं महेसिणा ॥२॥

[दशवै०] इति। न च स्वनिश्रितत्वेन वस्त्रादौ मूर्च्छा भवत्येवेति शङ्कनीयं। स्वशरीरशिष्यादावपि तथात्वेन मूर्च्छाप्रसङ्गात्

कस्यापि मोक्षाऽवाप्तिर्न स्यात्। किञ्च-भो नग्नाट! अबलाना-
मम्बरपरिभोगः किं तीर्थकृदुपदिष्टः त्वन्मताऽऽकर्षकशिवभूति-
प्ररूपितो वा अशक्यपरित्यागकृतो वा?। आद्ये, तावदवश्यं
वस्त्राऽऽवृतानामेव मुक्तिः सिद्धा। ततः 'प्रेक्षावतां हि प्रवृत्तिः
स्वार्थकारुण्याभ्यां व्याप्ते'तिवचनात् परमप्रेक्षावत्त्वेन परमकारु-
ण्यभाजो हि भगवन्तो नाऽबलानां मुक्त्युपघातकमुपदिशन्ति।
तथात्वे ह्यास्तां तावदन्यद्, लोकनिन्द्या अपि भगवन्तो भवेयुः।
यत उक्तं लौकिकैः-'बालस्त्रीव्रतिघातकाः स्युरधमाधीशाः श्व-
पाका इवे'त्यादि।' द्वितीये तु ताभिः शिवभूतेः किमपराद्धं, येन
पापात्मनाऽबलानां वस्त्रदानेन मुक्त्युपघातो विहितः। नह्या-
न्तरवैरमन्तरेण कश्चित्तथाविधोत्कृष्टार्थसम्पदाऽऽगमनिवारको
भवति। ननु शिवभूतिना वस्त्रदानं स्त्रीणां ब्रह्मचर्यादिरक्षार्थमेव
विहितमिति चेत्। चिरं जीव। येनाऽऽयातोऽसि स्वयमेव मदु-
क्तमार्गेण। यतो यद् ब्रह्मचर्यादिपालनहेतुस्तत्संयमं प्रति हेतुरेवे-
त्यतः सिद्धं प्रत्युत निष्परिग्रहताहेतुर्वस्त्रपात्रादि तत्कुतस्तन्मोक्षो-
पघातकमिति त्वयापि सवस्त्रस्य मुक्तिर्व्यवस्थापिता। एवं
तृतीयेऽप्यशक्यपरित्यागः किं शरीरावयववत्-सहोत्पन्नत्वात्
कर्णवेधवच्छरीरसम्बद्धकृतविकारत्वाद्वा?। उभयथापि प्रत्यक्ष-
बाधः, बाल्यावस्थायामिवाऽन्यावस्थायामपि वस्त्रराहित्यस्य
तज्जातीयानामध्यक्षसिद्धत्वात् अस्मादृशैरपि तथैव श्रूयमाणत्वा-
च्च। एतेन सवस्त्रस्य केवलज्ञानाऽनुत्पत्तिं वदन्नपि नग्नाटो नि-
रस्तः। वस्त्रस्य केवलज्ञानाऽऽवरणत्वेन भवितुमशक्तेः। नह्यात्म-

प्रदेशाऽसम्बद्धपुद्गला आत्मस्वभावमावृण्वन्ति, गिरिगुहापवरकवातादीनामपि तथात्वेन केवलज्ञानस्य कथाया अप्युच्छेदापत्तेः। किञ्च-सूर्यालोकाऽऽवरणस्य भित्त्यादेरालोकत्वेन साम्यान्निशापतिप्रदीपाद्यालोकस्याप्यावरणत्वेन दर्शनात्केवलज्ञानाऽऽवरणस्य वस्त्रस्यापि ज्ञानत्वेन साम्यात् मतिश्रुतावधिमनःपर्यायज्ञानानामप्यावरणत्वं भवत्केन वार्यं ?, तच्चाध्यक्षबाधितत्वेन तवाऽप्यनिष्टमिति बोध्यम्। यच्चोक्तं तथाविधचित्ताऽसामर्थ्यादिति। तत्र तादृशसामर्थ्याभावस्तासां किं गतिस्वाभाव्यात् जातिस्वाभाव्यादुत संहननादिसामग्र्यभावाद्वा ?। न तावदाद्यो, मनुष्यमात्रस्यापि मोक्षाभावप्रसक्तेः। तच्चावयोरप्यनिष्टं। द्वितीये, का जातिः ?, पञ्चेन्द्रियत्वं स्त्रीत्वं वा ?। आद्येऽनन्तरोक्तवदावयोरप्यनिष्टं। द्वितीये, स्त्रीजातेस्तथाविधचित्ताऽसामर्थ्ये किं प्रमाणं प्रत्यक्षं परोक्षं वा ?। न तावत्प्रत्यक्षं, तदर्थावबोधरूपस्य प्रत्यक्षस्य तवाऽसम्भवात्। द्वितीये त्वनुमानमागमोवा ?। न तावदनुमानं, तथाविधसाध्यसाधकहेतोरदर्शनात्। न च सप्तमनरकपृथिवीगमनाऽसामर्थ्यमेव तत्र हेतुरिति वाच्यम्। तस्य तीर्थकरबलदेवादौ व्यभिचारित्वात्, तेषां सप्तमनरकगमनसामर्थ्याभावेऽपि मुक्तिगमनसामर्थ्यसद्भावात्। किञ्च-नहि मुक्तिगमनं प्रत्यधोगतिसामर्थ्यं हेतुर्मत्स्यादीनामपि मुक्तिगमनसामर्थ्यप्रसक्तेः, तेषामधोगतिगमनसामर्थ्यसद्भावात्। नाप्यागमः, प्रत्युत स्त्रीणां मुक्तेरागमे प्रतिपादनान्निषेधवचनस्याऽऽगमबाधितत्वात्। आगमो यथा—'समणस्स भग-

वओ महावीरस्स सत्त अंतेवासीसयाइं सिद्धाइं जाव सव्वदुक्खप्पहीणाइं चउद्दस अज्जियासयाइं सिद्धाइं'ति । एवं संहननादिसामग्र्यभावलक्षणोऽपि हेतुरागमबाधितत्वेन स्वसाध्यं साधयितुमसमर्थः एव । आगमबाधितत्वं च सिद्धिसिद्धौ सिद्धमेव । नहि संहननादिसामग्र्यभावे मुक्तिप्राप्तिः । किञ्च-प्रथममेव संहननं मुक्तिप्राप्तौ हेतुः । तच्च तासां विद्यत एव । यदाहुः श्रीभद्रबाहुस्वामिपादाः श्रीआवश्यकनिर्युक्तौ—

संघयणं संठाणं, उच्चत्तं चेव कुलगरेहिं समं ।

वण्णेण एगवण्णा, सव्वाओ पिअंगुवण्णाओ ॥१॥ त्ति, एवं तृतीयाऽनुमानेपि पुरुषेभ्यो हीनत्वादिति हेतुर्न समीचीनः । यतः 'पुरुषेभ्य' इत्यत्र सर्वपुरुषेभ्यः कतिचित्पुरुषेभ्यो वा ? । नाद्यः, स्वरूपासिद्धेः । नहि त्वदीयमतवासितव्रतिन्योऽपि चाण्डालादिपुरुषेभ्यो हीनतया व्यपदिश्यन्ते । द्वितीये, गणधरादीनामपि मुक्त्यवाप्तिर्न स्यात् । तेषां तीर्थकरपुरुषेभ्यो हीनत्वादित्यादि सुयुक्तियुक्तेर्व्यक्तवरैर्नग्नाटनाटकमुत्रासनीयमिति । अथ पूर्णिमीयकमते पाक्षिकत्वेन पूर्णिमायाः स्वीकारः । तत्र कुयुक्त्युद्भावना त्वेवं-पक्षेण निर्वृतं पाक्षिकं । तत्र पक्षस्तावत् पञ्चदशदिनात्मको भवति । स च प्रतिपदमादौ कृत्वा पूर्णिमायामेव पूर्णीभवत्यतः पूर्णिमायामेव पाक्षिकप्रतिक्रमणम् युक्तमिति । तत्र सुयुक्त्युद्भावना त्वेवं-पक्षेण निर्वृतं पाक्षिकं । तच्च चतुर्दशीरूपमेव विज्ञेयं, पाक्षिकशब्दस्य चतुर्दश्यामेवाप्तेः सङ्केतितत्वात् । यः शब्दो यत्र सङ्केतितः स शब्दस्तमेवार्थमभिधत्ते,

पर्युषणादिवाचकसांवत्सरिकादिशब्दवत्। शब्दानां हि सङ्केतमनुसृत्य चार्थाभिधायकत्वं, न पुनर्व्युत्पत्त्यर्थमात्रमनुसृत्यापि, गो-महिष-मयूरादिशब्दानामपि मनुष्याद्यर्थाभिधायकत्वापत्तेः। गच्छतीति गौः, मह्यां शेते इति महिषो, मह्यां रौतीति मयूर इत्यादि व्युत्पत्त्यर्थस्य मनुष्यादावपि विद्यमानत्वात्। स च सङ्केतो द्विधा-स्वसमयसिद्धः सर्वसमयसिद्धश्च। तत्राऽऽद्यो, भाद्रपदसित-चतुर्थी-सन्ध्याद्वयाऽऽवश्यकक्रियाविशेषादौ सांवत्सरिक-प्रतिक्रमणादिशब्दानां। द्वितीयस्तु दिनकरादौ सूर्यादिशब्दानामिति। एतेन 'पञ्चदश्यौ यज्ञकालौ पक्षान्तौ पर्वणी अपी'ति नाममालोक्तमादाय पूर्णिमामेव पाक्षिकतया स्वीकुर्वाणोऽपि निरस्तः। यतस्तत्र पर्वशब्दो वंशाङ्गुलीनां ग्रन्थिष्विव सन्धिरूपकालविशेषे सङ्केतितो, न पुनरभिमतधर्माऽनुष्ठानार्हदिवसादाविति। अन्यथा 'वत्सरादिर्मार्गशीर्ष' इति नाममालावचनात् सांवत्सरिकपर्वाऽपि कार्त्तिकपूर्णिमायामेव विधेयं स्यात्, न पुनर्भाद्रपदसितचतुर्थ्यां। तस्मादभिमतधर्माऽनुष्ठानाऽर्हदिनादौ धात्वादिभिर्व्युत्पत्त्यर्थो नाममाला वा नानुसरणीया, किन्तु स्वसमयसिद्धः सिद्धान्तसंकेतः। स च पाक्षिकशब्दस्य चतुर्दश्यामेव। तथाहि-'संते बले वीरियपुरिसक्कारपरक्कमे अट्ठमि-चाउद्दसि-नाणपंचमी-पज्जोसवणा-चाउम्मासएसु चउत्थ-छट्ठमट्ठमं न करिज्जा पच्छित्तं'ति महानिशीथे। अत्र चतुर्दशीशब्देन पाक्षिकमेवोक्तम्। यतोऽन्यत्रापि प्रायश्चित्ताधिकारे चतुर्दशीशब्दपरिहारेणैव पाक्षिकशब्दग्रहणम् दृष्टं, न पुनः पाक्षिकचतुर्दशीशब्दयोरेकत्र ग्रहणम्।

तथाहि-'अट्ठमीए चउत्थं, पक्खिए चउत्थं, चउम्मासिए छट्ठं, संवत्सरिए अट्ठमं न करिंति पच्छित्तं। चशब्देन एएसु चेव चेईयाइं साहुणो वा जे अण्णाए वसहीए ठिया ते न वंदंति पच्छित्तं'ति, व्यवहारपीठचूर्णौ। एवमावश्यक-निशीथ-पाक्षिकचूर्ण्यादिष्वपि यत्र चतुर्दशीशब्दग्रहणं, न तत्र पाक्षिकशब्दग्रहणं। यत्र पाक्षिकशब्दग्रहणं, न तत्र चतुर्दशीशब्दग्रहणं। अतो 'ग्रन्थस्य ग्रन्थान्तरं टीका'इतिन्यायात् पाक्षिक-चतुर्दशीशब्दावेकार्थवाचकत्वेनाऽन्योऽन्यं पर्यायरूपावेवेति बोध्यम्। किञ्च-यथा पाक्षिकचतुर्दशीशब्दोपलक्षितचतुर्थाऽकरणे प्रायश्चित्तमुक्तं, न तथा पूर्णिमाशब्दोपलक्षितचतुर्थाऽकरणेऽपीति। किञ्च-दशाश्रुतस्कन्धचूर्णौ पाक्षिकशब्दस्य चतुर्दशीत्वेन व्याख्यानोपलब्धिरपि। तथाहि-'पक्खियपोसहियसुसमाहिपत्ताणं'ति दशासूत्रं। चूर्णिव्याख्या त्वेवं-'पक्खियं पक्खियमेव, पक्खिए पोसहो पक्खियपोसहो चाउद्दसिअट्ठमीसु वा समाहिपत्ताणं'ति। अत्र द्वितीयव्याख्याने साष्टमीचतुर्दशीग्रहणेन प्रथमव्याख्याने पाक्षिकशब्देन चतुर्दश्येव गृहीताऽवसातव्या। एतेन प्रथमव्याख्याने पाक्षिकशब्देन राकारक्तानां राकाऽपि परास्ता। प्रथमव्याख्यायां पाक्षिकशब्देन पूर्णिमाग्रहणे द्वितीयव्याख्यायां मुख्यार्थपरित्यागेन निराश्रयत्वापत्तेः। त्वन्मताभिप्रायेण तथाविधव्याख्येयसूत्रस्याभावात्। यच्च श्रीदेवचन्द्रसूरिकृतठाणाङ्गवृत्तौ-'एवं कारणे कालिगायरिएहिं चउथीए पज्जोसवणं पवत्तियं समत्थसंघेण य अणुमण्णियं तव्वसेण य पक्खियाईणि चउद्दसीए आयरि-

याणि, अण्णह आगमुत्ताणि पुण्णिमाए'त्ति लिखितमस्ति। तत्र 'तव्वसेण य चउम्मासियाणि चउद्दसीए आयरणे'त्यभिप्रायवत एव ग्रन्थकर्त्तुः छाद्मस्थ्येनाऽनाभोगादेव'पक्खियाईणि'त्तिपद-मापतितम्। अनाभोगस्य च क्षणिकसंशयवदतिचाररूपत्वेन सम्यग्दृशामपि सम्भवात्। उक्तं च—

'सम्मदिट्ठी जीवो, उवइट्ठं पवयणं तु सद्दहइ।

सद्दहइ असब्भावं, अणभोगा गुरुनिओगा वा' ॥१॥ इति। [ उत्तरा० नि० ] स चानाभोगो देशेनैवावसातव्यः। सम्यग्दृशां हि तस्य देशेनैव सम्भवात्। सर्वथाऽनाभोगस्तु एकेन्द्रियादीनामेवेति भावः। यद्वा केनचिद् रागारक्तेनैव मतान्तरीयेण परावृत्त्याऽक्षराणि लिखितानीति बोध्यम्। तच्च कुतो ज्ञातमिति? स्थानाङ्गवृत्तिवचनादेव। तद्वचनं च-'अण्णह आगमुत्ताणि पुण्णिमाए'त्ति ज्ञेयं। अयं भावः-एवं च कारणे सति श्रीकालिकाचार्यैः पर्युषणापर्व चतुर्थ्यां प्रवर्त्तितम्। तद्वशेन च यदागमोक्तं पूर्णिमायामासीत्तच्चतुर्दश्यामेवाऽऽचरितमिति स्थानाङ्गवृत्तिकर्त्तुरभिप्रायः। तथाचाऽऽगमेऽवलोक्यमाने पाक्षिकं पूर्णिमायां नोक्तं, किन्तु चतुर्मासकमेव। उक्तं च-'से णं लेवे गाहावई समणोवासए अहिगयजीवाजीवे' इत्यादिस्तत्र लेशस्य वृत्तिरियं-'तथा चतुर्दश्यष्टम्यादिषु तिथिषु, उद्दिष्टासु-महाकल्याणकसम्बन्धितया पुण्यतिथित्वेन प्रख्यातासु, तथा पौर्णिमासीषु च तिसृष्वपि चतुर्मासकतिथिष्वित्यर्थः। एवम्भूतेषु धर्म्मदिवसेषु सुष्ठ्वतिशयेन प्रतिपूर्णो यः पौषधो-व्रताभिग्रहविशेषस्तं प्रतिपू-

र्णमाहारशरीरब्रह्मचर्याऽव्यापाररूपं पौषधमनुपालयन् सम्पूर्णं श्रावकधर्म्ममनुचरती'ति सूत्रकृदङ्गद्वितीयश्रुतस्कन्धसप्तमाध्ययने लेपश्रावकवर्ण्णके। तस्मात् स्थानाङ्गवृत्तिकर्तुरभिप्रायश्चतुर्दश्यां चतुर्मासकाऽऽचरणेत्येवावसातव्यः। अन्यथा 'अण्णह आगमुत्ताणि पुण्णिमाए'त्ति व्यतिरेकवचनं नाभिदधीत। अलीकागमवचनं दर्शयतो वा [यो] धावत २ भो डिम्भास्तरङ्गिणीतीरे गुडशकटं विपर्यस्तमिति धूर्त्तवाक्यस्येवाऽप्रमाणतापत्तेः, अभिलषितार्थाऽप्रापकत्वेन व्यभिचारित्वात्। अभिलषितार्थाऽप्रापकत्वं च पूर्णिमायां पाक्षिकमागमोक्तमिति त्वदीयं वचः श्रुत्वा कश्चित्सम्यक् प्रज्ञापोतमवाप्याऽमुद्रसमुद्रमागममवगाहते। आगमे च तथाविधविचारस्याऽऽकाशकुसुमस्येवात्यन्तासत्त्वात् तस्य पुंसस्तथाविधविचारस्य दर्शनाभाव एव। तथा च सिद्धं 'तव्वसेण य चउम्मासियाणि वि चउद्दसीए आयरणे'ति पाठे ग्रन्थकर्त्तुराकूतं। एतेन क्वचिज्जीर्ण्णपुस्तके लिखितायां कालिकाचार्यकथायां-'तव्वसेण य चउम्मासिआणि वि चउद्दसीए आयरणे'ति पाठो दृश्यते, स एव सत्यतया स्वीकर्त्तव्यः, न पुनर्नूतनपुस्तकेषु क्वचित् 'पक्खिआणिवि चउद्दसीए आयरणे'तिपाठः। तस्य पाठस्य मतान्तरीयेण परावर्त्तितत्वात्। एवं कथावल्यामपि-'पक्खियपडिक्कमणत्थ'मित्येतावन् मात्रग्रन्थकर्त्तुरनाभोगः, पाश्चात्यप्रक्षेपो वाऽवसातव्यः। कथावली तावत्कल्पचूर्ण्णेरुद्धारः। कल्पचूर्णौ-'अमावस्यायां पर्व्वोपवासस्ये'त्येव मात्रं भणितमिति। यच्चावश्यकचूर्णौ

सव्वेसु कालपव्वेसु सुपसत्थो जिणमए जहा जोगो।
अट्ठमिपण्णरसीसु य नियमेण हविज्ज पोसहिउ ॥त्ति पाठः।

तत्र 'पुव्वावरेण परिभाविऊण सुत्तं पयासिअव्वं'तिवचनात् पूर्वापरसम्बन्धमालोच्य सूत्रेऽत्र व्याख्या कर्त्तव्या। तथा च प्रथमपाठे पञ्चदशीपदं चतुर्दश्या उपलक्षकं, द्वितीयपाठे चतुर्दशीपदं पञ्चदश्या उपलक्षकमिति। अन्यथाऽऽवश्यकचूर्णौ च विसंवादः स्यात्। यतस्तत्रैव चूर्णौ प्रतिमाधिकारे-'चाउद्दसि-अट्ठमी-पुण्णिमासिणीसु पडिपुण्णं पोसहं सम्मं अणुपालेत्ता भवती'ति गदितम्। किञ्च-यदि पूर्णिमायां पाक्षिकमागमोक्तमभविष्यत्, कथं तर्हि पूर्णिमीयकमताऽऽकर्षकचन्द्रप्रभाऽऽचार्यस्य गुरुभ्राता श्रीमुनिचन्द्रसूरिः पाक्षिकसप्ततिकायामागमोक्तं चतुर्दश्यां पाक्षिकमसाधयिष्यत्। कथं वा श्रीमुनिचन्द्रसूरिप्रमुखसमस्तसङ्घेन निवारितोऽपि स्वाभिनिवेशमत्यजन्नेव चन्द्रप्रभाऽऽचार्यः पूर्णिमायां पाक्षिकं प्रवर्त्तितवानिति वृद्धसम्प्रदायोऽप्यभविष्यदित्यादिसुयुक्तिखरशाणसम्पर्क्केण स्ववाक्करवालमुत्तेजीकृत्य धीमद्वैरे राकारक्तेन्द्रजालजालं विलूनविशीर्ण्णं कार्यमिति।

अथौष्ट्रिकमते स्त्रीणां जिनपूजानिषेधस्तत्र कुयुक्त्युद्भावना त्वेवं-स्त्रियो जिनपूजायोग्या न भवन्ति, नियतापावित्र्योपेतत्वात्, साश्रवव्रणोपेतपुरुषवदिति। अत्र सुयुक्त्युद्भावना त्वेवं-स्त्रीणामपावित्र्यं कादाचित्कं सार्वदिकं वा। आद्ये, पुरुषाणामपि जिनपूजाऽनर्हत्वप्रसक्तेः। तेषामपि जिनप्रतिमाऽऽशातनाहेतुभूतस्य कादाचित्कस्य नियताऽपावित्र्यस्य सद्भावात्। द्वितीये,

नमस्कारादिश्रुताध्ययनाऽध्यापनप्रतिक्रमणादिधर्म्मानुष्ठानमात्र-स्याऽप्युच्छेदाऽऽपत्तेरित्याद्यनेकयुक्तिज्योतिःकलापकलितां मत्कृ-तौष्ट्रिकमतोत्सूत्रप्रदीपिकामादाय विद्वद्वरैरौष्ट्रिकमतोत्सूत्रोद्भूत-ध्वान्तविध्वंसो विधेयः।

अथ अञ्चलमते श्रावकश्राविकाणां मुखवस्त्रिकादिनिषेधः। तत्र कुयुक्त्युद्भावना त्वेवं-श्राद्धानां मुखवस्त्रिकादिरजोहरण-ग्रहणं नोचितं, साधुलिङ्गत्वात्, तुम्बिकादिपात्रग्रहणवदिति। तत्र सुयुक्त्युद्भावना त्वेवं-भो स्तनिक! मुखवस्त्रिकादेः साधुलि-ङ्गत्वं कुतः?। किं साधुभिरुपात्तत्वात् उपादाने वा साधुसारूप्य-भवनादुत तीर्थकृद्भिः साधूनामेवोपदिष्टत्वाद्वा?। आद्ये, धान्या-दन-जलपान-वस्त्रपरिधान - सुपात्रदान-सुध्वान-तत्त्वार्थश्रद्धा-न-धर्म्मध्यान-गुर्वादिबहुमान-ग्रामनगरादिसंवास-सुविद्याभ्या-स-करग्रास-पादन्यास-नमस्कारजापादीनां साधुभिरङ्गीकृतत्वेन त्वदीयमतवासिभिर्गृहस्थैश्छगणभक्षण-स्वेदबिन्दुपान-कण्टकशा-खापरिधान-कुपात्रदान-रुदनादिक्रियाविशिष्टध्वान-तत्त्वार्थाऽ-श्रद्धान-हिंसादिध्यान-गुर्वादिगालिप्रदान-चाण्डालादिपाटकवा-स-होलिकादिगीताभ्यास-भूमुखसम्पर्कग्रासशिरोन्यास-म्लेच्छ-जाप्यजापादिकमेव स्वीकर्तव्यं स्यात्। द्वितीये तु प्रत्यक्षबाधः। न हि शिरःकूर्चलोचप्रलम्बकर्णाद्यभाव-कच्छोटिकादिसद्भाव-मुद्रिकाद्याभरणविभूषादिभिर्वैरूप्यस्य विद्यमानत्वेऽपि मुखवस्त्रि-कादिमात्रेणापि साधुसारूप्यं सम्भवति। तृतीये त्वाऽऽगम-बाधः। सामायिकादिक्रियासाधकतमत्वेन मुखवस्त्रिकादेः

श्राद्धश्राद्धीनामप्यागमे तीर्थनाथैः प्रणीतत्वात्। तथाहि—'से-किं तं लोउत्तरियं भावावस्सयं ? २ जण्णं समणो वा समणी वा सावओ वा साविआ वा तच्चित्ते तम्मणे तल्लेसे तदज्झवसिए तदज्झवसाणे तदत्थोवउत्ते तदप्पियकरणे अण्णत्थ कत्थइ मणं अकुव्वमाणे उभओ कालं आवस्सयं करेंति'त्ति अनुयोगद्वार-सूत्रे। एतद्वृत्त्येकदेशो यथा-'तदर्पितकरणः। करणानि-तत्साध-कतमानि देह-रजोहरण-मुखवस्त्रिकादीनि, तस्मिन्नावश्यके यथो-चितव्यापारनियोगेनाऽर्पितानि-नियुक्तानि तानि येन स, यथा-स्थानन्यस्तोपकरण इत्यर्थः'। एतत्पदलेशस्य चूर्णिस्त्वेवं-'तस्साह-णे जाणि 'सरीररजोहरणमुहणंतगाइयाणि दव्वाणि किरियाकर-णत्तणओ अप्पियाणि'त्ति। इत्याद्यनेकसुयुक्तिव्यक्तीकृतैरञ्चलम-तदलनाचलतमसदुत्तरादिभिः प्राचीनाऽऽचार्यविरचितग्रन्थमु-ष्टिभिरञ्चलमतमुपमर्दनीयम्। अथ सार्धपूर्णिमीयकमतं तु पूर्णि-मामाश्रित्य तावत् पूर्णिमीयकमतसमानमेवेत्यतस्तदपास्ताविद-मप्यपास्तमेवेति बोध्यम्। 'सार्धपूर्णिमीयक' इत्यस्य नाम्नः सान्वर्थता पूर्णिमीयकभिन्नता च सम्यगाम्नायविद्विद्वद्भ्योऽव-सातव्या। अथ त्रिस्तुतिकाऽपरपर्यायाऽऽगमिकमते श्रुतदेवता-दिस्तुतिनिषेधस्तत्र कुयुक्त्युद्भावना त्वेवं-शासनश्रुतदेवतास्तुतिः सम्यक्त्वमालिन्यहेतुः, देवतास्तुतित्वात्, चामुण्डादिस्तुतिवदि-ति। यद्वा शासनश्रुतदेवताद्यपेक्षया प्रबलबलवत्तीर्थकरादिभ्यश्च-ऐहिकनिर्विघ्नता-श्रुताद्यर्थप्रार्थना न फलवती, तर्हि शासनश्रुत-देवतादिभ्यः कथमित्याशयेनाऽनुमानाऽन्तरं यथा-ऐहिकनिर्वि-

घ्नता-श्रुताद्यर्थप्रार्थना तीर्थकरादिभ्योऽफलवत्त्वे सति शासनश्रुत-देवतादिभ्यो न फलवती, तेषां तीर्थकराद्यपेक्षयाऽल्पबलत्वात्। सामान्येन व्याप्तिग्रहस्त्वेवं-यो यदपेक्षयाऽल्पबलः, स तदधिक-बलवदसाध्यसाधको न भवति। यथा चक्रवर्त्यपेक्षया भूमण्ड-लाधिपः। तस्मादैहिकनिर्विघ्नता-श्रुताद्यर्थप्रार्थनायाः फलवद्वि-धानाय तीर्थकरादय एव स्मृत्यादिगोचरीकार्याः, न पुनः श्रुतदे-वतादय इति। तत्र सुयुक्त्युद्भावना त्वेवं-तत्र प्रथमानुमानं ता-वदाऽऽगमबाधितमेव, सम्यग्दृग्देवतास्तुतेर्बोधिबीजसुलभता-हेतुत्वेनाऽऽगमे प्रतिपादनात्। उक्तं च श्रीस्थानाङ्गे-'पंचहिं ठाणेहिं जीवा सुलहबोहियत्ताए कम्मं पकरेंति, तं० अरहंताणं वण्णं वदमाणे, अरहंतपण्णत्तस्स धम्मस्स व०, आयरियउवज्झा-याणं व०, चाउवण्णस्स संघस्स व०, विवक्कबंभचेराणं देवाणं वण्णं वदमाणे'त्ति [सू०४२६]। तथा सत्प्रतिपक्षताऽपि। शासन-देवतास्तुतिर्न सम्यक्त्वमालिन्यहेतुः, आगमोपदिष्टत्वात्, तीर्थ-करादिस्तुतिवदिति। आगमोपदिष्टत्वं च सामान्यतोऽनन्त-रोक्तं। व्यक्तितस्त्वग्रे वक्ष्यते। यद्वा शासनश्रुतदेवतास्तुतिर्न सम्यक्त्वमालिन्यहेतुः सम्यक्त्वहेतुर्वा, सम्यग्दृष्टिदेवतास्तुति-त्वात्, तीर्थङ्करजन्माद्युत्सवादिप्रवचनप्रभावनापरायणपुरन्दर-स्तुतिरिव। विधेयतयाऽऽगमानुपदिष्टत्वमुपाधिरपि। किञ्च-यदि सामान्यहेतुना देवतास्तुतित्वेन सम्यक्त्वमालिन्यहेतुत्वं साध्यते, साध्यतां तर्हि मनुष्यत्वादिसामान्यहेतुनाऽन्यतीर्थिकदृष्टान्तेन तीर्थकरादीनामप्यनाराध्यता। तस्माद् यत्किञ्चिदेतत्। द्विती-

यानुमाने तु प्रत्यक्षबाधः, प्रबलबलवद्दिनकराद्यसाध्यानामपि भूमिगृहगतध्वान्तविनाशाद्यर्थानां दिनकराद्यपेक्षयाऽल्पबलैरपि प्रदीपादिभिः साध्यमानत्वेन दर्शनात्। उक्तमपि—

'विश्वान्धकारविध्वंस-हेतुर्हेलिर्महानपि।

नालं प्रदीपवद् भूमि-गृहान्तस्तमसोऽपहृत्॥१॥ एवं शासनश्रुतदेवताद्यपि क्वापि तीर्थकराद्यसाध्यस्यापि कार्यस्य प्रसाधकमिति न दोषः। 'आपेक्षिकी हि प्रवचने स्याद्वादमुद्रे'ति वचनात् एकस्मिन्नपि वस्तुनि सामर्थ्यासामर्थ्ययोरपेक्षया च स्वीकारात्। यथा रिपुबलमर्दनसमर्थोऽपि करी न सर्षपकणमादातुं समर्थः। एतेन तीर्थप्रवर्तनात् सर्वोपकारित्वेन सर्वेषामप्याराध्योऽर्हन्नेवाऽऽराधितः सर्वेप्सितार्थसम्पादको भविष्यतीति व्यर्थमेव तदतिरिक्ताऽऽराधनमित्यपि शङ्का निरस्ता। तीर्थकरस्मरणादिनाऽनुपलभ्यमानानामप्यैहिकश्रुताद्युपसम्पदामाचार्यादिपर्युपासनादित एवोपलभ्यमानत्वात्। उक्तं च—

'विणओणएहिं पंजलि-उडेहिं छंदमणुवत्तमाणेहिं।

आराहिओ गुरुजणो, सुयं बहुविहं लहुं देइ'॥१॥

[ आव० नि० गा० १३८ ] यच्च गणधरान् प्रत्यर्हन्तः श्रुतदायकास्तद्दायकग्राहकयोरतिशयविशेषादेव, न पुनराचार्यादिवदिति बोध्यम्। किञ्चाऽर्हतोप्याराधनमर्हदाज्ञाङ्गीकरणपूर्वकमेव भवति। आज्ञा च सर्वाऽऽराध्याराधनविषयिणी। तथा चाऽऽराध्यत्वेनोपदिष्टस्य तीर्थस्यान्तर्भूतानां शासनश्रुतदेवतादीनां सामान्येनाऽऽराध्यत्वेऽपि नामग्राहेण पृथगप्याराधनमागमोक्तम्।

तथाहि—'पारियकाउस्सग्गो पर-मिट्ठीणं च कयनमुक्कारो ।
वेयावच्चगराणं, दिज्ज थुइ जक्खपमुहाणं' ॥१॥ बृहद्भाष्ये

न चैतद् वचोमात्रेण, करणतोऽपि बहुश्रुतपरम्परया स्तुति-चतुष्कस्यैव रूढिरप्यस्ति । तस्याश्चान्यथाकरणे महत्याशातना । उक्तं च समवायाङ्गसूत्रे-'रायणियपारिभासी थेरोवघाए'त्ति । एतद्वृत्तिस्त्वेवं-'रात्निकपारिभाषी-आचार्यादिपूज्यपुरुषपरिभव-कारी, स चात्मानमन्यांश्चाऽसमाधौ योजयत्येव । तथा स्थवि-रा-आचार्यादिगुरवस्तानाचारदोषेण शीलदोषेण च ज्ञानादिभि-र्वोपहन्तीत्येवंशीलः स एव चेति स्थविरोपघातक' इत्यादि ।

तथा—'हुत्तियहुंति चरित्ते दंसणनाणे अइक्कइक्को य ।
सुयखित्तदेवयाए, थुइ अन्ते पंचमंगलयं ॥१॥

तथा—चाउम्मासिअ वरिसे, उस्सग्गो खित्तदेवयाए उ ।
पक्खिय सिज्जसुरीए, करिंति चउम्मासिए वेगे' ॥१॥ आव-श्यककायोत्सर्गनिर्युक्तौ । एतद्वृत्तौ-'चाउम्मासिय-संवच्छरिएसु सव्वेवि मूलगुणउत्तरगुणाणं आलोअणं दाउं पडिक्कमंति, खित्तदेवयाए उस्सग्गं करेंति, केई पुण चाउम्मासिएसु सिज्जादे-वयाए करेंति'त्ति । एतच्चूर्णिस्त्वेवं-'चाउम्मासिए एगो उवसग्ग-देवयाए काउस्सग्गो कीरति, संवत्सरिए खित्तदेवयाए कीरति अब्भहिउ'त्ति । तथाऽऽवश्यकचूर्णौ श्रुतदेवताया महती प्रतिप-त्तिर्दृश्यते । तथाहि—'सुयदेवयाए आसायणाए । सुतदेवता जीए सुतमहिट्ठियं तीए आसायणा-नत्थि सा, अकिञ्चित्करी वा, एव-मादि' । एवमनेकेषु ग्रन्थेषु ज्ञेयम् । त्वरितं तज्जिज्ञासुभिर्विचा-

रामृतसङ्ग्रहोऽवलोकनीयः। ननु तर्हि सम्यग्दृष्टिदेवतातोऽलभ्यस्याऽर्थस्य प्राप्तये लौकिकदेवत्वेन प्रतीतानां चामुण्डादीनामाराधनं कुर्वतां कथं लौकिकमिथ्यात्वं ? इति चेत्। उच्यते-मिथ्यात्वं तावद् वैपरीत्यश्रद्धानं। तच्च वस्तुविपर्ययबोधाद् भवति। वस्तुविपर्ययाऽवबोधस्तु जगदुदरवर्तिनः सर्वस्यापि शोभनार्थस्य सम्यग्दृष्टिसाध्यत्वेऽपि तदसाध्यत्वपरिज्ञानात्, सम्यग्दृशां प्रवचनाप्रतिकूलार्थप्रार्थनाया मिथ्यादृष्टितोऽफलवत्त्वेऽपि फलवत्त्वपरिज्ञानाच्च मिथ्यादृष्टिदेवताराधने भवत्येव। प्रवचनप्रतिकूलार्थप्रार्थनायां तु सुतरां मिथ्यात्वमित्यत्र बह्व्यो युक्तयो ग्रन्थगौरवभयान्नोच्यन्ते। इत्यलं विस्तरेणेत्यादिसुयुक्तिस्फटिकशिलातले त्रिस्तुतिकमदिरामृद्भाण्डं शतशः शकलीकार्यं सकलैरिति। दिगम्बरादित्रिस्तुतिकान्तानां षण्णां विस्तरस्तूत्सूत्रकन्दकुद्दालादवसातव्यः। अथ लुम्पाकमते जिनप्रतिमानिषेधः। तत्र कुयुक्त्युद्भावना त्वेवं-अर्हन् द्रव्यस्तवार्हो न भवति, त्यक्तसङ्गित्वात्, साधुवत्। एवमर्हत्प्रतिमापि त्यागिमूर्तित्वादपूज्या साधनीया। यद्वाऽर्हत्प्रतिमा नाराध्या अचेतनत्वात्, ज्ञानादिरहितत्वात् वा, काष्ठवदिति। तत्र सुयुक्त्युद्भावना त्वेवं-अर्हति शक्रादिकृतां पूजामित्यर्हन्निति शब्दव्युत्पत्त्यैव त्रिजगत्पूज्यत्वं त्रिजगद्गुरोः सिद्धम्। तच्च समव्याप्तत्वाद्यथा भावतस्तथा द्रव्यतोऽपि। द्रव्यपूजाऽनुमोदनारूपत्वाद् भावपूजायाः। समव्याप्तत्वं तु य एव द्रव्यपूजार्हः, स एव भावपूजार्हः। य एव भावपूजार्हः, स एव द्रव्यपूजार्हः। एवं च सति द्रव्यपूजाऽनर्हत्वसाध्येऽर्हं

मौनीत्यादिवद्वद्व्याघातः। तथा च त्यक्तसङ्गित्वादिति हेतुरन्वयव्यतिरेकाभ्यां व्यभिचार्येव। तत्राऽन्वयव्यभिचारो यथा-यो यस्त्यक्तसङ्गी स द्रव्यस्तवार्हो न भवतीति नास्ति, भगवत्येव व्यभिचारात्। एवं व्यतिरेकेऽपि-यो यो द्रव्यस्तवार्हः स त्यक्तसङ्गी नास्तीति न, अर्हत्येव व्यभिचारात्। अर्हतो द्रव्यस्तवाऽर्हत्वेऽपि त्यक्तसङ्गित्वात्। अन्यथा लुम्पाकमताभिप्रायेण वेश्यादिजनस्यैव द्रव्यस्तवाऽर्हत्वापत्तेः, तस्य त्यक्तसङ्गित्वाभावात्। एवं दृष्टान्तोऽपि साध्यविकलः, साधोरपि द्रव्यस्तवाऽर्हत्वात्। उक्तं च श्रीस्थानाङ्गे—'सत्तहिं ठाणेहिं छउमत्थं जाणेज्जा, तं० पाणे अइवाइत्ता भवति १ मुसं वइत्ता भवति २, अदिन्नमादित्ता भवति ३, सद्दरूवरसगंधफरिसे आसाइत्ता भवति ४, पूजासक्कारे अणुवूहेत्ता भवति ५, इमं सावज्जंति पण्णवेत्ता पडिसेवित्ता भवति ६, णो जहावाई तहाकारी आवि भवति ७, त्ति [सू० ५५०]। अत्र वृत्त्येकदेशो यथा-'पूजा-सत्कारे-पुष्पाद्यर्चन-वस्त्राद्यर्चने अनुबृंहयिता-परेण स्वस्य क्रियमाणस्य तस्याऽनुमोदयिता, तद्भावे हर्षकारीत्यर्थः'। अत्र द्रव्यस्तवपुष्पाद्यर्चने सति हर्षकारित्वं हि छद्मस्थस्वरूपं सूचितं, परं द्रव्यस्तवार्हत्वं त्ववश्यं सिद्धमेव। द्रव्यस्तवश्च साधूनां हितमपि। उक्तं च-'छ ट्ठाणाइं अत्तवतो हियाए सुहाए खमाए निस्सेसाए आणुगामियत्ताए भवंति, तं०-परियाए परियाले तवे सुए लाभे पूयासक्कारे'त्ति। तथा 'तिहिं ठाणेहिं माई मायं कट्टु नो आलोएज्जा जाव नो पडिवज्जेज्जा तं०-कित्ती वा मे परिहाइस्सति, जसो वा मे परिहाइस्सति, पूआ

सक्कारे वा परिहाइस्सति'। एतत्सूत्रस्य वृत्तिर्यथा-'मायंकट्टुत्ति'। मायां कृत्वा-मायां पुरस्कृत्य-माययेत्यर्थः, परिहास्यति-हीना भविष्यति पूजा-पुष्पादिभिः, सत्कारो वस्त्रादिभिः। इदमेकमेव विवक्षितमेकरूपत्वादिति। इदम् तु प्राप्तप्रसिद्धपुरुषापेक्षम्। शेषं सुगम'मिति। इति स्थानाङ्गतृतीयस्थानकतृतीयोद्देशके [ सू० १६८ ] अत्र यद्यत् कृतापलापहेतुस्तत्तन्निवारकमपीति न्यायात् पुरुषविशेषम् प्रतीत्य द्रव्यपूजा संयमरक्षाहेतुरपीति सूचितं-बोध्यम्। तथा—

'अच्चणं रयणं चेव, वंदणं पूअणं तहा।

इड्ढीसक्कारसम्माणं, मणसा वि न पत्थए ॥१॥ 'त्ति पञ्चत्रिंशत्तमोत्तराध्ययने। न चैतद् वचनं निषेधपरं भविष्यतीति-शङ्कनीयं, वन्दनसत्कारश्राद्धादिसम्पत्साहचर्यात् पूजादिकर्तुर्भक्तस्य विधिसूचकत्वात् साधोर्निःस्पृहतासूचकत्वाच्च निःस्पृहस्यैव साधोः पूजाद्यर्हत्वात्। अन्यथा सत्कारवन्दनादिनिषेधप्रसक्त्या सर्वाऽऽगमविरोधेनाऽत्यन्तमासमञ्जस्यं स्यात्। किञ्च-निःस्पृहस्य साधोर्भक्तेनाऽवश्यं पूजादि कर्तव्यमेवेति। ज्ञापकं तु सूत्रकृदङ्गवृत्तावप्युक्तं। तथाहि-'यद्यप्यसौ पूजनीयः किमपि नेच्छति तथापि तेन तस्य परमार्थोपकारिणो यथाशक्त्या विधेय'मिति-सूत्रकृदङ्गवृत्तौ पूजादिकमाश्रित्य श्रीगौतमेनोदकं प्रत्युक्तमिति-बोध्यम्। तथा चाऽऽचाराङ्गनिर्युक्तिवृत्त्यादौ तीर्थकरगणधरादीन् सुगन्धादिना सम्पूजयतो दर्शनशुद्धिरप्युक्तेति। तस्मात्प्रथमानुमानस्यानेकदोषजर्जरीकृतत्वेन स्वसाध्यसाधनाऽक्षमत्वात्

सिद्धं तद्विपरीतं त्रिजगत्पूज्यस्याऽर्हतो द्रव्यस्तवार्हत्वमपि। तथा द्वितीयानुमानमपि सत्प्रतिपक्षितमागमबाधितं च। तथाहि-अर्हत्प्रतिमा यथोचितविधिनाऽऽराध्या भावार्हत्स्मृतिहेतुत्वात्, नामाऽर्हद्वत्। एवं द्रव्यार्हन्नपि आराध्यभावहेतुत्वेन द्रव्यश्रुतवदाराध्यः साध्यः। आगमबाधितत्वं तु बहुप्रतीतं ग्रन्थगौरवभयाच्च सविस्तरं लिखितुमशक्यमितिकृत्वा दिग्मात्रदर्शनार्थं किञ्चिदुपदर्श्यते-तत्र तावत् साधुसाध्वीनामाराध्यत्वमर्हत्प्रतिमायाः श्रीकल्पसूत्रसामाचारीगत'विहारभूमिंसि'त्तिपदादवसातव्यं। तद्व्याख्याने चैत्यगमनमित्याद्युक्तम्। एवं भगवत्यामपि विंशतितमशतके नवमोद्देशके-जङ्घाचारण-विद्याचारणश्रमणानां नन्दीश्वरादिषु चैत्यवन्दननिमित्तं गमनाऽऽगमनादि निगदितमिति बोध्यम्। श्रावकश्राविकादीनां त्वौपपातिकोपाङ्ग-ज्ञातधर्मकथाङ्गादिषु अम्बड-द्रौपद्यादिदृष्टान्तेन बोध्यम्। एवं देवादीनामपि जीवाभिगम-राजप्रश्नीयोपाङ्गादिषु विजयदेव-सूर्याभदेवादिदृष्टान्तेन प्रतीतमेव। एवं ज्ञानादिरहितत्वादिहेतवोऽपिबाधादिदोषपो (दो) षिता एवेत्यादि सुयुक्तिजलेन लुम्पाकमतमलक्षालनं विधेयमिति।

अथ कटुकमते सम्प्रति साधुदर्शननिषेधस्तत्र कुयुक्त्युद्भावना त्वेवं-गूर्जराऽवनिप्रभृतिषु साधवो न दृष्टिपथमायान्ति, तथा विधाऽऽचाराऽदर्शनात्। प्रयोगस्तु विप्रतिपन्नाः साधवो न भवन्ति, प्रवचनोक्ताऽऽचाराऽविधायकत्वात्, इतरजनवदिति। तत्र सुयुक्त्युद्भावना त्वेवं-'तथाविधाऽऽचारस्यादर्शनादित्यत्र'

तथाविधाऽऽचारः किं जिनकल्पिकाऽऽचारः स्थविरकल्पिकाऽऽचारो वा ?। आद्ये, व्युच्छिन्नत्वाद्युक्तमेव। द्वितीये, प्रत्यक्षबाधः। बकुशकुशीलचारित्रे वर्तमानानां सम्प्रति भूयसां स्थविराणां दृश्यमानत्वात्। एतेन साधूनामदर्शनसाधनमनुमानमकिञ्चित्करमेव। अन्यथा श्रावकधर्मस्याप्यभावापत्तेः, साधूपदेशादिमूलकत्वात्तस्येत्यत्र बहु वक्तव्यम्, ग्रन्थगौरवभयान्नोच्यत इत्यलं विस्तरेणेत्यादिसुयुक्तियष्ट्या कटुकचटुः शिक्षणीयः।

अथ वन्ध्यमते कुयुक्तिपूर्वकसुयुक्त्युद्भावनं तु प्रायः पूर्णिमीयकमतादिसमानमेवेति बोध्यम्। अत एवाऽस्य सङ्करमतीतिनामान्तरेण श्रीमहावीरद्वात्रिंशिकादौ निदर्शनमिति। पाशचन्द्रमते जिनपूजादिषु साधूपदेशनिषेधस्तत्र कुयुक्त्युद्भावना त्वेवं-अर्हद्द्रव्यपूजाविषयः साधूपदेशो न सम्भवति, जलकुसुमादिसचित्तविराधनादिसम्भवेन सावद्यत्वात्। प्रयोगस्तु-द्रव्यपूजा साधूपदिष्टा न सम्भवति, सावद्यत्वात्, कृषिकर्मवदिति। तस्य कदाशयस्त्वेवं-मेर्वादयो हि जैनप्रवचने यथास्थितिवादेन, प्ररूपिताः, द्रव्यपूजादयस्तु चरितानुवादेन, निरवद्यसाध्वाचारादयो हि विधिवादेन चेति। तस्माद् द्रव्यपूजा चरितानुवादात् प्रवर्तते, न पुनः साधूपदेशेन विधिवादात्। अत एव स्वमतप्रवर्तनकाले प्रथमतस्तेन मृगजनपाशकल्पेन पाशेन स्वमतिकल्पनया पट्टकूलसम्बन्धीनि कृत्रिमकुसुमानि जिनपूजानिमित्तं प्रकाशितानि। ततश्च कियत्कालानन्तरं पुनरपि सचित्तकुसुमानीति प्ररूपितानि। तत्र सुयुक्त्युद्भावना त्वेवं-मोक्षं प्रति

जिगमिषूणां यतिधर्मः श्रावकधर्मश्चेति द्वौ पन्थानौ पारगतैः प्रज्ञप्तौ। तत्र यतिधर्मे भावपूजैव, श्रावकधर्मे तु द्रव्यपूजा-पुरस्सरं भावपूजेति। तत्रोभयोरपि मार्गयोः जिनपूजायाः सम्यक्त्वकरणीयत्वात् संवररूपत्वम्। उक्तं च श्रीस्थानांगे-'पंच संवरदारा पं० तं०—संमत्तं १, विरती २, अप्पमादो ३, अकसातित्तं ४, अजोगित्तं ५, ति। व्याख्या-'संवरणं-जीवतडागे कर्मजलस्य निरोधनं संवरस्तस्य द्वाराणि-उपायाः संवरद्वाराणि, मिथ्यात्वादीनामाश्रवाणां क्रमेण विपर्ययाः सम्यक्त्वविरत्यप्र-मादाऽकषायित्वाऽयोगित्वलक्षणा' इति। संवरस्तु विधिवादे-नैव जिनोपदिष्टत्वात् साधूपदिष्ट एव। अन्यथा श्रावकधर्मोऽपि जिनाज्ञाबहिर्भूतः स्यात्। तथात्वे चात्यन्तमासमञ्जस्यम्। तस्मात् श्रावकधर्मवत्तदन्तर्गतत्वेन द्रव्यपूजाया अपि जिनोप-दिष्टत्वमेव। तथा च सिद्धमनुमानमागमबाधितं हेतुश्च स्वरू-पासिद्ध एव। ततो दृष्टान्तोऽप्यसङ्गत एव, तस्य चाऽऽश्रवरू-पत्वात्। अन्यथा छद्मस्थप्रवृत्तिर्जिनाज्ञाबहिर्भूतैव स्यात्। तच्च सर्वजनप्रतीतिबाधितमित्यादिसुयुक्तिशस्त्र्या पाशचन्द्रव्या-धपरिकल्पितपाशः कर्तनीयः। अथ दिग्मात्रदर्शनार्थं दशानाम-प्येकैकमुत्सूत्रमादाय कुयुक्त्युद्भावनापूर्वकसुयुक्त्युद्भावनां सन्दर्श्य विस्तरजिज्ञासोर्दिशं दर्शयन्नाह—

दिग्मितानाममीषां चेज्जिज्ञासा व्यक्तितो भवेत्।
कुपक्षकौशिकाऽऽदित्यो, मत्कृतः क्रियतां पुरः॥ १३॥

व्याख्या—अमीषां दिग्मितानां यदि व्यक्तितो जिज्ञासा भवेत्,

तर्हि मत्कृतः कुपक्षकौशिकाऽऽदित्यः पुरस्क्रियतामित्यन्वयः। कविसमयेन दिग्शब्दो दशसङ्ख्यावाचकः, तया मितानाममीषां प्रागुक्तानां दिगम्बरादिपाशचन्द्रान्तानां व्यक्तितो-विस्तरतो जिज्ञासा भवेत्, तर्हि मत्कृतः कुपक्षकौशिकादित्यः-कुमतकौशिक-सहस्रकिरणापरनामा ग्रन्थः पुरस्क्रियतामित्यक्षरार्थः।

भावार्थस्त्वयं-यथाऽऽदित्योदये व्यक्तितो वस्तुस्वरूपं ज्ञायते कौशिकाश्चादृशीभवन्ति तथा कुपक्षकौशिकाऽऽदित्योदये हृदि धृतकुपक्षकौशिका अदृश्यीभूय वादपराङ्मुखीभवन्ति। तन्मतप्ररूपणास्वरूपं च व्यक्तितो ज्ञायते इत्यर्थः। न च जमाल्यादयः सप्त निह्नवास्तावदागमोक्तास्ते कथं नोक्ताः? कथं चाऽऽगमानुक्ता अपि पूर्णिमीयक-खरतराद्याः अत्रोक्ताः? इति शङ्कनीयम्। यतो 'यथाप्रतिज्ञं सतां प्रवृत्ति'रिति न्यायात् प्रतिज्ञायामनन्तर्भावितत्वेन जमाल्यादयोऽत्र नोक्ताः। प्रतिज्ञा चाऽत्र ग्रन्थे 'प्रवचनपीडाकारिण उत्सूत्रभाषिकण्टकानुद्धृत्य कुण्ठताऽऽस्यान् कुर्वे' इत्यादि प्ररूपणा(रूपा)ऽवसातव्या। सा च प्रतिज्ञोच्छिन्नसन्तानविषयिणी न सम्भवति, तस्य प्रवचनपीडाकारित्वासम्भवात्, निर्विषयत्वेन तदुद्धारप्रयासादेर्वैफल्याच्च। पूर्णिमीयकौष्ट्रिकादीनां तु सम्प्रति विद्यमानापत्यत्वेन प्रवचनपीडाकारित्वसम्भवात्, सविषयत्वेन तदुद्धारप्रयासादेः साफल्याच्च तेषामेव प्रतिज्ञायामन्तर्भावो युक्तः। यच्चोक्तमेते न प्रवचनोक्तास्तदसत्यमेव, पूर्णिमीयकादीनामप्यागमोक्तत्वात्। उक्तं च सूर्यप्रज्ञप्तिनिर्युक्तौ-'आयरियपरम्परएण, आगयं जो उ आणुपुव्वीए।

कोवेइ छेअवाई, जमालिनासं स नासिहिति ॥ १ ॥ 'त्ति। अत्र जमालिदृष्टान्तेन सामान्यतोऽन्येऽपि जिनाज्ञारसिकश्री-कालिकाचार्यप्रवर्तितचतुर्थीपर्युषणपरम्परापराङ्मुखास्तथा स्त्री-जिनार्चोपधानादितपो - रजोहरणमुखवस्त्रिका-प्रतिक्रमण-चतुर्दश्यादिपरम्परापराङ्मुखाश्च निह्नवत्वेन दर्शिताः। विशेषतस्तु श्रीमलयगिरिविरचितायामष्टाविंशतिसहस्रप्रमाणायां श्रीआवश्यकवृत्तौ-'सत्तेए निह्नवा खलु' इत्यत्र-'खलुशब्दोऽत्र विशेषणे। किं विशिनष्टि ? उपधानादितपो न मन्यन्ते ते निह्नवा द्रष्टव्या' इति। अत्रोपधानादितपोनिषेधेन खरतरव्यतिरिक्ताः सर्वेऽपि गृहीताः। तेषां सर्वेषामप्युपधानतपोनिषेधाभिप्रायेणैव महानिशीथस्याप्यनङ्गीकारात्। खरतरस्तु आदिशब्दादाचाम्लादितपोविशेषनिषेधेनोपात्तो ज्ञातव्यः। आचाम्लादितपोविशेषनिषेधस्तु त्रिचतुरादिद्रव्यभेदभिन्नाऽनेकाऽऽचाम्लनिषेधेनैव बोध्यः। तन्मते द्रव्यद्वयेनैवाऽऽचाम्लतपसः स्वीकारात्। ननु तर्हि दशैव कथं दर्शिताः ?। तथाविधानां बहूनामपि सम्प्रति दृश्यमानत्वादितिचेदुच्यते-उक्तशेषाणां तूक्तोत्सूत्रसाम्यात् प्रायोऽत्रैवान्तर्भावात्, शटितसूक्ष्मकण्टकवदकिञ्चित्करत्वाच्चेत्यलं विस्तरेण इति। स्थिरमध्यमोत्सूत्री निदर्शितः।

अथ मध्यमोत्सूत्रिणोऽस्थिरात्मलक्षणंद्वितीयभेदमाह—

अस्थिरात्मा यथाच्छन्दो, नोत्सूत्रं भाषते स्थिरम्।
तीर्थभीरुस्ततस्तीर्थाद्, बहिस्थः पार्श्ववर्त्यसौ ॥१६॥

व्याख्या—अस्थिरात्मा यथाच्छन्दो ज्ञेयः। यतस्तीर्थभीरुस्सन् स्थिरमुत्सूत्रं नो भाषते। ततस्तीर्थाद् बहिस्थः। अपिशब्दाऽध्याहारात् बहिस्थोऽपि पार्श्ववर्त्यसौ भण्यते, अर्थात्तीर्थस्येत्यन्वयः। उत्सूत्रभाषणेऽस्थिरोऽनवस्थित आत्मा यस्यासौऽस्थिरात्मा यथाच्छन्दः—प्रवचनप्रसिद्धपार्श्वस्थादीनां मध्ये पञ्चमः, तीर्थभीरुः-तीर्थाद्भयं मन्यमानः, ततः-तस्माद् बहिस्तिष्ठतीति बहिस्थः। पार्श्वे वर्तितुं शीलमस्येति पार्श्ववर्ती, असौ यथाच्छन्द इत्यक्षरार्थः। भावार्थस्त्वयं—यथाच्छन्दोऽस्थिरात्मा कुत इति वाक्यरूपविशेषणद्वारा हेतुमाह—यतः स्थिरमुत्सूत्रं नो भाषते। स्थिरोत्सूत्राऽभाषी कुतः? इति विशेषणद्वारा हेतुमाह-यतः किंभूतः? तीर्थभीरुः-तीर्थात्-साध्वादिसमुदायरूपात्, भीरु-र्भयंमन्यते, मा मे तीर्थताडनं भवत्वित्यभिप्रायवान् भवतीत्यर्थः। अयं भावः-यो हि यस्माद्बिभेति स तस्यारुचिविषयं समाचर्य तेन पृष्टः सन् तदपलपनात्, पुनस्तदकरणप्रतिज्ञातो वा स्वाचरिते स्थिरो न भवतीत्यतोऽपरापरोत्सूत्रभाषणशीलोऽप्युक्तोत्सूत्रपरित्यागाद्यथाच्छन्दोऽस्थिरात्मोच्यते। निह्नवस्तु नोक्तमुत्सूत्रं परित्यजतीति यथाच्छन्दाद्विपरीतः, यस्माद्विपरीतस्तस्मात्ततो भेदं दर्शयति-तीर्थबहिस्थोऽपि निह्नववन्न दूरवर्ती, किन्तु-तीर्थपार्श्ववर्त्यसौ भण्यते। ननु संविग्नपाक्षिकात् शेषाश्चत्वारोऽपि पार्श्वस्थादयोऽस्थिरोत्सूत्रिणो भवन्त्येवेत्यतस्तान्विहाय यथाच्छन्द एव कथमुक्तः? इति चेत्, उच्यते-पार्श्वस्थादयो हि प्रायः क्रियामाश्रित्य भूयः शिथिलाः, स्तोकं चोत्सूत्रभाषिणः।

एवंविधा अपि क्रियातिशैथिल्यान्न बहुजनविश्वासस्थानमतो-जघन्योत्सूत्र्यपेक्षया मध्यमोत्सूत्रिभ्यो दूरदेशवर्तित्वात् मध्यमोत्सूत्रिपार्श्ववर्तिनो न भवन्त्यतोऽनुक्ता अपि स्वस्वचेष्टितानुसारेण तारतम्यभाक्त्वान्मिथो बृहदन्तरा अपि जघन्योत्सूत्रिभ्योऽधिकाः सन्तो जघन्योत्सूत्रिणामेव पार्श्ववर्तितया व्यवहृता अवगन्तव्याः। यथाच्छन्दस्तु गृहीतमुक्ताऽपरापरोत्सूत्रभाषणतयाऽनवस्थितोऽप्यज्ञानान्निह्नववद् गाढक्रियो भवति। गाढक्रियत्वाच्च बहुजनविश्वासस्थानमतो निह्नवपार्श्ववर्तितया व्यवहृतः। परं न्यून एव, न त्वधिकः। अत एव पार्श्वस्थादयश्चत्वारः स्वाश्रितं जनं प्रति भूयः क्रियाशैथिल्यकारणम्, स्तोकं चोत्सूत्रकारणं, स्वयं तादृक्स्वभावत्वात्। यथाच्छन्दस्तु स्वाश्रितं प्रति स्तोकं क्रियाशैथिल्यकारणं, भूयश्चोत्सूत्रकारणं, तस्य स्वयं तादृक्स्वभावत्वात्। निह्नवस्तु स्वाश्रितं जनं निह्नवस्वभावं जनयति, तादृक्स्वभावत्वात् तस्य। उक्तं चोत्सूत्रकन्दकुद्दाले—

श्रितोऽत्राऽऽद्यश्चतुर्भेदः, प्रायः शैथिल्यकारणम्।
स्वच्छन्दबाह्यौ स्वाच्छन्द्य-सङ्घबाह्यत्वकारणम्।
[ गु० वि०-१, श्लो० १६ ]

एतद्वृत्तिः-"प्रथमे भेदपञ्चके आद्यश्चतुर्भेदः कुगुरुः पार्श्वस्थावसन्न-कुशील-संसक्तलक्षणः श्रितस्सन प्रायो-बाहुल्येन, शैथिल्यकारणम्-श्लथत्वहेतुः, उत्सूत्रहेतुः स्तोकं भवति। एतद् व्याख्यानं व्यवहारनयमधिकृत्याऽवसातव्यम्। निश्चयनयमधिकृत्य श्लथत्वस्याप्युत्सूत्रत्वात्। यतोऽसौ चतुर्भेदो घनतरं श्लथः, स्तो-

कमुत्सूत्रप्ररूपको भवति। ततोऽस्य संसर्गोऽपि चारित्रिणो बहुतरश्लथत्वहेतुरल्पमुत्सूत्रप्ररूपणाहेतुः स्यात्। 'स्वछन्दबाह्यौ' स्वछन्दो नाम यथाच्छन्दो, बाह्यः-सङ्घबाह्यस्तौ स्वाच्छन्द्यस्य सङ्घबाह्यत्वस्य च क्रमशः कारणम्। 'प्राय' इत्यत्रापि सम्बध्यते। यतो यथाच्छन्द-सङ्घबाह्यौ, गाढक्रियावपि त्यक्तचारित्रिगुरुकुलवासत्वेन षड्जीवनिकायरक्षणायामकुशलत्वात् किञ्चिच्छिथिलौ स्यातां। ततो गाढक्रिययोरेतयोस्संसर्गः चारित्रिणो घनतरं यथाच्छन्दत्व-सङ्घबाह्यत्वहेतुः स्यात्। अल्पं च शिथिलताहेतुर्भवति।

संविज्ञपाक्षिकाच्छेषः, शिथिलः स्वं परानपि।

यथाच्छन्दो घनं बाह्योऽतिघनं पातयेद् भवे॥ [गु० वि०-१ श्लोकः-१६] एतद्वृत्तिः-"पूर्वोक्तचतुर्भेदशिथिलस्य मध्यात्कोऽपि शिथिलः कदाचित् शुद्धप्ररूपकत्वादिगुणालङ्कृतः सन् संविज्ञपाक्षिकः स्यात्। स च मोक्षपथपथिकत्वेन श्लाघ्यः। ततः संविज्ञपाक्षिकाच्छेषो-व्यतिरिक्तः शिथिलः स्वं-आत्मानं, परानपि-आत्मव्यतिरिक्तानपि, भवे-संसारे पातयेत्। यथाच्छन्दो घनोत्सूत्रयुक्तत्वात् घनं संसारे स्वपरानपि पातयेत्। बाह्यः-सङ्घबाह्यः सङ्घाऽवज्ञाकारकत्वादतिघनं-यथाच्छन्दादत्यर्थं, स्वं परानपि संसारे पातयेत्"। ननु षोडशश्लोक्यामस्यां यथाच्छन्दोऽपि तीर्थबाह्य उक्तः, उत्सूत्रकन्दकुद्दाले त्वनन्तरं निह्नव एव सङ्घबाह्यो दर्शितस्तत्कथमनयोस्सङ्गतिरिति चेत्। उच्यते-आस्तां तावत् यथाच्छन्दो, निह्नववत् पार्श्वस्थोऽपि संविज्ञपाक्षिकव्यति-

रिक्तः सङ्घबाह्य एव भवति। परं तीर्थभीरुतया तीर्थपार्श्व-वर्त्यवगन्तव्यः। निह्नवस्तु तीर्थाद् दूरवर्त्ती सर्वथा पङ्क्तिबाह्योऽस्पृश्य इत्यर्थः। उक्तं चोत्सूत्रकन्दकुद्दाल एव—

त्याज्यः कुगुरुसंसर्गो, गुरुतत्त्वेक्षणोन्मुखैः।
पार्श्वस्थादिर्बहिस्थश्च, कुगुरुर्दशधा मतः॥[गु०वि० १ श्लोक-१७]

अस्य वृत्तिः-"स्पष्टः। नवरं-पार्श्वस्थादिः पञ्चधा। यदाह—

'पासत्थो ओसन्नो, होइ कुसीलो तहेव संसत्तो।
अहछन्दो वि अ एए, अवंदणिज्जा जिणमयंमि' ॥१॥

इति। बहिःस्थोऽपि पञ्चधा तं वक्ष्यतीत्युभयं दशधा। ननु पार्श्वस्थबहिःस्थयोरत्र किमन्तरम? पार्श्वस्थस्यापि वस्तुतो वस्त्वन्तराद् बहिर्भवनात्। उच्यते-जनेऽपि स्वकुटुम्बबहिःपतितस्यापि कस्यचिदपांक्तेयत्वास्पृश्यत्वाद्यदर्शनात् अपरस्य कस्यचिदपाङ्क्तेयत्वास्पृश्यत्वादिदर्शनाच्च। अत्र पार्श्वस्थः सङ्घाद्वेषात् सङ्घस्य पार्श्वेऽवस्थातुं लभते। इदमागमोक्तम् स्वकर्मनामाऽस्य। यदाह-

'सो पासत्थो दुविहो, सव्वे देसे य होइ नायव्वो।
सव्वंमि नाणदंसणचरणाणं जो उ पासंमि'॥२॥त्ति स्पष्टा।

नवरं-ज्ञानदर्शनचारित्राणि सङ्घस्तस्य पार्श्वे यस्तिष्ठतीति गम्यते। पार्श्वस्थस्य क्वचिदुत्सूत्रप्ररूपकस्याप्यनवस्थितकोत्सूत्रत्वेन प्रवचनसाधर्मिकत्वेन विवक्षितत्वात्। बहिःस्थस्य पुनः सङ्घद्वेषादप्रेक्ष्यमुखत्वेन सङ्घस्य पार्श्वेऽवस्थानाऽभावः प्रवचनसाधर्मिकत्वाभावादस्य।

यदाह—दस ससिहागा सावय, पवयणसाहम्मिया न लिंगेण।

लिंगेण य साहम्मिय, नो पवयणनिह्नवा सव्वे" ॥१॥
पार्श्वस्थोपलक्षणादवसन्नादयोऽपि ग्राह्याः।

इति श्रीविजयदानसूरीश्वरशिष्योपाध्यायश्रीधर्मसागरविरचितायां गुरुतत्त्वप्रदीपदीपिकापरनाम्न्यां स्वोपज्ञषोडशश्लोक्यां मध्यमोत्सूत्रिनिरूपणविवरणम्।

अथोत्कृष्टोत्सूत्रिणो लक्षणमाह—

स्थिरस्तत्पक्षपाती य-स्तस्योत्सूत्रमिहाऽन्तिमम्।
द्रव्यात्तदतिरिक्तस्य, जैनमार्गस्थितस्य च ॥१५॥

व्याख्या—स्थिरो यस्तत्पक्षपाती तस्य द्रव्यात्तदतिरिक्तस्यजैनमार्गस्थितस्य चेहाऽन्तिममुत्सूत्रं भवेदित्यन्वयः। स्थिरस्तीर्थाऽभीरुः, तत्पक्षपाती-निह्नवादिपक्षोन्नतिकृद्वचनवक्ता, इहाऽस्यांषोडशश्लोक्यां जगति वा, अन्तिममुत्कृष्टमुत्सूत्रं-व्यवहारनयापेक्षया जैनप्रवचनस्य विरुद्धभाषणं, 'द्रव्यात्तदतिरिक्तस्य'-द्रव्यतो निह्नवपृथक्भूतस्य, भावतो निह्नवश्रद्धानस्येत्यर्थः। च-पुनर्जैनमार्गस्थितस्य-व्यवहारतः साध्वाद्यन्यतरनाममात्रधारणात् तीर्थावलम्बिन इत्यक्षरार्थः। भावार्थस्त्वयं-स्थिरतया निह्नवपक्षपातिनोऽन्तिममुत्सूत्रमित्युक्ते निह्नवेऽतिप्रसक्तिः, तस्य तादृक्स्वभावत्वात्। स च नोत्कृष्टः, किन्तु मध्यमः। ततस्तन्निवृत्तये निह्नवव्यतिरिक्तस्येतिविशेषणं। भावतः सम्यक्त्वमिथ्यात्वाऽन्यतरश्रद्धानवत्तया निह्नवव्यतिरिक्ते उत्कृष्टप्रत्यासन्नेऽतिप्रसङ्गभङ्गाय द्रव्यादिति। एवं द्रव्यत एव निह्नवव्यतिरिक्तो, न तु भावतो। भावतस्तु निह्नवमार्गश्रद्धान इत्यर्थः। एव-

मपि तथाविधसामग्रीवशादन्यतीर्थिकलिंगधारिविशेषेऽतिव्याप्ति-रतस्तदपक्रान्तये 'जैनमार्गे'त्यादि। निह्नवश्रद्धानेऽपि तथाविधाऽन्यतीर्थिकस्य नोत्कृष्टोत्सूत्रित्वं, अन्यतीर्थिकत्वेन जनानां विश्वासस्थानाभावात्। ननूपेक्षक-निह्नव-निह्नवपक्षपातिनां क्रमेण यज्ज-घन्य-मध्यमोत्कृष्टोत्सूत्रित्वमुक्तं तत्केनाभिप्रायेणेतिचेत्। उच्यते-उत्सूत्रं प्रवचने तावद् द्वेधा-निश्चयनयाभिमतं व्यवहारनयाभिमतं च। तत्र निश्चयनयाभिमतं तावत् शैथिल्यमप्युत्सूत्रमेव। व्यवहारनयाभिमतं तु प्रवचनार्थस्याऽन्यथाभाषणमेव। उक्तं च-उत्सूत्रकन्दकुद्दाले—

'निश्चयो नय उत्सूत्रं, शैथिल्यमपि मन्यते।

सूत्रार्थस्यान्यथाऽऽख्यानं, व्यवहारनयः पुनः॥ [ गु० वि० १, श्लो० १४ ] अस्य वृत्तिः—"निश्चयो नयः शैथिल्यमपि—श्लथत्वमपि उत्सूत्रं मन्यते। अत्र शास्त्रे अविरतसम्यग्दृष्टि-श्रावकाणामविरतत्वं देशविरतश्रावकाणामविरतविभागश्चोत्सूत्रतया निश्चयनयाभिप्रायेण सन्नपि न विवक्षितः। पार्श्वस्थादीनां तु श्लथत्वं नियमभङ्गरूपतयाऽत्यन्तदुर्गतिहेतुरिति भणित्वोत्सूत्रतया विवक्षितं परिज्ञेयं, शास्त्रस्यास्योत्सूत्रकन्द-कुद्दाल इत्यपरनामत्वादन्तिमविश्रामे पार्श्वस्थादिश्लथत्वस्यैव निराकृतत्वात्। पुनर्व्यवहारनयः सूत्रार्थस्य—सिद्धान्तार्थस्याऽन्यथा-विपरीतमाख्यानं—प्ररूपणं उत्सूत्रं मन्यत इत्युभयरूपमप्युत्सूत्रं दर्शितम्। उत्सूत्रं लोकोत्तरं मिथ्यात्वं भण्यते।" तत्र निश्चयनयाभिमतं चेह ग्रन्थे न व्यवहृतं, तेन तथाविधप्रवचनो-

पघाताऽसम्भवात्। किन्तु व्यवहारनयाभिमतं सूत्रार्थस्यान्यथाऽऽख्यानं, तस्य प्रवचनोपघातकत्वात्। तच्च विषमिव यत्—यस्माद् बहूपघातकं तत्तदपेक्षयोत्कटमिति धिया निह्नव-तत्पक्षपातिरूपमध्यमोत्कृष्टोत्सूत्र्यपेक्षया उपेक्षावचनं जघन्योत्सूत्रं, प्रवचनस्याल्पोपघातकत्वात्। अल्पोपघातकत्वं च तत्परम्पराया असम्भवेनाऽल्पकालीनत्वात्। निह्नवोत्सूत्रं तु बहूपघातकत्वाद् गरीयोऽपि मध्यममेव, तदपेक्षयाऽपि तत्पक्षपातिनोऽधिकोत्सूत्रस्य सम्भवात्। ननु कथमिति चेत्। उच्यते—यथा 'प्रत्युतोग्रं जनोत्सूत्र-स्थैर्यात्प्राच्याऽऽग्रहाच्च तदि'तिवचनात् प्रथममताऽऽकर्षकचन्द्रप्रभ-जिनदत्ताद्यपेक्षया जनोत्सूत्रस्थैर्यात् चन्द्रप्रभ-जिनदत्ताद्युक्तमहं प्रमाणीकरिष्याम्येवेत्येवंरूपेण चन्द्रप्रभजिनदत्तादिषु स्वाऽऽग्रहाच्चेति दोषद्वयेन पुष्टिकरणात्तदुक्तमार्गाङ्गीकारकारकाणामुत्कटमुत्सूत्रं भवति। तथा जैनमार्गस्थितानां स्थिरतया तत्पक्षपातकरणे पूर्वोक्तदोषद्वयपुष्टिकरणात् सन्मार्गस्थितानामपि सन्मार्ग एव सन्देहोत्पादनपूर्वकनिह्नवमार्गाभिमुखीकरणादिदोषसद्भावाच्च ततोऽप्युत्कटमुत्सूत्रमतो निह्नवेभ्य उक्तलक्षणो निह्नवपक्षपाती दुरात्माऽवगन्तव्यः। ननु मिथ्यादृग्-निह्नवदृशोरन्यतरस्तथा भवतु, परं तत्पक्षपात्यपि सम्यग्दृष्टिस्तावन्निह्नवाधिकः कथं सम्भवति? तथात्वे च सम्यक्त्वस्य वैफल्याऽऽपत्तेरिति चेत्। मैवं—द्रव्यतो जैनमार्गस्थितानां भावतस्तु सम्यग्दृग् १ मिथ्यादृग् २ निह्नवदृशां त्रयाणामपि स्थिरतया निह्नवपक्षपातित्वे सति जनोत्सूत्रस्थैर्य-तन्मताकर्षकचन्द्रप्रभ-

जिनदत्ताद्युक्तप्रमाणीकरणाऽऽग्रहयोः पुष्टिकरणं तद्वैपरीत्ये च शुद्धमार्गे शुद्धमार्गश्रितानामपि सन्देहोत्पादनपूर्वकनिह्नवमार्गाभिमुखीकरणं चेत्यादिदोषैः प्रवचनोपघातकस्योत्सूत्रस्य समानत्वादेव निह्नवाधिकत्वं । सम्यक्त्वसाफल्यं तु मिथ्यात्वबन्धमाश्रित्यैव बोध्यम् । यतो मिथ्यात्वाभिमुखस्यापि तादृशः सम्यग्दृशस्तदानीं सम्यक्त्वसद्भावात् तथाविधचित्तसङ्क्लेशाभावेन तादृक्मिथ्यादृश इव न मिथ्यात्वबन्धः, किन्तु किञ्चिद्विहीनः । एवं मिथ्यादृशोऽपि तादृशो न निह्नवदृश इव मिथ्यात्वबन्धः, किन्तु किञ्चिद्विहीनः । उक्तं च—

मिथ्यात्वबन्धमाश्रित्य, लौकिकेभ्योऽधमा अमी ।
उत्तमाः पुनराश्रित्य, ग्रन्थिभेदक्रियाफले ॥ १ ॥' [ गुरुतत्त्वप्रदीपे वि० १-श्लोकः ३८ ] इति । यद्वा त्रयाणामपि समानत्वेपि उत्सूत्रभाषित्वे 'कारणभेदादऽवश्यं कार्येऽपि भेद एवे'तिन्यायात् श्रद्धानभेदादुत्सूत्रवति वचस्यपि कश्चिद् भेदः स्वीकर्त्तव्यः । स च सूक्ष्मदृशाऽवलोक्यमानः सम्यक्त्वमाहात्म्यात् सम्यग्दृशस्तथा तत्पक्षपातिनो न्यूनत्वमेवोत्कृष्टोत्सूत्रिणः सकाशात् सूचयति । अत एवोत्कृष्टोत्सूत्रिणः समीपवर्तिनावेव तथाविधसम्यग्दृग्मिथ्यादृशावक्ताविति बोध्यम् । न च सम्यग्दृशः स्थिरतया निह्नवपक्षपातित्वं कथं भवेदिति शङ्कनीयं, मिथ्यात्वाभिमुखस्य कस्यचित् तथाविधसामग्रीवशादनन्तानुबन्धिकषायोदयिनो निह्नवपक्षपातिनो भवत्येवेत्यलं विस्तरेण ।

इति श्रीविजयदानसूरीश्वरशिष्योपाध्याय-श्रीधर्मसागरविर-

चितायां गुरुतत्त्वप्रदीपदीपिकापरनाम्न्यां स्वोपज्ञषोडशश्लोक्यामुत्कृष्टोत्सूत्रिनिरूपणविवरणम् ॥

अथ सिंहावलोकनन्यायेन यस्य तीर्थस्याऽऽपद्विधायकोत्सूत्रिकण्टकानुद्धृत्य कुण्ठताऽऽस्या कृतास्तत्तीर्थं सम्प्रति किं नाम ? कस्याऽऽचार्यस्याज्ञावर्ति ? चेति नामग्राहेणोपदर्शयन्नाह—

तीर्थं च साम्प्रतं श्रीमान्, पारिशेष्यात्तपागणः ।
सूरीड्विजयदानाऽऽज्ञा-वर्ती ज्ञानादिरत्नभाक् ॥ १६ ॥

व्याख्या—तीर्थं च साम्प्रतं पारिशेष्यात् सूरीड्विजयदानाज्ञावर्ती ज्ञानादिरत्नभाग् श्रीमान् तपागणो ज्ञातव्य इत्यन्वयः । चकार उद्देशान्तर्गततीर्थपदपरामर्शकः । तीर्थं साध्वादिसमुदायलक्षणं, तच्च साम्प्रतं-सम्प्रतिकालीनं-वार्तमानिकमित्यर्थः । पारिशेष्यादन्यत्राऽऽगमानुयायिसाध्वादिसमुदायस्याऽदर्शनात् । श्रीमान्-सश्रीकः-अनुत्तर इत्यर्थः, तपागणः-तपागच्छः, सूरीड्विजयदानः-श्रीविजयदानसूरीशः । ईशत्वं च हीरविजयसूर्याद्यपेक्षयाऽवगन्तव्यम् । श्रीहीरविजयसूरीणां गुरव इत्यर्थः । तस्याज्ञया वर्तितुं शीलमस्येति सूरीड्विजयदानाऽऽज्ञावर्ती, ज्ञानमादिर्येषां तानि ज्ञानादीनि-ज्ञानदर्शनचारित्राणि, तान्येव रत्नानि तानि भजत इति ज्ञानादिरत्नभागित्यक्षरार्थः । भावार्थस्त्वयंपारिशेष्यादिति । परं सम्प्रतीह भरतक्षेत्रे तपागणव्यतिरिक्तं तीर्थकराऽऽज्ञावर्ति तीर्थं नास्तीति दर्शनार्थम् । तपोवन्नाममात्रधारकपार्श्वस्थादिसमुदायलक्षणे तीर्थाऽऽभासे तीर्थेऽतिप्रसङ्गवारणाय सुविहितचक्रवर्ति-श्रीविजयदानसूरीश्वर-श्रीहीरविजयसूर्यादीना-

माज्ञावर्तीति दर्शितम्। पारिशेष्यपदं तु विवक्षिततपागच्छादन्यत्र सर्वत्रापि ज्ञानाद्यत्यन्ताभावहेतूत्सूत्रपददर्शनसूचकम्। उत्सूत्रवति समुदाये ज्ञानादिलेशस्याप्यसम्भवात्। उत्सूत्रं तु स्त्रीजिनार्चा-प्रतिक्रमणोपधानादिनिषेधेन प्रायः प्रवचनविदां प्रतीतमेव। अत एवाग्रेऽपि श्रीमहावीरतीर्थं यावत्तपोवद्भ्य एव चारित्रमिति ज्ञेयम्। उक्तमप्युत्सूत्रकन्दकुद्दालेऽष्टमविश्रामे-'स्वावधि तच्च क्षेत्रेऽत्रा-ग्रतोऽप्येभ्यो भविष्यति।

स्तोकेष्वप्येषु चारित्रं, वज्रदुःप्रसहादिवत्'॥ [ गु० वि० ८, श्लो० १५ ] अस्य वृत्ति,-"तच्चारित्रं स्वाऽवधिं-निजावधिं यावत् अत्रास्मिन् क्षेत्रे-गूर्जरावनिप्रभृतिकेऽग्रतो एभ्यः—तपोवद्भ्यो भविष्यति। य एव एभिस्तपोवद्भिः दीक्षितास्त एव चारित्रिण इत्यर्थः इति बलादापन्नम्। एषु तपोवत्सु स्तोकेष्वपि चारित्रमस्ति। न चात्रेदमाशङ्कनीयं-यदपरं सर्वमप्यचारित्रं, एकस्मिन्नेवास्मिन् गच्छे चारित्रमिति कथं घटते? 'वज्र'त्यादि। यथा प्रभुश्रीवयरस्वामिशिष्ये वज्रे-वज्रसेने एकस्मिन्नपि चारित्रं अभूत्, तथा यथा दुःप्रसभाऽऽचार्येऽल्पपरिवारेऽपि चारित्रं भविष्यति, तथैष्वपि स्तोकेषु चारित्रं सिद्धमिति।

गत्यागतिमिते क्षेत्रे-ऽत्रान्यगच्छे हि नाप्यते।

एभ्यो विशिष्टतैष्वेवा-शठत्वाप्तिर्बलात् ततः॥ [ गु० वि० श्लो० १६ ] अत्राऽस्मिन् क्षेत्रे गत्यागतिमिते-मालवक-देवगिरितिलङ्गप्रभृतिके हिर्यस्मात्कारणात्, अन्यगच्छे तपोवद्व्यतिरिक्ते,

एभ्यस्तपोवद्भ्यो विशिष्टता-दुष्करकारिता, न दृश्यते-न श्रूयते। तत एष्वेव-तपोवत्स्वेव बलादशठत्वाप्तिः"।

अथ ग्रन्थस्य उपसंहारमाह—

एवं हि षोडशश्लोकी, विश्वाऽऽप्तश्लोकधारिणी।
गुरुतत्त्वप्रदीपस्य, दीपिका जयताच्चिरम् ॥ १७ ॥

व्याख्या—एवं - प्रागुक्तप्रकारेण, विश्वाप्तश्लोकधारिणी गुरुतत्त्वप्रदीपस्य दीपिकापरनाम्नी चिरं जयतादित्यन्वयः। हि-निश्चितं एवं-प्रागुक्तस्वरूपा षोडशश्लोकी विश्वे-जगत्याप्तो-व्याप्तः,श्लोकः-कीर्तिस्तं धरतीति शीलार्थे णिन्विधानात् विश्वाऽऽप्तश्लोकधारिणी। गुरुतत्त्वप्रदीपस्य-उत्सूत्रकन्दकुद्दाला-परनाम्नो ग्रन्थस्य दीपस्य दीपिकेव दीपिका आधारभूतेत्यर्थः, चिरं-बहुकालं श्रीमहावीरतीर्थं यावत् जयताज्जीयादित्यक्षरार्थः। भावार्थस्त्वयं—अन्यापि प्रदीपाधारभूता काष्टमयी दीपिका षोडशश्लोकी, तथेयमपि। को भावः ? काष्टमयी दीपिका हि चतुर्षु दिक्षु चतुर्णां दीपानां भूमिः, तत्र प्रति यं (दीपं) चतुरस्र-मेकैकमासनं, तेषां च सर्वावयवमीलने षोडशावयवा भवन्ति। तथा च षोडशशब्देन षोडशावयवा ग्राह्या...., तेषां श्लोकाकीर्त-नस्यो...षोडशश्लोकी। शेषं सुगममिति।

इति श्रीमत्तपागच्छनभोङ्गणनभोमणि-श्रीविजयदानसूरीश्वर-शिष्योपाध्याय श्रीधर्मसागरविरचितायां गुरुतत्त्वप्रदीपदीपिका-ऽपरनाम्न्यां स्वोपज्ञषोडशश्लोक्यां सम्प्रति तीर्थनिदर्शनविवरणं। इति श्रीषोडशश्लोकीवृत्तिः सम्पूर्णा।

महोपाध्याय-श्रीमद्धर्मसागरगणिप्रवरप्रणीतं

# सिरिमहावीर-जिणथोत्तं ।

( सावचूरिकम् )

पणमित्तु पवित्तजिणक्कमणं, पणुवामि वमाविअपावसमं ।
सुगवव्वयणाणुमयं न उणं, परमत्थविऊकविवन्निउणं ॥१॥

व्याख्या—पवित्रजिनक्रमणं वीरपादं प्रणम्य अहं प्रणुवामि । किंलक्षणं जिनपादं ?, वामितो-वान्ति नीतोऽन्य-(न्तं) नीत इत्यर्थः । पापश्रमः-पापजन्यखेदो येन स तं । कथं ? वचनानुमतं-वचोमात्राभिमतं यथा स्यात्तथेति, न पुनर्यथाकथञ्चित् यावत्ज्ञानगोचरीभूतमपि । किंवत् ? शुकवत् । यथा कथञ्चित् केनचित् प्रेरितोऽपि शुको जातिगुणानुरूपं यथाशिक्षितं पात्रं वा इदममुकशब्देन वाच्यमित्यादिवाच्यवाचकभावपरिज्ञानशून्योऽव्यक्तशब्दमात्रमेव ब्रूते, तथाऽहमपि जिनरागेण प्रेरितोऽप्यव्यक्तशब्देनैव स्तवीमि, न पुनः परमार्थवित् (कविवत्) श्रीसिद्धसेनदिवाकरादिकविवत्, अर्थतः शब्दतोऽपि निपुणं-दक्षं यथावत्परिज्ञानपूर्वकं सव्यक्तमपि ॥ १ ॥

जिणवीरपयंबुअजामलयं, लयवल्लिजलं जलहंकयलं ।
जलरूद्दलकोमलमुम्मलहं, नमहंबरदीवपयावलहं ॥२॥

व्या०—जिणवी० । जिनवीरपदाम्बुजयामलकं-श्रीवीरचरणाम्भोजयुगं नमत-प्रणमत इत्यन्वयः । किंभूतं ? लयवल्लिजलं-मोक्षवल्लिवृद्धये जलमिव । जलध्यङ्कतलं-समुद्रलक्षणलाञ्छिततलं, जलरुड्दलकोमलं-कमलदलमिव मृदु, उम्मलहं-प्राबल्येन कर्ममलापहारि । यद्वा स्वयं बाह्यतोऽपि रेण्वादिमलरहितं । अम्बरदीपप्रतापलभं-सूर्यवत्प्रतापस्य लभो-लाभो यस्मात्, तत्सेवया सूर्यप्रतापभाग् भवतीत्यर्थः ॥२॥

मुणिणायगवायगविंदथुअं, थुइसत्थमुहेण सुहेण सुहं ।
णमहंतरभावपहावभरं-भरया सुरया सिरिवीरपयं ॥३॥

व्या०—मुणि०। मुनिनायकाः-सूरयो वाचका-उपाध्यायास्तेषां वृन्देन स्तुतं, न पुनर्वचोमात्रेण, किन्तु स्तुतिशास्त्रमुखेन-वीरस्तवाध्ययनादिरूपेण, अन्येऽपि वीरगुणगानपरायणा भवन्त्वित्यभिप्रायेण स्तुतिशास्त्ररचनयेत्यर्थः । सुखेन-श्रमाभावेन-अग्लानिभावेन । किंलक्षणा यूयं ? आन्तरभावप्रभावभरं भराः-अभ्यन्तरभक्तिजन्येन महिमभरेण व्याप्ता इत्यर्थः, त एव स्वार्थे कः, आन्तरभावप्रभावभरन्त ( म्भ ) रकाः । सु-अतिशयेन रताः-स्तुतिकरणाऽऽसक्ताः ॥३॥

दुहदोहमणोहवरोहकरं, करुणारसभासुरमासुरमं ।
रमणीरयणीरयमारणयं, णयणाइवयं सुणयंजणयं ॥४॥
जणरंजणदेसणदाणवरं, णवरंगसुरंगणगीअगुणं ।
सुगुणंकिअकायकलं कमलं, कमलालयलीलबलागचलं॥५॥

जयईअल-निम्मलसीलजसं, रसिआमररंजणवाणिरसं ।
जयमासमयासमजम्मवरं, सिरिवीरजिणं जिअपंचसरं ॥६॥
अचलंतरझाणयणाणधरं, मधुरंरणमंगणसंगहरं ।
वररम्ममह वरथुत्तपहं, सुपहं पणए विणएणऽनहं ॥७॥

चतुर्भिः कलापकम् ।

व्या०—दुहदो० जणरं० जयई० अचलं० । अहं विनयेन वीरजिनं वरस्तोत्रपथं-प्रधानस्तुतिमार्गं प्रणये-प्रापयामीत्यन्वयः । शेषाणि वीरविशेषणानि । यथा दुःखद्रोहमनोभवानां—कृच्छ्रपरवञ्चनमदनानां रोधकं-निरुम्भकं, करुणारसभासुरं-कृपारसदीप्तम्, आशु-शीघ्रम् रमा-लक्ष्मी यस्मात्, रमणीरतेषु-कान्ताऽऽसक्तेषु नीरतं-रतिरहितं, आ-समन्तात् रणं-संग्रामं द्यति-छिनत्तीति आरणदं, आरणम्-सुयुक्तिकं शब्दम् ददातीति वा आरणदं। नतो नाकिव्रजो-देवसमूहो यस्य स तं, सुनयान्-शोभननयान् जनयतीति, मकारोऽलाक्षणिकः । जनरंजनदेशनदानवरः-भव्यलोकधर्मदेशनादाने श्रेष्ठः, नवरङ्गसुराङ्गनागीतगुणम्-प्रत्यग्ररागवतीभिर्देवीभिर्गानविषयीकृता गुणा यस्य, शोभनगुणैरलङ्कृता-सहिता कायकला-शरीरशोभा यस्येति तं, कं-सुखं मलयति-धारयतीति कमलस्तं, कमलायाः-लक्ष्म्या आलय-आश्रय एवंविधं यल्लीलया बलं-प्रयासमन्तरेणौजः, तेन हेतुभूतेनाऽगस्य, अर्थात् मेरुपर्वतस्य चलश्चलनं-कम्पनं यस्मात् स तं, जयाल्लभ्या मा-लक्ष्मी जयमा समता च-सर्वजीवेषु तुल्यता-अनुकम्प्यतया निर्विशेषम-

तिस्तयोराश्रमः-स्थानं, एवंविधो जन्मनो वरो यस्य, प्राग्जन्मनि धर्मोपार्जनावसरे एतादृशं मम जन्म देहीति याचितो धर्मचक्रवर्त्ती एवंविधं जन्म दत्तवानिवेति भावः। जितः पञ्चशरो-मदनो येन स तं, अचलं-निश्चलम् यदान्तरध्यानं-शुक्लध्यानं तज्जं यत् ज्ञानं-केवलज्ञानं तद्धरतीति, मधुरं सुरासुरनरेश्वराणां प्रीतिकारं रणतीति खशि प्रत्यये मधुरंरणस्तं, अङ्गनासङ्गहरं-स्त्रीसङ्गरहितं। वरः सन् रम्यः-रमणीयः, न पुनर्मोहनीयवशात्। अनघं-निःपापमिति ॥४॥५॥६॥७॥ चतुर्भिः कलापकम्।

महिआमहिआऽदर बादरया-मदहेउसुहेउपओगजुआ।
जगमालयसालजमालभिआ,विभया वरवम्मसमा समिणा।
दिवसाहिवईजसनासयरा, सुहमाइपयत्थपयासयरा।
सवणंजलिपाणसुहाऽणसुहा,त्रिबुहावलिकाबलिकाऽनलिका।
कलिकालवलग्गिजलुग्गमिया, विमलक्खरमक्खरिआखलिआ।
खलमालगलागलगुम्मलया,समिला समिलालनबालकला।
मुणिमाणणमंडणमाणगमा,गदिदा जिण! जेण तुहेण गिरा।
स तुहं महु मोहतमोहरणं जणइज्ज समज्जिअ-पुण्णमिणं
॥११॥ चतुर्भिः कलापकम्॥

व्या०—हे मथितामाहित!—मर्दितरोगवैरिन्! हे अदरभयरहित! हे जिन! येन त्वया गीर्वाणी गदिता-भाषिता, स त्वं मोहतमोहरणम्-मोहान्धकारनाशनम् जनय - निष्पादय

अर्जितपुण्यं यथा स्यात्तथेति क्रियाविशेषणम्। पुण्यप्रकृतिसम्पादन-पुरस्सरं मोहान्धकारम् नाशयेत्यन्वयार्थः। शेषाणि तु विशेषणानि वाणीसम्बन्धीनि। तथाहि—किंलक्षणा गीः? वादरताऽमदहेतुसुहेतुप्रयोगयुता-वादोद्यतानामन्यतीर्थिकानां अमदहेतवोऽहङ्कारनाशकारणानि ये सु-शोभना असिद्धता-विरुद्धतादिदोषकलङ्कविकलाः पक्षधर्मत्वादिसकलहेतुरूपोपेता वा हेतवोऽभिमतसाध्यसाधकलिंगानि तेषां प्रयोगो-रचना तेन युता, जगन्मालयशालयमालभिका। जगल्लक्ष्मीनिलयहेतुत्वेन ये शालयमा-निरतिचारमहाव्रतानि तेषामालभिका-प्रापिका, अ(वि)भया-भयरहिता, 'समिण'त्ति षठ्यर्थे तृतीया प्राकृतवहुलवचनात् शमिनः-साधोर्वरवर्मसमा-प्रधानसन्नाहतुल्या, क्रोधादिभिः सह युद्धविधाविति गम्यम्। दिवसाधिपतिः-सूर्यस्तस्य प्रकाशकत्वेन यद्यशस्तस्य-नाशकरी-स्पर्द्धिनी, स्वयं प्रकाशकत्वापेक्षयाल्पप्रकाशकत्वात्। यतो वाणी सूक्ष्मार्थप्रकाशकरी-निगोदादिसूक्ष्मपदार्थप्रकाशकर्त्री, नचैवं सूर्यस्य, स्थूलपदार्थप्रकाशकत्वमपि देशत एव। श्रवणानि-श्रोत्राणि तद्रूपा अञ्जलयस्ताभिः पाने सुधेव-अमृतमिवाविरतिहेतुः पथ्यरूपा च। अनशुभा-अशुभवर्जिता हिंसाद्युपदेशशून्या। विबुधावलिकाः-पण्डितश्रेणयस्तेषां सदाचारप्रवर्त्तने पदार्थसम्यग्परिज्ञाने वादादौ च बलम् यस्याः सा, स्वार्थे के प्रत्यये विबुधावलिकाबलिकेति। अनलीका-अलीकरहिता, ह्रस्वत्वं च प्राकृतवशात्। कलिकालः-पञ्चमारकस्तस्य यद् बलं-दुःखजननस्वभावस्तद्रूपो योऽग्निस्तत्र जलस्येवोद्गमो-प्रादुर्भावो यस्याः

सा। विमलानि यान्यक्षराणि-वर्णाः तेषां न विद्यते क्षरः-क्षणं अन्यतीर्थिकाऽऽगमस्येव पाठतोऽर्थतो वा विनाशो यस्यां सा, केनाप्यन्यथाकर्तुं न शक्येत्यर्थः। मकारोऽलाक्षणिकः। अस्खलिता-कुतोऽपि स्खलनारहिता। खलानां-दुर्जनानां या मालाः-श्रेणय-स्तासां गलेषु-निगरणेषु अगला-निश्चला या गुल्मलता-गुच्छल-तेव प्रति वदन्तं स्थगनहेतुः। यद्वा गलेषु आ-समन्तात् गुल्मलता गण्डशालादिरोमविशेषकल्पेति दुर्मुखदुर्वननिर्गमरोधिकेत्यर्थः। शं-सुखं तस्य इलेव-पृथ्वीव शमिनां-साधूनां लालने-सम्यग्परिपा-लने बालकला-तीर्थकृन्मुखादुत्पत्तेरारभ्याऽभ्यस्तकला यस्या, उत्प-त्तित आरभ्य साधुपालनकलावती। यदागमः—"अहो जिणे-हिं असावज्जे'त्यादि। मुनीनां आननं-मुखम्, मकारः प्राग्वत्। तस्य मण्डने-भूषणे अमानाः-सङ्ख्यारहिता गमाः-सदृशपाठा यस्यां सा ॥८॥९॥१०॥११॥ चतुर्भिः कलापकम्।

भुवि भावुकलावुकलंकदलं, दलितालिअनीलकलाकलिलं।
सयलं सरइं दुलसंदुमुहं, दुहदुद्दहइं नइवेगजलं ॥१२॥

जलहि व्व गहीरमहीरचयं, कणगाचलनिच्चलचित्तचिअं।
वरकेसरिदुद्धरिसं हरिसं, हरिसंचिअसच्चिअसच्चरणं ॥१३॥

रणरञ्जिअनिज्जरमज्जवअं, जुइनिज्जिअदुज्जयवज्जवयं।
मुणिमाणसमंबुरुहालिमलं, धवलंबुरमंबुअलीलधरं ॥१४॥

धरणीधवसेविअपायजुगं, जगवल्लहमुल्लहवल्लवणं।
पवणंजणपावरए रयणं, भुवणंगधरेसुमरोसवणं ॥१५॥

धणिअं धवलीकयवीसदिसं, सजसाऽमररस्सरसेणमिसं ।
सुविसंजणसंशयकासनलं, समुवेमि तुमंम्मि जिणं शरणं-
॥१६॥ पञ्चभिः कुलकम् ।

व्याख्याः—भुविभा० जलहि० रणरं० धरणी० धणिअं० । भुवि-पृथिव्यां भावुकलापेन-शुभजल्पनेन कलङ्कं भव्यजनसम्बन्धि दलयति-नाशयतीति भावुकलापकलङ्कदलस्तं, उकारः 'स्वराणां स्वरा' इति सूत्रेण। दलितं-नाशितं अलिवन्नीलकलासहितं कलिलं-पापं येन स तं । सकलं। शरदिन्दुव (दलस) न्मुखं यस्य तं । मकारोऽलाक्षणिकः। सह कलाभिर्वर्तते इति भिन्नमेव विशेषणं । दुःखदुर्दुः-कृच्छ्र-कुत्सितवृक्षस्तस्य हतिः-क्षयः तत्र नद्यामन्वर्थेऽवि वेगवज्जलं तदिव। जलधिवत्-समुद्र इव गम्भीरं। अधीरं-कातरं चारित्रधर्माद्यनुचितमिति मत्वा त्यजतीति अधीर-त्यजस्तं। कनकाचलनिश्चलचित्तयुतं-मेरुवदकम्प्रमनोन्वितं। वर-केसरिवत्-प्रधानसिंहवत् दुर्धर्ष-पराऽपरिभवनीयं। हरेरिन्द्रस्य संमुखं यस्मात् स तं। हर्षाञ्चिताः-समोदास्तैः-शोभनविधिना अर्चितौ सञ्चरणौ-छत्रचामरादिसामुद्रिकलक्षणोपेतपादौ यस्य स तं। रणेन-शब्देन रञ्जिता निर्जरा येन स तं। आर्जवदं-ऋजु-स्वभावदायी द्युतिभिर्निर्जितो दुर्जयाऽवद्यव्रजो-दुर्धरपापव्रजो येन स तं। मुनिमानसाम्बुरुहालि-योगिमनोम्भोजेषु षट्पद इव यः स तं। अलमत्यर्थं धवलं-श्वेतं यत् अम्बुनि-जले रमते-क्रीडति। कमलं हि जले वायुना प्रेरितं नृत्यदिवाऽऽभातीति

अम्बुरमं, अम्बुजं-कमलं तद्वत् 'पुरिसवरपुंडरीआण'मित्याद्युप-
मावचनैर्लीलां-शोभां धरति यः स तं। धरणीधवा-राजानस्तैः
सेवितं-पर्युपासितं पादयुगं यस्य (तं) जगतां वल्लभा-इष्टा या मुद्-
प्रमोदस्तस्या लभो-लाभस्तद्विद्यते यस्य हेतुत्वेन तादृशं लपनं-
मुखं जल्पनं वा यस्य स तं। पवन इव-वायुरिव पवनस्तं, जन-
पापरजसि-लोकपापरेणाविति। रत्नमिव रत्नं, केषु ? भुवनाङ्ग-
धरेषु-जगद्वर्तिप्राणिषु 'पुरिसुत्तमाण'-मिति वचनात्। अरोषः-
क्षमा तस्य वनं-उत्पत्तिस्थानं, काननं वृक्षादीनामुत्पत्तिस्थानं
तद्वदयमपि क्षमायाः। धणिअं-अत्यर्थं, धवलीकृता-उज्ज्वलीकृता
विश्वाः-सम्पूर्णाः दिशः-पूर्वादिकाष्ठाः येन स तं। केन ?
स्वयशोऽमररस्यरसेन-स्वकीययशोरूपेण अमररस्यरसेन-सुर-
भोज्यरसेन-अमृतेनेत्यर्थः। न विद्यते मिषं-छलं यस्य स, नहि
स्वयं छलदूषणयुक्तं वचनं ब्रूते, न वा परं छलेन निगृह्णातीति।
सुवृषं-शोभनधर्मयुक्तं। जनसंशयकाशानलं-जनानां धर्मबुभु-
त्सूनां यः संशयः-पृथिव्यादि वस्तु नित्यमनित्यं वेत्यादिरूपेणो-
भयकोट्यवगाहि भ्रमज्ञानं, तद्रूपः काशस्तृणविशेषस्तत्राऽनल-
इवाग्निरिव यः स तं। यद्वा सुविषं-अतिविषं तद्रूपं यदञ्जनं-
नेत्राञ्जनीकृतं तत्कल्पो यः संशयः, विषाञ्जनाञ्जितलोचनो हि न
किञ्चित्पश्यति, तद्वत्संशयापन्नोऽपि न वस्तुतत्त्वं वेत्तीति तादृशोऽ-
नल इवेति। एवंविधं त्वां श्रीवीरनामानं जिनं शरणं समुपैमि-
अहं शरणं प्रपद्ये इत्यन्वयार्थः ॥१२॥ ॥१३॥ ॥१४॥ १५॥ ॥१६॥
पञ्चभिः कुलकम्।

पुरिसुत्तमम्मुत्तमसंतमसं, समसंततिमंतमतीतमदं ।
मदनातिगनायगमायधरं, घरवासमुदारमदारमहं ॥१७॥
वरकिंकरभावगयामरवं, रविरायतिरक्किअकज्जरवं ।
मतमुत्तिवहूबहुमानपइं, कवयामि कवीकविअं भविअं-
॥१८॥ युग्मम्

व्याख्याः—पुरिसु० वरकिं०-पुरुषोत्तमं। उद्गतं-निःसत्ताकीभूतं, तमः सन्तमसं-अज्ञानान्धकारं यस्मात् स तं। शमसन्ततिमन्तं-उपशमराजियुतं। अतीतमदं-मदरहितं। (मदनान्) कामान् अतिगा-दूरंगताः गौतमादिसाधवस्तेषां नायकः-स्वामी ( तं )। आयस्य-लक्ष्म्यादिलाभस्य गृहमिव यस्तं। गृहवासो-गृहस्थता तत्र या मुद्-हर्षस्तस्याऽऽरं-अरिभावः कर्म वा यस्य, गृहवासः कुत्सित इत्याद्युपदेशदानात् स्वयं त्यक्तत्वात् त्याजकत्वाच्च। अदारमतिः-न दारेषु-स्त्रीषु मतिर्विद्यते यस्य स तं। वरकिङ्करभावं प्रधानसेवकत्वं गताः-प्राप्ता अमरपाः-सुरपतयो यस्य स तं, रविः-सूर्यः, राजा-चन्द्रः, तयोः तिरस्कृतः-किमनयोः कार्यं मयि विद्यमाने इतिरूपेण अधःकृतः कार्यरवः-तदीयकार्यशब्दो येन स तं, तत्कार्यस्य स्वयंकृतत्वात्। मता-सम्मता या मुक्तिवधूस्तस्या बहुमाने पतिरिव-भर्तेव। यद्वा मुक्तिवधूबहुमानविषयः पतिरिव यः, तया भर्तृतयाऽऽद्रियत इत्यर्थः। कविना-शुक्रेण कवितं-स्तुतंभव्यं-श्रेष्ठमेवंविधं श्रीवीरं अहं कवयामि-स्तौमीत्यन्वयः ॥१७॥१८॥ युग्मम्।

भविअंतररायतमोतरणी, परउक्करपुक्करसीहरणी ।
मरणीइपराकरणी रमणी-मणरीणमुणीजणउद्धरणी ॥१९॥
धरणीअलनिम्मलकित्तिभरोऽभयदाणवरो वरवीरजिणो ।
कुण उत्तममुत्तिरमारमणं, ममणंतविऊ करुणासरणं ॥२०॥
सरणादवि दूरिअसम्मसमा, परमोपरमोऽहमकामरमा ।
गरिमानवमानवहीजलही, ववही पणिहीमहणाइमही ॥२१॥

त्रिभिर्विशेषकम्

व्याख्या—भविकानां-भव्यजीवानां आन्तराऽरातयः-कर्मशत्रवस्तल्लक्षणे तमसि तरणिरिव। परेषां-परवादिनां उत्करः-समूहस्तस्य पूत्करणं-वादलिप्सया कुत्सितबाढस्वरकरणं, तत्र सिंहवत् रणी-वक्ता, परवादिमृगनाशे सिंह इवेत्यर्थः। मरस्य-मृत्योः सम्बन्धिनी नीतिस्तद्गृहाचारः। यद्वा मरणरूपा इतिरुत्पातस्तस्याः पराकरणी-पराकरणं यस्येतीन्प्रत्ययेन, पराकर्त्तेत्यर्थः। रमणीषु-स्त्रीषु यन्मनश्चित्तं तेन रीणो-रहितो यो मुनिजनः-साधुलोकस्तस्योद्धरणी-प्राग्वदिन्विधानादुद्धर्ता-संसारकूपपाताद्रक्षक इत्यर्थः। धरणीतले निर्मलः कीर्तिभरो यस्य सः। अभयदानेन-सर्वसावद्यप्रत्याख्यानरूपेण वरः-श्रेष्ठः। अनन्तान् पदार्थान् वेत्तीति अनन्तविद्, एवंविधः वरवीरजिनः मां करुणाशरणं-कृपाऽऽस्पदं दुःखपीडितत्वादनुकम्प्यमित्यर्थः। उत्तमा मुक्तिरमा-प्रधानमुक्तिश्रीस्तस्याः रमणः-स्वामी करोत्वित्यन्वयः। परम-उत्कृष्ट उपरमो-विरतिर्यस्य स, कुतः? अधमात् कामरमात्-

निन्द्यात् मदनक्रीडनात्, किंलक्षणात्? आस्तां निषेवनात्, स्मरणादपि-स्मृतिमात्रेणाऽपि दूरितशर्मशमात्-शर्माणि च शमश्च शर्मशमाः, दूरिता-दूरीकृताः शर्मशमा-सुखोपशमा येन स तथा तस्मात्। गरिमायाः अनवमो-निष्पापः, अनवधिरवधिरहितो महानित्यर्थः, जलधिः-समुद्रः। विगता अपधीः-कुत्सिता बुद्धि-र्यस्मात् स व्यपधीः। तेन कर्तृभूतेन प्रणिधिना-समाधिना यन्महनादि-पूजादि कृत्यं तस्य महीव-पृथिवीव स्थानमित्यर्थः ॥१९॥२०॥२१॥ त्रिभिर्विशेषकम्।

**कदलीदलकोमलकायलया, सुरसुंदरिरूववई महिला।**
**न मणा मणखुब्भणसुप्पयणा,**
**जमुविच्च खमाऽखिलुवायमुणा ॥२२॥**

**तमहंपि महामि महीणमहं, कलहानलजालजमालसहं।**
**मयणप्पफुरंत फणाहिसिहं-हसपाणपरानल जालणहं ॥२३॥**

**सुरपायवदाउवपायरयं, परमाणहमाणहमाणपयं।**
**भवकूवरडंतपडंतजणं पडि रज्जुपहज्जुतिजालधणं ॥२४॥**

**धणदप्पहयीकयकंचणुह-पमुह(भिइ)स्सपहायचयज्जसुहं।**
**सुररायसिरोवरिचूणुवम-क्कमतामरसप्पसरंतरयं ॥२५॥**
**चतुर्भिःकलापकम्।**

व्याख्याः—कदली० तमहं० सुरपा० धणय०। कदलीदलवत् कोमला-सुकुमारा कायलता यस्याः सा, सुरसुन्दरीवत् रूपवती,

मनःक्षोभने-श्रीवीरमनश्चालने सुष्ठु प्रयत्नो यस्याः सा, अखिलोपायाः-मनःक्षोभने सम्पूर्णकारणानि तान् जानातीति 'ज्ञो जाणमुणा'विति मुणादेशः। एवंविधा महेला-स्त्री श्रीवीरमुपेत्य--प्राप्य, मनाग् अपिरगम्यः, मनागपि-स्तोकमपि न क्षमा-न समर्था जाता। तं श्रीवीरं अहमपि-अशक्तोऽप्यहं महामि-पूजयामि। किंलक्षणं? अहीनमहं-अमानतेजसं, कलहानलेकल्यग्नौ जालमिव-जलसमूह इव ये यमा-महाव्रतानि, तेषु यदालस्यं-प्रमादस्तं हन्ति यः स तं। मदनरूपो यः प्रस्फुरन् फणाभृत्सर्पः, यद्वा प्रस्फुरन्ती फणा यस्य स चासावहिः-सर्पस्तत्र शिखीव-मयूर इव। तथा आंहसं-अंहःसमूहस्तद्रूपं पार्णपर्णसमूहस्तत्रानलजालं- अग्निसमूहस्तद्वदनघो-निष्पापस्तद्वत्समर्थ इत्यर्थः। यद्वा अनलवत् ज्वाले-ज्वालनेऽनघः-समर्थः इति। यद्वा तद्वत्ज्ज्वालनाद् ज्वालशीलाऽऽभा-कान्तिर्यस्येति। ततश्च मदन-प्रस्फुरत्फणाहिशिखीवाऽसौ आंहसपार्णपरानलजालानघश्चेति विशेषणकर्मधारयः। सुरपादपवद्दायि-कल्पवृक्षवद्वाञ्छितार्थदातृ, पादयोः समीपमुपपादं तस्य रजो-रेणुर्यस्य स तं। परम उत्कृष्टोऽनघो-निष्पापः, मानं हन्तीति मानहः-परिमाणरहितो यो मानः-पूजा तस्य पदं-स्थानं। भवकूपे-संसारावटे रटन्राटिं कुर्वन्, पतन्-अधो गच्छन् यो-जनो-भव्यलोकस्तं प्रति रज्जुप्रभा-बलवद्दोरसमाः या द्युतयः-कान्तयस्तासां जालं-समूहः तद्रूपधनं-स्वं यस्य स तं। धनदेन-कुबेरेण प्राभृतीकृतं-ढौकितं यत्काञ्चनौघप्रभृतिस्वं-स्वर्णमणिमुक्ताफलादिधनं, तस्य यः प्रभाते सूर्योद-

यादारभ्य प्रथमप्रहरे त्यजस्त्यागो-दानमिति यावत्, तस्माद् हेतुभूतात् आर्यं शुभं-शुभप्रवृत्तिजन्यं यशो यस्य स तं। सुरराजशिरस उपरि-इन्द्रशीर्षाग्रभागे चूर्णोपमं-वासवच्छोभमानं क्रमतामरसात्-पादकमलात् प्रसरत्-पृथक् भवत् पादरजो यस्य स तं। ॥२२॥२३॥२४॥२५॥ चतुर्भिः कलापकम्।

**अमरुस्सिअछत्ततिछायकला-कलिताऽमरचामरसज्जमला।**
**पभुआ पविभाइ जिणस्सयला, पुहवीअलि मालिमलाविमला॥**

व्याख्याः—अमरु०। अमरैः-देवैरुत्सृतानि-मस्तकोपरि धृतानि छत्राणि तेषां त्रिकसद्भावेन यास्तिस्रः छायास्तासां या कला-शोभा तया कलिता-व्याप्ता। तथाऽमरचामराणां संति-विद्यमानानि यमलानि-युगलानि यस्यां सा। मा-लक्ष्मीः सैव आलिः-सखी तां मलति-धारयतीति मालिमला-लक्ष्मीसौहृद्यविधायिनीत्यर्थः। एवंविधा जिनस्य-वीरस्य विमला-प्रभुता-ऐश्वर्यं पृथिवीतले विभातीत्यन्वयः॥२६॥

**परिसा हरिसाउलिआमलयाऽऽ-**
**वलिआमिलिआविरलासरला।**
**कमलाविमलालयमालमला,**
**तिमलापसवस्स विभायचला॥२७॥**

व्याख्या—हर्षाकुलिता-मुदन्विता अमलतया-बाह्याभ्यन्तरमलरहिततया आवलिकया-श्रेण्या, न पुनरसम्बद्धतया एकैकपुरुषैर्मिलिता-पिण्डीभूता, सर्वदिशः समन्तात् धर्मशुश्रूषया पुरु-

षादिसमूहैर्मिलितेत्यर्थः। एवंविधाऽपि अविरला-निचिता निरन्तरस्थिता, न पुनरन्तरालरिक्तास्पदा। सरला-कपटरहिता। तथा च हर्षाकुलिता च अमलतावलिकामिलिता च अविरला चेति विशेषणसमासः। अचला-परतीर्थिकैरक्षोभ्या। कमलायाः-लक्ष्म्या विमलालय इव-निर्मलस्थानकमिव, या माला-स्रग्, यद्वा कमलाविमलालयो-दिव्यकमलसमूहस्तत्सम्बन्धिनी या माला तां मलति-धारयति या सा, कमलाविमलालयमालामला। तादृग्-माला परिधायिनी शक्रादिसभेति। एवंविधा त्रिशलाप्रसवस्य-वीरस्य पर्षद्-सभा विभातीत्यन्वयः ॥२७॥

तिजयस्सरणं विह वप्पतिगं, तव भादि विभाभिदमब्भुदयं।
मणिकंचणरायथराजिमयं, परभत्तिभरामरनिम्मविअं ॥२८

व्याख्याः—हे जिन! तव वप्रत्रिकं-दुर्गत्रयं विभाति इवोत्प्रेक्ष्यते त्रिजगच्छरणं। अन्योऽपि वप्रोऽरिपराभूतशरणं भवति, तद्वदिदं वप्रत्रिकं मोहारिपराभूतानां शरणमिति। इह-जगति। किंलक्षणं? विभाभृतं-कान्त्याढ्यं, अभ्युदयं-सर्वतोऽवाप्तोदयं, मणिकाञ्चनराजतराजिमयं-मणिस्वर्णरजतसमूहात्मकं, क्रमेण मण्यादिसमूहजन्यमित्यर्थः। परेण-भक्तिभरेण अमरैर्निर्मापितमिति ॥२८॥

एवं थुओ जिणवरो वरवीरवीरो,
वीराभिहो सुहमुहो सुहवल्लिनीरो।
सम्मंकुरो सिवपुरीपयदं अमुद्दं,
सद्धम्मसायरजसो दिसऊ सुभद्दं ॥२९॥

व्याख्याः-एवं-प्रागुक्तप्रकारेण वीराभिधो जिनवरः श्रीवीरः किंलक्षणः ? अपरे ये वीरास्तेभ्यो वीरो-वीराधिवीर इत्यर्थः। शुभं भद्रवन्मुखं यस्य, भद्रस्य मुखमिव यो वा। शुभवल्लीनीरमिव यः। सन् शोभनो यो धर्मस्तस्य सागरः-समुद्रस्तदुपमया यशो यस्य स। अत्र स्तोत्रकर्तु 'धर्मसागर' इति नामापि सूचितं। सुभद्रं, किंलक्षणं ? अमुद्रं-मुद्रारहितममानमित्यर्थः। शर्मणां अङ्कुरा-उत्पत्तिहेतवः ते विद्यन्ते यस्य स इति वीरविशेषणं। जगतां सर्वसुखहेतुरित्यर्थः। परम्परया शुभानुबन्धिमङ्गलं। पुनः सुभद्रं कीदृग् ? शिवपुरीपदद-मुक्तिपुरीदायकं। अत्र यत्र नगर्यां स्तोत्रं कृतं तत् शिवपुरीति नामाप्यसूचि। एवं स्तुतः श्रीवीरः सुभद्रं दिशत्वित्यन्वयः ॥२६॥

# आगमोद्धारक ग्रंथमालाना प्रकाशनो

| | | | | |
|---|---|---|---|---|
| १. | सर्वज्ञशतक सटीक | महोपा० श्री धर्मसागरजी कृत | पत्राकारे | ३-० |
| २. | सूत्रव्याख्यानविधिशतक | ,, | बुकाकारे | २-० |
| ३. | धर्मसागर ग्रंथ-संग्रह (श्रीमहावीर विज्ञप्ति द्वात्रिंशिका, षोडशश्लोकी-महावीरजिनस्तोत्र) | ,, | ,, | २-५० |
| ४. | औष्ट्रिकमतोत्सूत्रदीपिका | ,, | ,, | १-० |
| ५. | तात्त्विकप्रश्नोत्तराणि | आगमोद्धारक कृत | पत्राकारे | ७-५० |
| ६. | आगमोद्धारक कृतिसंदोह | प्रथम विभाग | ,, | ४-५० |
| ७. | ,, | द्वितीय विभाग | ,, | १-८७ |
| ८. | ,, | तृतीय विभाग | ,, | १-० |
| ९. | ,, | चतुर्थ विभाग | ,, | प्रेसमां |
| १०. | षोडशकजी पर आगमोद्धारकश्रीनां व्याख्यानो भाग बीजो अने आगमोद्धारकश्रीनी बे कृतिओ सानुवाद | | बुकाकारे | २-७५ |
| ११. | कुलकसंदोह | श्रीपूर्वाचार्यकृत | ,, | ०-७५ |
| १२. | संदेह समुच्चय | श्रीज्ञानकलशसूरिनिर्मित | ,, | ०-७५ |
| १३. | जैन स्तोत्रसंचय | प्रथम विभाग | ,, | १-० |
| १४. | ,, | द्वितीय विभाग | ,, | १-५० |

*प्राप्ति स्थानो*

१ श्री जैनानंद पुस्तकालय सुरत, [ गोपीपुरा ]

२ श्री सरस्वती पुस्तक भंडार अमदावाद, रतनपोल हाथीखाना